# वाक् सुधा

रचयिता

**महर्षि दैवरात**

छन्दोदर्शन प्रणेता

प्रकाशक

**मदनगोपाल पोद्दार चैरिटी ट्रस्ट**

२५, कैमक स्ट्रीट, कलकत्ता-१६



महर्षि दैवरात

आषाढ़ शुक्ल द्वितीया
विक्रम संवत्
२०२८

Rs 6·5 =

मुद्रक :-
हलियाराम गुप्त
बंगाल प्रिन्टिग वर्क्स
२१, सीनागोग स्ट्रीट,
कलकत्ता-१

## PUBLISHERS' NOTE

It was a piece of great luck, when Late Dr. Vasudev Saran Agrawal of Benaras Hindu University a great Vedic scholar himself, was good enough to arrange the stay of Brahmarshi Daivaratji Maharaj of Gokaran (Mysore State) at Calcutta with me some years ago. While he was in Calcutta at that time, I came to know of his extra-ordinary qualities and attainments. Brahmarshi Daivaratji was kind enough to explain to us some of the researches he had done in Vedic Literature. He had revelation of Vedic Mantras (450) hereto unknown. Several other poetic compositions and literary Sanskrit verses of very high order have been written by him. He also showed to us an exequisite Oil wall painting 15 ft. x 5 ft. made by him depicting the "Vishwa Rath" having great Vedic significance. He also showed to us several tantric coloured diagrams prepared by him having great significance. We then came to know that he could perform Vedic dances with Vedic Mantras. In fact he was kind enough to give a performance of Tandav Nritya accompanied with Vedic Mantras with perfect rythem and instrumental music.

He would completely be at home with the most intricate subjects of Vedic litera'ure and he could explain them in absolutely simple Hindi language which could be understood by all of us. For example, his discourse on Gayatri Mantra and the different interpretations of "Tri sapta" occuring in Vedic contexts was enchanting and illuminating.

Several Sanskrit works of Daivaratji are awaiting publication. One of his original and unique works known as "Chhando Darsana" has since been published by the untiring efforts of Sri R. R. Divakar, by the Bharatiya Vidya Bhavan,

Chowpatty, Bombay with a Sanskrit commentary by Kavya-kantha Ganapatimuni known as "Vasishthanvayabhashyam" and also lead English transalation of the text as well as commentary. Sri R. R. Divakar in his introduction to 'Chhando Darsana' says :

"When I first brought portions of it to the notice of Mahamahopadhyaya Datto Vaman Potdar of Poona, he said that it was for the first time two thousand years after the "Samhiti-karana" of the Vedas that he had occasion to see newly revealed Rgvedic Mantras. When I showed the same to Vinoba Bhave, another great Vedic scholar, he exclaimed in Marathi, this is new Rgveda ( ha navin Rgveda ahe ). The late Dr. M. S. Aney, the President of the Vaidik Samsodhan Mandal and also the Secretary of the Mandal, Dr. Sontakke were wonderstruck at the four hundred and fifty new Mantras. Dr. Hans Peter, a German Vedic scholar of note who had been recently to India, applied the usual tests and said that the Mantras were perfectly Rgvedic in style. He admired the "Anvaya-Bhashya" and said that he had hardly seen any Sanskrit commentary so rich and profound in its exposition of the text.

Shri Diwakar goes on to say :

"Vasistha Ganapati Muni has given us all the relevant details of the circumstances under which the Mantras were revealed to young Daivarata. There is nothing mysterious or even mystic or secret about it. By utter devotion to the Guru, Daivarata had completely surrendered himself and had full faith that was the way to achieve perfection. He threw himself with the utmost confidence into intensive Sadhana and followed meditative processes whereby he was able to be in a yogic trance for hours. If in one age and at one time man's mind could condition itself for the descent of the Vedic Mantras from above the mind and intellect, why should it not be possible now ? That was how Daivarata could prove that it it can be done even now.

"It was not an accident nor a chance Mantra finding expression through a highstrung mind that happened in the case of Daivarata. The whole process repeated itself for sixteen days and while the disciple was in a trance and unware of what he was saying, the Guru studiously took down what was clear and whole and audible to him. To be master of Sanskrit is one thing, but even that Daivarata was not at that time ; even then Mantras true to the style, diction, accent, archaism, vocabulary grammer and all that, poured out of the lips of the young disciple day in and day out. This shows that at stated times there was a sustained inspiration and a steady flow of Mantras 450 in number."

"This phenomena should hearten every one and remind us that it is not only the past that could be bright and great, but that the future too can be greater and brighter, that creative evolution has not stopped, nor have the fountains of life gone dry. Sri Aurobindo who is a modern seer has given a call and declared that from the dawns of the past we have to look forward to the noons of the future."

"Apart from being good and high poetry, the thought content of 'Chhando-darsana' is not merely eulogistic but penetrating, philosophical and inspiring. The unitive thought of the Mantras, the logical sequence and the arrangement of hymns and sections is artistic. The vigour and force of the language is contagious. When the Rishi speaks of the cosmic gods and goddesses, of Indra, of Sarasvati, of Brahmanaspati, one is carried away by the grand conception reflected in the words."

"I need not say much here about the author, as his Guru Vasistha Ganapati Muni has given some important facts about him in his preface to 'Anvaya-Bhashya'. He is now 77

Chowpatty, Bombay with a Sanskrit commentary by Kavya-kantha Ganapatimuni known as "Vasishthanvayabhashyam" and also lead English transalation of the text as well as commentary. Sri R. R. Divakar in his introduction to 'Chhando Darsana' says :

"When I first brought portions of it to the notice of Mahamahopadhyaya Datto Vaman Potdar of Poona, he said that it was for the first time two thousand years after the "Samhiti-karana" of the Vedas that he had occasion to see newly revealed Rgvedic Mantras. When I showed the same to Vinoba Bhave, another great Vedic scholar, he exclaimed in Marathi, this is new Rgveda ( ha navin Rgveda ahe ). The late Dr. M. S. Aney, the President of the Vaidik Samsodhan Mandal and also the Secretary of the Mandal, Dr. Sontakke were wonderstruck at the four hundred and fifty new Mantras. Dr. Hans Peter, a German Vedic scholar of note who had been recently to India, applied the usual tests and said that the Mantras were perfectly Rgvedic in style. He admired the "Anvaya-Bhashya" and said that he had hardly seen any Sanskrit commentary so rich and profound in its exposition of the text.

Shri Diwakar goes on to say :

"Vasistha Ganapati Muni has given us all the relevant details of the circumstances under which the Mantras were revealed to young Daivarata. There is nothing mysterious or even mystic or secret about it. By utter devotion to the Guru, Daivarata had completely surrendered himself and had full faith that was the way to achieve perfection. He threw himself with the utmost confidence into intensive Sadhana and followed meditative processes whereby he was able to be in a yogic trance for hours. If in one age and at one time man's mind could condition itself for the descent of the Vedic Mantras from above the mind and intellect, why should it not be possible now ? That was how Daivarata could prove that it it can be done even now.

and mostly stays in Rshi-kula Yogasram, Gokaran, Karnataka. He is childlike in his nature and even now full of vigour and enthusiasm. His creativity does not seem to have suffered on account of age as his studies and research in Vedic lore are still on. Two of his other works 'Vak-Sudha' and — 'Vedartha-Kalpalata' are being printed but alas, without any commentary and any English or other translation. His another original work 'Yoga Sudha' based entirely on Vedic Mantras still awaits translation. His mastery over the four Vedas and his masterly and eloquent interpretation of Vedic Mantras and literature is hardly to be found elsewhere. He can speak most fluently and compose poetry in Sanskrit. He can as well give talks in Kannada, Hindi, Marathi, Tamil, Telugu, Gujrati and Nepali."

In 1971 on an invitation from Maharshi Mahesh Yogi he had gone to Spain, in Europe. At Majore a turist centre he gave several Vedic discourses which were translated to the audience in English by Mahesh Yogi and were highly appreciated by big groups of very educated men and women.

It is regrettable that for want of proper translator to translate the Vak Sudha and with a view to avoid delay this work is being published without translation. It is hoped that some body in the near future will undertake to translate this book which will enhance the utility of this work.

Although the publication was undertaken about 4 years ago, the printing could not be completed as the author has been living mostly in his Ashram. Postal and other delays in sending the proofs and getting them back from the auother has taken considerable time. He being out of India for some time has also delayed publication of the work to some extent We are glad now to place this work in the hands of the scholars and lovers of Vedic Literature.

Our thanks are due to Sri Rulia Ram Gupta for his untiring efforts in getting the work beautifully printed in his press at Calcutta. It was really difficult to have it printed in sanskrit with Vedic Mantras with necessary signs in Calcutta. He deserves to be thanked also for the care he has taken in this very difficult work and for the patience shown.

It is hoped that this work of unique utility will be liked by the scholars and all lovers of Vedic Literature.

*Shree Krishna Janmasthami*
Sambat 2028
**PODDAR HOUSE,**
24,1 Camac Street,
CALCUTTA.

MADAN GOPAL PODDAR
*Trustee*
Madan Gopal Poddar Charitable Trust

# FORWARD

Vak-Sudha means, Speach is nectar or heavenly ambrosia. Not less than fifty seven synonyms of Vak, speech or power of speech, appear in the Nighantu ( Vedic ). Yaska has his commentary ( Nirukta ) on the Nighantu.

The originality of this great work of Brahmarashi Daivarata consists in tracing the different places in the vedas, Brahmanas & Upanishads, where these synonyms occur, and bringing out the significance, connotation & rich as well as deep meanings of the respective synonyms.

Everyone knows the supreme place 'Word' occupies in all religions & philosophies. But 'Word' has its origin in the power of Speech. Vak or Speech or the power of speech is the vehicle of communicating knowledge. The Vedic Rishis however, go to the root of the matter & say that it is the invisible, untracable chetana or chaitanya, spiritual force which is the source of everything including the 'Word' and power of Speech.

One could easily see the importance of such original studies which expound the Vedic lore and its varied illuminating aspects.

2, Residency Road,
BANGALORE-25.
31.7.1971

R. R. DIWAKAR

॥ ई॑ ॐ श्रीः ॥

# वाक्सुधा

विषयानुक्रमणिका


| विषयानुक्रमणिका | पृष्ठम् |
|---|---|
| १ आद्यं मङ्गलं पद्यम् | १ |
| ( १ ) प्रथमा कला | |
| पूर्णं परं ब्रह्म | २ |
| २ पूर्ण ब्रह्मात्मिकावाक् | ,, |
| ३ भाषा मञ्जरी | ५ |
| ( २ ) द्वितीया कला | |
| ४ मातृभाषा | १० |
| ५ लिपिकल्पना | ११ |
| ६ अक्षरारम्भः | १२ |
| ७ संस्कृत भाषा | ,, |
| ८ प्राकृत भाषा | १३ |
| ९ प्रादेशिकी भाषा | १४ |
| १० राष्ट्रभाषा | ,, |
| ११ वाचः सप्तसङ्केतात्मिका लिपिः | १५ |
| ( ३ ) वाक्तत्त्वकला | |
| १२ पूर्णात्मिका वाक् | १९ |
| १३ तत्त्वत्रयात्मकः परमः पुरुषः | २० |
| १४ चतुष्पात् पूर्णः पुरुषः | २२ |
| १५ चतुः शृङ्गो रुद्रः | २३ |
| १६ रौद्री वाग् वैद्युती | २४ |
| १७ गौरी रुद्राणी वाक् ( माध्यमिका ) | २५ |
| १८ चतुष्पदी वाक् | २६ |
| १९ आधिभौतिकी वाक् | ,, |
| २० आधिदैविकी वाक् | ,, |
| २१ आध्यात्मिकी वाक् | २७ |
| २२ तुरीयात्मिका वाक् | ,, |

| विपयनुक्रमणिका | | पुटम् |
|---|---|---|
| | (४) चतुर्थी प्रसिद्ध प्रणव कला | |
| २३ | ओङ्कारः प्रणवः | २८ |
| २४ | प्रत्यक्षा अक्षरब्रह्मात्मिका वाक् | " |
| २५ | अक्षरं ओङ्कारवाक्परम् | २६ |
| २६ | अक्षरं तत् ब्रह्मवस्तुपरम् | " |
| २७ | अक्षरं प्रशासनशक्तिकं वाक्परम् | ३० |
| २८ | सर्ववेदमूलपरं प्रणवाक्षरम् | " |
| २६ | तदक्षरकेव श्रेष्ठं आलम्बनम् | ३० |
| ३० | प्रथमं आधिलोकंतत्त्वं अधिभूतार्थसत्त्वम् | ३१ |
| ३१ | द्वितीयं अधिज्यौतिषंतत्त्वं अधिदैवतार्थसत्त्वम् | ३२ |
| ३२ | पृथिव्याः पतिः अग्निः | " |
| ३३ | मध्यम्लोकाधिपतिर्वायुः | " |
| ३४ | उत्तमो द्युलोकाधिपतिः सूर्यः | " |
| ३५ | अधिविद्यतत्त्वम् | ३० |
| ३६ | तृतीयं अध्यात्मं तत्त्वम् | " |
| | ( अकारः मात्रापादः प्रथमः ) | |
| ३७ | द्वितीयः उकारः मात्रापादः | ३३ |
| ३८ | तृतीयो मकारः मात्रापादः | " |
| ३६ | अधियज्ञं तत्त्वम् | ३४ |
| ४० | अमात्रः तुरीयः पादः पूर्णविन्दुस्वरूपः | " |
| ४१ | अर्धमात्रात्मिका तुरीयपदा वाक् | " |
| | ( अमात्रात्मिका ) | |
| ४२ | तिस्रोमात्रा मृत्युमत्यः प्रयुक्ताः | ३५ |
| ४३ | ओङ्कारतत्त्वज्ञानकोष्ठकं वैदिकम् | ३६ |
| ४४ | अध्यात्मकं औपनिषदं तदक्षरतत्त्वकोष्ठकम् | ३७ |
| | (५) पञ्चमी कला | |
| ४५ | प्रणवाक्षरब्रह्मोपासना | ३८ |
| ४६ | औपनिषदो मन्त्रवर्णः | |
| | ( प्रणवोधनुः शरोह्यात्मा ) | ३६ |

| | विषयनुक्रमणिका | पुटम् |
|---|---|---|
| ४७ | उद्गीथः प्रणवाक्षरपरः | ४० |
| ४८ | प्रणवाक्षरपरः सामरसस्वरः | ” |
| ४६ | अनुज्ञाक्षरं प्रणवसञ्ज्ञापरम् | ४१ |
| ५० | हंसाक्षरस्वरूपम् | ४२ |
| | ( ६ ) षष्ठी गुप्तप्रणवकला | |
| ५१ | ईङ्कारः | ४५ |
| ५२ | “ईं” इति तत्त्वत्रयार्थाक्षरं | ” |
| | ( जगद्-ईश-जीमात्मपरम् ) | |
| ५३ | अधिभौतिके जगति ईङ्कारः ( यईं चकार ) | ४६ |
| ५४ | परोक्षे परमेवस्तुनि ईङ्कारः | ४७ |
| ५५ | अपरोक्षे अन्तरात्मनि ईङ्कारः | ४६ |
| ५६ | ईं इतिब्रह्मणस्पतेः गुह्यं नाम | ५० |
| ५७ | ईङ्कारो गुप्तप्रणवः | ५१ |
| ५८ | यजुर्मन्त्रे स्पष्टतरः ईङ्कारः | ” |
| | ( ७ ) सप्तमी शक्तिप्रणवकला | |
| | ( श्रीः ) | |
| ५६ | श्रीः लक्ष्मीः च विष्णुपत्न्यौ | ५६ |
| ६० | श्रीसूक्ते लक्ष्मीमन्त्रः चन्द्रां प्रभासाम् | ५७ |
| ६१ | शुक्लयजुर्मन्त्रः “श्रीश्चते लक्ष्मीश्चपत्न्यौ | ५६ |
| ६२ | कृष्णयजुर्मन्त्रः “ह्रीश्चते लक्ष्मीश्चपत्न्यौ | ६० |
| ६३ | ह्रीः लक्ष्मीः च | ” |
| ६४ | तयोः श्रीं ह्रीं “इति बीजमन्त्रतत्त्वम्” | ६१ |
| | ( ८ ) अष्टमी गायत्री कला | |
| ६५ | गायत्री वेदमाता | ६३ |
| ६६ | गायत्रीमन्त्रः “तत् सवितुर्वरेण्यम्” | ६४ |
| | ( ६ ) नवमी गायत्री सत्त्वकला | |
| ६७ | गायत्री पञ्चवक्त्रा | ६७ |
| ६८ | ” साङ्ख्यायनसगोत्रा | ” |
| ६६ | परमतत्त्वार्थरूपा गायत्री | ६८ |

विषयनुक्रमणिका पृष्ठम्
७० चतुष्पदा षड्विधा गायत्री ६६
७१ भूतात्मिका वागात्मिका च ,,
७२ पृथिवीरूपा शरीररूपा च ,,
७३ प्राणात्मिका हृदयरूपा च ,,
(१०) दशमी कला
७४ वाचोऽपि परत्वाद्ब्रह्मणः अनिर्वचनीयत्वम् ७३
७५ गायत्र्याः तुरीयपदस्वरूपम् ,,
७६ गायत्र्याः उपस्थानेऔपनिषदः यजुर्मन्त्रः ,,
७७ एतस्मिन् अर्थेऋङ्मन्त्रवर्णः ,,
"तत् ते सवितस्तुरीयम्" छन्दोदर्शनम्" ,,
(११) एकादशी कला
७८ वाचकशक्तिरूपावाक् ७५
७९ इन्द्रात्मनः तस्य वागेव तनूः ७८
८० छन्दसां वर्षकः इन्द्रः ,,
(१२) द्वादशी कला
८१ वाग्-आत्मनोः दाम्पत्यसत्त्वम् ८०
८२ वागेव चिदात्मनो माता ८१
८३ मन्त्रात्मवागवलम्बनेन परमात्मसाक्षात्कारः ८३
८४ हंसात्मिकावाक् सरस्वती हंसवाहना ८४
(१३) त्रयोदशी कला
८५ वाक्परा शक्तिः ८५
८६ ब्रह्मात्मवाग्धमनिध्वनेः विश्वविसृष्टिः ८६
८७ रुद्रस्य विद्युद्रवाद्विश्वाविर्भावः ८७
८८ तस्य चत्वारि शृङ्गाणि ८८
८९ त्रयो अस्य पादाः ,,
९० द्वेशीर्षे सप्तहस्तासो अस्य ,,
९१ त्रिधा बद्धः ८९
९२ सर्वान्तरात्मा रुद्रोवाग्रससमुद्रः ,,
(सर्वरसनान्तर्गतः)

विषयनुक्रमणिका पृष्ठम्

(१४) चतुर्दशी कला
९३ विश्वनिर्मात्री माता गौरी वैद्युतीमाध्यमिका ९१
९४ विश्वजनने अग्निना छन्दस्वयाः वाचः सन्धानम् ९२
९५ अग्नेः सकाशात् वाङ्मुखाद् विश्वसृष्टिः ,,
९६ ब्रह्मात्मवाग्विश्वसृष्टेरनुक्रमः ९३
९७ विशिष्टवैदिकशब्देभ्यो विशिष्टगुणवस्तूनां विसृष्टिः ९५
९८ औपनिषदं ब्राह्मणानुवचनम् ९६
९९ ब्रह्मसूत्रम् तत् प्रमाणम् ,,
१०० ऋङ्मन्त्रः "एते असृग्रमिन्दवः ९५ - ९६
१०१ असृग्रं इन्दवः सोमः पितृमान्, अग्निष्वात्ताः पितरः ९७
१०२ तिरः पवित्रमाशवः; विश्वानि अभिसौभगा ९८
१०३ सांकेतिकः एतेइत्यादयः शब्दाः ९९
(१५) पञ्चदशी कला
१०४ अस्मिन् विषयेऔपनिषदं तत्त्वम् १००
१०५ भूः भुवः स्वः महः १०१
१०६ सप्तव्याहृतयः १०२
१०७ विष्णोः सप्तधामनि, जनः तपः सत्यम् ,,
१०८ भुवनत्रये सर्वभुवनानामन्तर्भावः १०३
(१६) षोडशी कला
१०९ ब्रह्मचोदनी वाक् १०४
११० वज्रयोगिनी वाक् १०८
१११ शास्त्रयोनिः (वाक्) ,,
११२ अजपा गायत्री ,,
११३ रुद्रशिखा १०९
११४ शाम्भवी मुद्रा १०९
११५ अक्षरमालात्मिका वाक् ,,
(१७) सप्तदशी कला
११६ सद्योजातस्य शिशोः कर्णे वाक् वाक् इति जपः १११
११७ अहं पदप्रत्ययात्मिका वाक् ११३

| विषयानुक्रमणिका | पृष्टम् |
|---|---|
| ११८ अकारादिहकारान्ता सर्ववर्णात्मिका अर्हंपदस्वरूपा वाक् | ११४ |
| ११६ इन्द्राणी शची वाक् | ११४ |
| १२० शचीपतिः इन्द्रः वाचस्पतिः | ११५ |
| (१८) अष्टादशी कला | |
| १२१ सत्यमेव जयते | ११६ |
| १२२ सत्यमेव परं ब्रह्म | ,, |
| १२३ सत्यस्वरूपावाग् ब्रह्मात्मिका | ,, |
| १२४ सत्यः परमात्मा इन्द्रः | १२० |
| १२५ पारमैश्वर्यपूर्णः इन्द्रः | ,, |
| १२६ तस्येदं औपनिषदं ब्राह्मणवचनम् | १२१ |
| १२७ सत्यएव इन्द्रः इन्द्र एव सत्यः | ,, |
| १२८ इन्द्रोनास्तीति कस्यचिन्मतम् | १२२ |
| ११६ श्रद्धयेव सत्यवस्तुप्राप्तिः | ,, |
| १२० सदसद्विमर्शनेन सत्यवस्तुविज्ञानम् | १२३ |
| १२१ ऋतसत्यवस्तु तत्त्वविमर्शनम् | १२४ |
| १२२ सोमारुद्रसत्त्वकं ऋतसत्यतत्त्वम् | १२५ |
| १२३ महाव्रतं सत्यम् | १२६ |
| १२४ औपनिषदः शान्तिमन्त्रः ( वाङ्मेमनसि ) | ,, |
| १२५ वाङ्मनसयोर्योगेन सत्यतत्त्वम् | १२७ |
| १२६ सत्यं यज्ञीयं व्रतम् | ,, |
| १२७ चक्षुर्वैसत्यम् | ,, |
| १२८ सत्यमेव परमोधर्मो यज्ञमयः | १२८ |
| १२६ सत्यसञ्ज्ञकः प्रथमो युगः | ,, |
| १३० सत्यमेव सप्तमं भुवनम् | ,, |
| (१६) एकोनविंशी कला | |
| १३१ स्मरणी | १३० |
| १३२ प्रथमा दश संख्याङ्कमाला | १३१ |
| १३३ द्वितीया षोडसकलात्मिका जपमाला | १३२ |

विषयनुक्रमणिका पृष्टम्


१३४ अकारादिक्षकारान्ता रुद्राक्षमाला १३३
१३५ पञ्चाशद्वर्णमाला १३३
१३६ अष्टोत्तरकल्पिता शताग्रा जपमालिका ,,
१३७ चतुः षष्टिकलान्विता वर्णमाला ,,
१३८ सहस्राक्षरा वङ्मयी मलिका ,,
चतुर्विंशत्युत्तरा पूर्णसंख्यात्मिका ,,
१३९ रुद्रात्मिका सहस्राणु मणिमाला १३४

( २० ) विंशी कला

१४० दिग्व्योमादिदेशगुणात्मिका वाक् १३६
१५२ भुवनत्रययौगिकी वाग्व्याहृतिरूपा ,,
१५३ अध्यात्मं कण्ठादिस्थानयौगिकीवाक् १३७
१५४ देशादिमर्यादारहिता पूर्णबिन्दुरूपावाक् ,,
१५५ कालात्मिका वाक् ,,
१५६ सवनात्मिका वाक् १३८
१५७ प्रथमे प्रातः सवने मन्द्रात्मिका वाक् ,,
१५८ द्वितीये मध्यन्दिने सवने मध्यमा ,,
१५९ तृतीये सायंसवने तारस्वरा वाक् ,,
१६० लवादिमात्रात्मिका वाक् १३९
१६१ प्राणगत्या सह आत्मनि वाचः सन्धारणम् १४०
१६२ प्राणगतेः सङ्ख्यामात्रादिगणितम् १४१
१६३ तद्गणितप्रक्रिया ,,
१६४ प्राणात्मयौगिकी हंसाक्षरस्वरात्मिका वाक् १४२
१६५ सा माध्यमिकावागेव गौरी विद्युदात्मिका ,,
१६६ वसन्तर्तुवरिष्ठा वाक् १४३
१६७ ग्रीष्मर्तुतेजोगरिष्ठा वाक् ,,
१६८ वर्षर्तुनिष्ठा संविदादिरसवर्षिष्टा वाक् ,,
१६९ शारदर्तुपदा शान्तिदावाक् शारदा १४४
१७० हेमन्तर्तुरता हैमवती वाक् ,,
१७१ शैशिरर्तु संशिता श्रेष्ठा वाक् ,,

| विषयानुक्रमणिका | | पृष्ठम् |
|---|---|---|
| १७२ | सप्तमोऽध्यर्धऋतुः एकमासात्मिका वाक् | १४४ |
| १७३ | कालात्मना मानवशासनात्मिकावाक् | १४५ |
| १७४ | देशकालाद्यतीता ब्रह्मेन्द्रात्मिका परावाक् | ,, |
| | (२१) एकविंशी कला | |
| | शारदा | |
| १७५ | तन्त्रपुराणादि प्रसिद्धा वाग्देवता | १४६ |
| १७६ | वीणादीनां तात्विकस्वरूपोपवर्णनम् | ,, |
| १७७ | शक्तिचतुष्टयतत्त्वचतुर्भुजायुधसत्त्वन् | ,, |
| १७८ | वेदब्रह्मात्मिका शारदा | १४७ |
| | (२२) द्वाविंशी कला | |
| १७९ | तन्त्रपुराणप्रसिद्धा महासरस्वती | १५२ |
| १८० | विष्णमायाद्याः चतुर्विंशतिशाकायः | ,, |
| | (२३) त्रयोविंशी कला | |
| १८१ | भगवतीतारा वाग्देवता दशमहाविद्यायां द्वितीया | १५७ |
| १८२ | अधिभूतादिकं तत्त्वत्रयम् | १५८ |
| १८३ | तान्त्रिकः तारामन्त्रः पञ्चबीजात्मकः | १५९ |
| १८४ | मध्यबीजत्रयसिद्धः नीलसरस्वतीमन्त्रः | १६१ |
| १८५ | सद्योजातस्य शिरोजिह्वायांतन्मन्त्रलेखनम् | ,, |
| १८६ | ऋषिछन्दोदेवताः | ,, |
| १८७ | सर्वेषांछन्दसां इन्द्रः परमर्षिः | ,, |
| १८८ | तारायास्तात्त्विकं स्वरूपम् | ,, |
| १८९ | तान्त्रिकं ताराध्यानस्वरूप तत्त्वम् | १६२ |
| १९० | आयुधचतुष्टयस्यतात्त्विकंस्वरूपम् | १६३ |
| १९१ | ताराप्रसादप्रार्थना | ,, |
| १९२ | अन्तिमा अभ्यर्थना | ,, |
| १९३ | वेदाङ्गनिघण्टुपठितानि सप्तपञ्चाशद् वाङ्नामानि | १६४ |
| | (२४) चतुर्विंशी कला | |
| १९४ | श्लोकः प्रथमं वाङ्नाम १ | १६७ |
| १९५ | धारा द्वितीयं ,, २ | १६६ |

विषयानुक्रमणिका | पृष्ठम्


(२५) पञ्चविंशी कला

१९६ ईला तृतीयम् वाङ्नाम ३ १७३

१९७ गौः ४ १७७

(२६) षड्विंशी कला

१९८ गौरी ५ १८३

१९९ गान्धर्वी ६ १८६

(२७) सप्तविंशी कला

२०० गभीरा ७ १९३

२०१ गम्भीरा ८ ,,

२०२ मन्द्रा ९ १९७

२०३ मन्द्राजनी १० २००

(२८) अष्टविंशी कला

२०४ वाशी ११ २०३

२०५ वाणी १२ २०५

२०६ वाणीची १३ २०६

२०७ वाण: १४ २०७

२०८ पवि: १५ २०९

२०९ भारती १६ २१०

(२९) एकोनत्रिंशी कला

२१० धमनि: १७ २१२

२११ नाळी १८ २१५

२१२ मेळि: १९ २१६

२१३ मेना २० २१८

२१४ सूर्या २१ २२१

(३०) त्रिंशी कला

२१५ सरस्वती २२ २२५

२१६ निविन् २३ २२८

२१७ स्वाहा २४ २३२

(३१) एकत्रिंशी कला

विषयनुक्रमणिका | पृष्ठम्

२१८ बग्नुः २५ २३६
२१६ उपब्दिः २६ २३७
२३० मायुः २७ २३८
२३१ काकुत् २८ २४०
२३२ जिव्हा २६ २४१
( ३२ ) द्वात्रिंशी कला
२३३ घोषः ३० २४७
२३४ स्वरः ३१ २५०
२३४ शब्दः ३२ २५२
( ३३ ) त्रयस्त्रिंशी कला
२३५ स्वनः ३३ २५७
२३६ श्लृक् ३४ २५८
२३७ होत्रा ३५ २५६
२३८ गीः ३६ २६१
२३६ गाथा ३७ २६२
२४० गणः ३८ २६३
२४१ धेना ३६ २६४
२४२ ग्नाः ४० ,,
( ३४ ) चतुस्त्रिंशी कला
२४३ विपा ४१ २६७
२४४ नना ४२ २६८
२४५ कशा ४३ २६६
२४६ धिषणा ४४ २७०
२४७ नौः ४५ २७१
( ३५ ) पञ्चत्रिंशी कला
२४८ अक्षरम् ४६ २७५
२४६ मही ४७ २७७
२५० अदितिः ४८ २७६
२५१ शची ४६ २८०

| विषयनुक्रमणिका | पुटम् |
|---|---|
| २५२ वाक् ५० | २८१ |
| ( ३६ ) षट्त्रिंशी कला | |
| २५३ अनुष्टप् ५२ | २८३ |
| २५४ धेनुः ५२ | २८४ |
| २५५ वल्गुः ५३ | १८७ |
| २५६ गल्दा ५४ | २८८ |
| २५७ सरः ५५ | २८६ |
| २५८ सुपर्णी ५६ | २६० |
| २५६ वेकुः ( वेकुरिः, वेकुरयः ) ५७ | २६१ |

ई ॐ श्रीः

॥ श्रीदैवरात-ऋषिकुल-योगाश्रमः-गोकर्णः ॥

॥ ॐ भद्रं नो अपि वातय मनः ॥

# ॥ वाक्सुधा ॥

## ॥ दैवरातीया ॥

### ॥ आद्यं मङ्गलं पद्यम् ॥

“श्रीमद्”-भारत-भूमिमण्डलतले स्वानन्दसन्धायिनी
संविद्-भाव-कृति-प्रचेतनकलास्वारस्यसन्दोहिनी ॥
नाद-ब्रह्म-सदन्तरा-ऽभयकरा पूर्णात्मवाग्देवता
विश्वस्मिन्निह “वाक्सुधां” वितरतात् पूर्णानुभावोदिता ॥

## ॥ प्रथमा कला ॥

### ॥ पूर्णं परमं ब्रह्म ॥

"पूर्णं ब्रह्म परोक्षमेव सततं तत् केवलं चेतनं
प्रत्यक्षं प्रतिरूपसत्त्वविततं सद् विश्वरूपायनम् ॥
अध्यात्मं तु सचेतनान्तरमहच्चित्याऽपरोक्षं स्वयं
यावद् ब्रह्म ततं तदन्वयपरा वाक् तावती सा परा ॥ १ ॥

### ॥ पूर्णब्रह्मात्मिका वाक् ॥

"वाक्" पूर्णा परमात्मनो भगवती शक्तिः परा देवता
प्राक् सृष्टेरपि तस्य सामरसतत्तादात्म्यसत्त्वान्विता ॥
वेद्या वाचकशक्तिरात्मलसिता हृद्याऽनुबाध्याऽऽहिता
साक्षाद् ब्रह्म परापरात्मकचिता सच्छन्दसा संहिता ॥ २ ॥

वेदात्मा परमा रस-स्वरवती वाग् ब्रह्मसञ्चोदनी
विद्यात्मा परमार्थदाऽत्र भवती ब्रह्मात्महृद्योगिनी ॥
विज्ञानामृतवर्षिणी ऋतवती ज्योतिस्स्वरूपाऽक्षरा
विश्वस्यैव हितेऽस्तु सर्वजनतानन्दाभिवृध्द्यै स्वरा ॥ ३ ॥

ब्रह्मात्मा चितिवाङ्मुखाच्छ्वसनतो विश्वं ससर्ज स्वयं
ब्रह्मण्यं प्रतिवाच्य-वाचकचितेस्तत्त्वत्रयैकान्वयम् ॥
संज्ञारूपगुणक्रियादिनिचितं तद् ब्रह्मसत्याक्षरैः
प्रज्ञानाञ्चितबिन्दुपूर्णमुचितं सद् ब्रह्मसंवित्स्वरैः ॥ ४ ॥

## ॥ ऋङ्मन्त्रः ॥

यद् वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयाँसि क्व स्विदस्याः परमं जगाम ॥

( नेमो भार्गवः ) ( ऋ० सं० ८ । १०० । १० )

## ॥ पद पाठः ॥

यत् । वाक् । वदन्ती । अविऽचेतनानि ।
राष्ट्री । देवानां । नि । ससाद । मन्द्रा ॥
चतस्रः । ऊर्जं । दुदुहे । पयाँसि ।
क्व । स्वित् । अस्याः । परमं । जगाम ॥

## ॥ वाक्सुधा ॥

दैवी वार्गविचेतनानि सहसा यद् वै वदन्ती सती
देवानां परचेतनात्ममहसां राष्ट्रीश्वरी शासती ।
वाच्यानि प्रतिवाचकाक्षररसाद् भूतानि सन्तन्वती
चिद्योगान्निषसाद दिव्यमहसा सत्त्वेन साऽऽत्मन्वती ॥ ५ ॥

मन्द्रा सा मदकृत् प्रहर्षरसदा दिव्यात्मशक्तिप्रदा
सेन्द्रात्मा प्रतिवाक् प्रचेतयति ताः शक्तीश्चतस्रोऽर्थदाः ॥
सर्वेषां दुदुहे बलं सुमनसं सञ्जीवनं सद्रसं
तस्याः पूर्णपदं किमस्ति परमं क्वस्विज्जगामोत्तमम् ॥ ६ ॥

ब्रह्मैवात्र चिदात्मकं हि परमं व्योमैव वाचः पदं
ब्रह्मात्मोर्जितवाग्रसस्वरसमं तत् सर्वभूतास्पदम् ॥
सेन्द्रात्मा पुरुषः समः स परमो वाग्ब्रह्मणः सन्-पतिः
वाचाऽनु स्वरति स्वरे रसपरे सम्राजते चित्पतिः ॥ ७ ॥

भूतान्येवमचेतनानि सकलान्यासाद्य वाक् छक्तितः
वाच्यान्येव चकार चित्तिकलया तन्नामरूपोक्तितः ॥
चिद्रूपा निजसंविदात्मपुरुषे सद्बिन्दुरूपे विभौ
व्याप्ता विश्वविभूतियोगमहसा वाग् विश्वरूपा बभौ ॥ ८ ॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥

( ऋ० मं० ८।१००।११ )

## ॥ पद पाठः ॥

देवीं । वाचं । अजनयन्त । देवाः ।
तां । विश्वऽरूपाः । पशवः वदन्ति ।
सा । नः । मन्द्रा । इषं । ऊर्जं । दुहाना ।
धेनुः । वाक् । अस्मान् उप । सुऽस्तुता । एतु ॥

## ॥ वाक्सुधा ॥

देवी वाचमनाद्यनन्तनिनदां व्यौमैकतन्मात्रकां
दिव्यां वाचकशक्तिसत्त्वविशदां वाच्यार्थ-लक्ष्यार्थकाम् ॥
देवेष्वन्तरितां प्रचेतनपरां ज्योतीरसैकाक्षरां
देवास्तेऽजनयन्त संविदुदये सर्वज्ञकल्पां स्वराम् ॥ ९ ॥

वाचं देवकृतस्वरानुकरणाच्छ्रुत्वा विदोच्चारितां
तामेवानुवदन्ति सर्वपशवस्ते विश्वरूपा इमे ॥
ज्ञानानां ग्रहणे तथाऽनुकरणे तेषां प्रदाने पुनः
ज्ञातानां वचने तथाऽनुचरणे वाक् सा शरण्याऽऽत्मनः ॥ १० ॥

सा नो वाक् परसंविदाऽऽत्ममहसा मन्द्रा प्रहर्षप्रदा
साऽन्नं प्राणन-जीवनादिकरणं सत्त्वं दधाना सदा ॥
सा वाग् धेनुरियं समूर्जति रसं कामं दुहानाऽऽश्रिता
स्वानन्दादिरसात्मिका समरसा सा वेदवाचाऽऽश्रुता ॥ ११ ॥

वाचां तैजस-सद्रस-स्वरचितां बीजं भवेदक्षरं
वाच्यार्थान्वितमेव नित्यमुदितं पूर्व्यं समस्मात् परम् ॥
रुद्रादभ्युदियाय चित्तिडमरोराद्यं समाम्नायकं
भद्रं भूमितले सुसंविदुदये तत् सर्वभाषात्मकम् ॥ १२ ॥

कस्मिन् ब्रह्मपरे पराक्षरसमाम्नायेऽखिलार्थान्वये
तस्मिन् विश्वपदं प्रतिष्ठितमिदं सर्वार्थभाषामये ॥
सर्वैर्देवमुखैर्नृभिश्च पशुभिर्भाषा च योच्चार्यते
सर्वत्रापि तदक्षरानुकरणात् सा देववाणीर्यते ॥ १३ ॥

प्राञ्चस्ते ऋषयः समाधिनिरता वाचः सुमूलं जगुः
प्राक् सृष्टेरपि संस्थितां स्वरवतीं छन्दस्वतीं शुश्रुवुः ॥
प्राधान्यात् स्वररूपिणीं श्रुतिमतीं वाचैव तां तुष्टुवुः
प्रामाण्यात् प्रथमां सुसंविदुदये स्वां भावयन्तो विदुः ॥ १४ ॥

## ॥ भाषामञ्जरी ॥

वागेवात्र समस्तवस्तुविषये भाषा सुसंवित्प्रदा
वाच्यार्थादिविचारसद्विनिमये सत् साधनं तद्विदाम् ॥
विश्वस्मिन् व्यवहारसिद्धिकृतये वेद्याऽखिलार्थप्रदा
विश्वासाद् भुवि सर्वसत्त्वधृतये सेव्या समर्था सदा ॥ १५ ॥

भाषा वाङ्मुखतोऽक्षरादिमुखतः सा सर्ववर्णाश्रयात्
सर्वज्ञानकृते च वस्तुविषये प्रज्ञादिसत्त्वोदयात् ॥

सा सर्वार्थगुणक्रियादिविषयज्ञानोपदेशादिके
स्यात् सर्वं व्यवहारसाधकतमा वाग् वैदिके लौकिके ॥ १६ ॥

वर्णानां वचने स्वरानुकरणे स्थानानि विद्यादुरो
वक्त्रेऽन्तर्हितकण्ठतालुरसनादन्तोष्ठमूर्ध्वं शिरः ॥
कण्ठोष्ठं खलु कण्ठतालु युगलं दन्तोष्ठमान्तरं
जिह्वामूल-सुतालुमूलयुगलं द्वारं तु नासान्तरम् ॥ १७ ॥

एते सार्थसमस्तसुस्वरयुतास्ते ह्रस्व-दीर्घ-प्लुताः
सर्वे पूर्णकलान्विताः परिमिता वर्णाश्चतुःषष्टिकाः ॥
भाषाणामिह देव-दानव-नृणां तत्संस्कृते प्राकृते
सर्वासामपि सङ्ग्रहे नियमिताः वेदेऽनुभावोदिते ॥ १८ ॥

रुद्राद् वैद्युतनादशक्तिडमरोर्जातेऽर्थसद्वाचके
सूत्रेष्वेव चतुर्दशस्वइउणेत्यादौ हलन्तेऽक्षरे ॥
तत्सर्वाक्षरमूलबीजगुणिना युक्तं शिरोबिन्दुना
पूर्णात्मार्थकसर्ववाक्परमहं सर्वार्थबोधावहम् ॥ १९ ॥

ह्रस्वा दीर्घयुताः प्लुताश्च मिलिता द्वाविंशतिस्ते स्वराः
सानुस्वार-विसर्गकावपि यमाः ≍क ≍पौ च दुस्पृष्टळः ॥
स्पर्शानामपि पञ्चविंशतिपरास्ते यादयोऽष्टौ मिताः
सेयं पूर्णकलान्विताऽखिलशिरोधार्याऽक्षमाला मता ॥ २० ॥

सर्वेषां पशुपक्षिणामपि नृणां प्रज्ञावतां प्राणिनां
भाषाणां वचने स्वारानुकरणे वीणादितन्त्रीस्वने ॥
वाद्ये वादनतः स्वरे श्वसनतश्छन्दस्सु तद्गायने
सङ्केतेन समासतो नियमिता वर्णाश्चतुःषष्टिकाः ॥ २१ ॥

वक्त्रेऽन्तःप्रति संस्थितैः सुनियतैः स्थानैश्च कण्ठादिभिः
वर्णोच्चारणमत्र यावदुचितं तद् वेदशास्त्रादिभिः ॥
यावत् कल्पयितुं च शक्यमखिलं तावत् पुरा कल्पितं
शिक्षा-व्याकरणादिशास्त्रमुखतः सर्वानुभावोदितम् ॥ २२ ॥

एवं निर्णयतः सुशास्त्रविहिताद् भूयश्चतुः षष्टितो
वर्णेभ्योऽप्यधिकाक्षरादिकथने विज्ञान-योगादितः ॥
स्वेष्टं चेदिह संस्कृतेऽपि सकले भाषान्तरे प्राकृते
सम्पाद्यं पृथगिन्द्रियान्तरमपि स्यान्नूतनाविष्कृतेः ॥ २३ ॥

प्रायः प्राकृतवाङ्मये क्वचिदभिप्रायश्चवर्गाक्षरं
पार्थक्येन हि तालु-दन्त-रसनायोगोदितं श्रूयते ॥
तत्रापीष्टमदोऽक्षरं न तु पृथङ् नो स्यात् तदर्थान्तरं
वर्णोच्चारणतो विशेष उदितो यद्वल्लकारेऽपरे ॥ २४ ॥

तस्मादेव समग्रभूतलगतास्वन्यासु भाषास्वपि
प्रत्नास्तेऽत्र भवन्ति वाचि सकलास्ते देववाणीमुखे ॥
नातः कल्पयितुं हि शक्यमपरं नाप्यस्ति तत् कल्पितं
भाषा-वाङ्मयमक्षरस्वरकलापूर्णं चतुःषष्टिकम् ॥ २५ ॥

वर्णानामुपदेशतः श्रवणतस्तत्तत्स्वराद्याश्रयात्
तत्रान्योच्चरित-श्रुतानुकरणाद् वाचाऽक्षराण्युच्चरेत् ॥
नो चेत् तल्लिखिताक्षरादिपठने स्यादेव सोऽपस्वरः
षड्जादिस्वरपाठवत् प्रकृतितो भूयोऽप्यनर्थाक्षरः ॥ २६ ॥

षड्जादिस्वरनाममात्रविदिताः सप्त प्रसिद्धाः स्वराः
पश्वादेर्मुखतः स्वरानुकरणादुच्चारणीयाः समाः ॥

षड्जो व्याघ्ररुतोपमः प्रथमतो मन्द्रः स हार्दः स्वरः
स्यात् प्रातः सवनीय औषसरसैः शान्तः स सौम्याक्षरः ॥ २७ ॥

मध्ये सप्तसु मध्यमः प्रमितितो मध्यन्दिने कण्ठगो
गम्भीरस्तरुणः प्रभास्वरचितो यश्चक्रवाकानुगः ॥
तार्तीये सवनेऽपराह्णसमये वृद्धः स तारः स्वरः
मूर्धन्यः स मयूर-हंसनिनदः स्यात् पञ्चमाद्यस्त्रिकः ॥ २८ ॥

प्राक् सृष्टेरपि नामशेषकलितां तां व्योमवर्णीं यथा
दिग्-व्योमात्मककर्णतोऽप्यशृणवं छन्दोमयीं तां तथा ॥
तस्माद्वै श्रुतिरेव साऽभवदिति श्रोत्रेण संश्रूयते
सा वाक्-कर्णपरम्परोर्मिकलया सर्वैः समाश्रीयते ॥ २९ ॥

प्रत्यक्षं प्रथितं प्रमाणपरकं जीवात्मनो धीन्द्रियं
श्रोत्रं त्वङ् नयनं तथा च रसना घ्राणं मनो बुद्धिकम् ॥
प्राग्वृत्त्याऽभ्युदितं प्रवृत्तिमुखगं संवित्परं सप्तकं
शब्दादौ खलु पञ्चके स्वविषये ज्ञानादिसङ्ग्राहकम् ॥ ३० ॥

आत्मन्यन्तरिताऽऽत्मना चितिपरा वाक् संविदानाऽष्टमी
प्राणैः सन्निहिता समानसदना तैर्नानुषक्ता समैः ॥
ज्ञानानां च बहिः प्रकाशनकृते सर्वत्र संविद्यते
वागेकं शरणं चिदात्मकरणं सर्वार्थदाऽऽवेद्यते ॥ ३१ ॥

प्रत्यञ्चि प्रथमा पराऽऽन्तरतमा संवित्परा चिन्मयी
प्राणानामपि सप्तकात् त्वपरतमा ज्ञानेन्द्रियेष्वष्टमी ॥
प्राग्वृत्याऽऽत्त्याहिता तुरीयपदभाक् कर्मेन्द्रिये वैखरी
प्रत्यक्षाक्षरसुस्वरानुवचनात् कर्णेन वाक् श्रूयताम् ॥ ३२ ॥

॥ इति प्रथमा कला सम्पूर्णा ॥

वेदवाङ् निनादिता प्रकर्षदाऽनुवाद्यतां
देववाङ् निवेदिता प्रहर्षदा निवेद्यताम् ॥
दैवतेन्द्रवर्षिता स्वरार्थदा समास्यतां
"दैवरातवाक्सुधा" रसप्रदा सुसेव्यताम् ॥ १ ॥

# ॥ द्वितीया कला ॥

३३ सद्योजातशिशोः शुभे श्रुतिमुखे तज्जातकर्मान्तरे
"वाग्" वागित्युपदिश्यते श्रुतिविधेर्वागर्थसंवित्तये ॥
वेद्यात्मा श्रुतिसंविदात्मपरवाग् विद्या त्रयी सत्तमा
तस्मिन् संविशतादिति श्रुतिमुखात् सद्यः सुभाव्योत्तमा ॥ १ ॥

३४ सद्योजातशिशुस्तदाद्यनुल्वं सर्वार्थहृत्संस्कृतेः
गृह्णाति प्रतिबिम्बवत् प्रकृतितः स्वच्छात्मबुघ्याऽऽश्रुतेः ॥
यद् यद् वै स शृणोति वा रसयति प्रत्यक्षमेवेक्षते
सर्वस्मिन् विषये स्वयं प्रयतते तस्यानुकृत्याऽऽततेः ॥ २ ॥

३५ अज्ञं बालमिमं सुसंस्कृतिमुखात् सं सेवमानः पिता
सुज्ञं संप्रतिभावयन् प्रतिपदं रक्षन् विदा वर्धयन् ॥
वाग्-विद्या-गुण-कर्मशिक्षणमुखात् प्राज्ञं सुसम्पादयन्
अन्ते तं भुवि बाल्भावमुदितं कर्तुं यतेतात्मवान् ॥ ३ ॥

## ॥ मातृभाषा ॥

३६ मातुः सन्मुखतः सृतं स्वरपदं श्रोत्रेण शृण्वन् त्सदा
स्वान्तः सन्मनसाऽऽत्मनि प्रतिपदं गृह्णन् स तन्मात्रया ॥
वाचाऽप्यन्तरनुश्रुतानुकरणान्नित्यं तदुच्चारणे
वेद्यार्थे यततेऽखिलैः स्वकरणैः सर्वार्थसन्धारणे ॥ ४ ॥

३७ बालो मातृवचःश्रुतेरनुकृतेर्वाचं च यामुच्चरेत्
मातुः सन्ततसन्निधेः समुदिता सा मातृभाषोच्यते ॥
शुद्धाशुद्धमयी ऋतानृतमयी सा मानवी वाङ्मयी
सत्सङ्केतपरार्थबोधनियता तस्यादिभाषा मता ॥ ५ ॥

३८ बालस्तन्निजभाषया व्यवहरन् विद्यादिसच्छिक्षणे
ज्ञानादेर्ग्रहणे कृतानुकरणे तत्सम्प्रदानेक्षणे ॥
शक्नोत्येव स सर्वथा भुवि नरस्तन्मातृभाषामुखाद्
ध्येयं साधयितुं स्वयं प्रतिभवेत् सर्वत्र भाषान्तरे ॥ ६ ॥

३९ तद्भाषान्तरशिक्षणं सुनियतं तन्मातृभाषाङ्कितं
सर्वेषां सकलार्थसाधनपरा भाषैव सा हार्दिकी ॥
विद्याभ्यासकृते समस्तविषये हार्दैकभाषामुखात्
सर्वार्थग्रहणं स्वसंविदुदये भाषान्तरादेर्मुखात् ॥ ७ ॥

## ॥ लिपिकल्पना ॥

### ॥ ऋङ्मन्त्रः ॥

यां पूषन् ब्रह्मचोदनीमारां बिभर्ष्याघृणे ।
तया समस्य हृदयमारिख किकिराकृणु ॥

( बार्हस्पत्यो भरद्वाजः ) ( ऋ० मं० ६ । ५३ । ८ )

### ॥ पदपाठः ॥

यां । पूषन् । ब्रह्मऽचोदनीं । आरां । बिभर्षि । आघृणे ॥
तया । समस्य । हृदयं । आ । रिख । किकिः । आ । कृणु ॥

४० यां पूषन् चितिसंशितां सुमनसां स्वां ब्रह्मसञ्चोदनीं
वागग्रां चितिवज्रवैद्युतमुखामारां बिभर्षि स्वयम् ॥
चिद्योगेन तया ममास्य हृदयं सर्वस्य च प्राणिनः
चिच्छक्त्याऽखिलरेखयाऽऽत्ममहसा ज्ञानात् प्रकाश्यं कुरु ॥ ८ ॥

४१ प्रज्ञानोदयसम्पदे श्रुतिमुखे या वागुपादिश्यते
प्रत्यक्षि श्रवणात् प्रविश्य हृदयं सा ब्रह्मसञ्चोदिनी ॥

प्राप्ताऽन्तर्हृदि लेखनाल्लिपिकृतेः सत्त्वेन वाङ् मुद्रणात्
प्रज्ञानं जनयत्यलं श्रुतिमतां हृल्लेखया कर्षणात् ॥ ९ ॥

४२ प्रत्यक्षाऽऽकृतिकल्पिता लिपिमुखा रेखादिरूपाक्षरा
प्रत्यक्षात् प्रतिदर्शनेन पठितुं योग्या बभौ सा स्वरा ॥
प्रायस्ता लिपयोऽभवन् बहुविधाः सङ्केतरेखोत्तराः
प्राप्या वागिह शब्दशक्तिनियता सैका स्वरात्माक्षरा ॥ १० ॥

४३ तद्वाचश्चिरकालसंस्थितिकृते स्वोच्चारितायाः पुनः
दूरे प्रेषणतः प्रकाशनकृते युक्तप्रचारादिना ॥
प्रत्यक्षात्मकसत्प्रमाणमुखतः सर्वत्र संस्थापने
प्रत्यक्षोदितरेखयाऽक्षरपरा पश्चाल्लिपेः कल्पना ॥ ११ ॥

## ॥ अक्षरारम्भः ॥

४४ विद्यारम्भकृतौ ततः प्रथमतस्तत्राक्षरारम्भके
बालानां निजहस्ततो लिपिमुखात् स्यादक्षरोल्लेखनम् ॥
वर्णोल्लेखनपूर्वकानुवचनं सर्वैः समारभ्यते
सिद्धं तत् प्रणवाक्षरेण नमसा श्रीमद्गणेशादितः ॥ १२ ॥

४५ वाचस्तत्प्रतिनामरूपवचने तत्त्वे समेऽप्यास्थिते
भाषाणां प्रविभेदतः पुनरिह प्राप्ता लिपेर्भिन्नता ॥
सर्वत्रापि समानमेव नियतं नामादिकं सस्वरं
प्रत्नं तत्र पृथक् पृथक् परिणतं तत्प्रत्ययाद्यन्वयम् ॥ १३ ॥

## ॥ संस्कृतभाषा ॥

४६ नृणां याऽखिलभूतले निवसतां सर्वासु भाषास्वपि
प्रत्ना सेयमनाद्यनन्तवितता स्याद् वेदभाषा परा ॥

सृष्टेः पूर्वमपि स्थिता स्वरुतमा सा दैवभाषाऽऽदिमा
सर्वासामजरामरा परतमा सा मातृभाषोत्तमा ॥ १४ ॥

४७ पूर्वा व्याकरणादिशास्त्रनियमाद् वेदाङ्गसत्त्वोन्मुखा
सर्वार्थेषु सुसंस्कृतेः सुविशदा भाषा श्रुता संस्कृता ॥
प्राक् सृष्टेरपि नामशेषवितता नित्यैकसत्याक्षरा
सङ्केतेन निसर्गशक्तिनियता सर्वार्थसंवित्परा ॥ १५ ॥

४८ वेदव्याकरणोन्मुखात् प्रथमतः सा पाणिनेः संस्कृता
वेद्या वैदिकसंस्कृतादिवचसां सूच्चारणा शिक्षिता ॥
भूयस्तत्त्वविमर्शनेन सुचिरादाद्यात् समाम्नायकात्
सूक्ष्मार्थेन समुद्धताः सुकृतिना वर्णाश्चतुः षष्टिकाः ॥ १६ ॥

४९ वेदे विश्वविभूतिपूर्णमुदितं यावत् सुविज्ञानदं
मन्त्र-ब्राह्मणरूपवाग्रसनिधौ सत्त्वं समस्तार्थदम् ॥
तावन्नास्ति हि वाङ्मयेऽपि निखिले तत् कल्पनातीतगं
नेतः कल्पयितुं च शक्यमखिलैर्वेद्यं गभीरार्थकम् ॥ १७ ॥

५० एतैः पूर्णकलापरैः श्रुतिनुतैर्वर्णैश्चतुःषष्टिकैः
न्यूनाः प्राकृत-संस्कृतप्रभृतयो भाषास्त्वपूर्णाक्षराः ॥
तद्भाषान्तरवाङ्मये तु निखिलं तद्वेदमन्त्राक्षरं
वक्तुं सँलिखितुं न शक्यमुदितं छन्दोमयं सस्वरम् ॥ १८ ॥

## ॥ प्राकृतभाषा ॥

५१ सन्मूलप्रकृतिस्वरूपमुखतो वेदोक्तमन्त्रोन्मुखैः
सत्सङ्केतहितैरनादिनियतैः शब्दैश्च तैः संस्कृतैः ॥
किञ्चित् किञ्चिदुपात्तवर्णविकृतेः स्वस्वप्रकृत्या समं
लोके तत् प्रकृतं प्रवृत्तमखिलं तन्मानवैराकृतम् ॥ १९ ॥

## ॥ प्रादेशिकी भाषा ॥

५२ तस्मात् प्राकृतमुच्यतेऽनुवचनं मानुष्यभाषात्मकं
प्रायः स्वस्वगुणैर्मतिप्रगतितो भूयः प्रकर्षाकृतम् ॥
विस्तीर्णा विविधैर्जनाङ्गवचनैर्देशे विदेशेषु या
भाषा सैव ततोऽभवत् प्रचलिता प्रादेशिकी सान्वया ॥ २० ॥

## ॥ राष्ट्रभाषा ॥

५३ या राष्ट्रेष्वपि तत्र तत्र सकलेष्वर्थेषु वा स्वीकृता
प्रायः साऽखिलराजकीयविषये सर्वार्थसंसाधिका ॥
सा सर्वव्यवहारसिद्धिकृतये राष्ट्रीयभाषात्मिका
सर्वेषामुपकारिका बहुमता राष्ट्रैकसञ्चालिका ॥ २१ ॥

५४ प्रत्नो मानवजातिमूलपुरुषो मान्यो महर्षिर्मनुः
प्राज्ञो मन्त्रदृगेव सोऽयमुदगान् सन्नादिमो मानवः ॥
भूमौ तद्धृदयोनिजास्तु पुरुषाः सप्तर्षयोऽन्याः स्त्रियः
सृष्टेरादिपदे परप्रकृतयः प्रादुर्बभूवुः समाः ॥ २२ ॥

५५ तेषां वगिहमूलतः समुदगात् सा वेदभाषाऽऽदिमा
पश्चात् सद्व्यवहारनिर्वहणकृत् तैः संस्कृता सत्तमा ॥
सैवाद्यापि सदाऽवनौ प्रचलिता स्याद् देवभाषा समा
सर्वेषामिह भाषिकादिवचसां माता प्रमाणोत्तमा ॥ २३ ॥

५६ अद्यत्वेऽपि समग्रभूतलपदे भाषासु सर्वत्र या
सद्व्याप्तेरनुवर्तनात् सममनुस्यूता सुसूक्ष्मान्वयात् ॥
धात्वर्थोदितनामशब्दकृतिभिः सा देववाक् संस्कृता
प्राधान्यात् स्वयमर्हति प्रकृतितः सा विश्वभाषात्मताम् ॥ २४ ॥

॥ वाचः सप्तसङ्केतात्मिका लिपिः ॥

## ॥ ऋङ्मन्त्रः ॥

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषुप्रविष्टाम् ॥
तामाभृत्या व्यदधुः पुरुत्रा तां सप्तरेभा अभिसन्नवन्ते ॥

( बृहस्पतिः ) ( ऋ० मं० १०। ७१। ३ )

## ॥ पदपाठः ॥

यज्ञेन । वाचः । पदवीयं । आयन् । तां ।
अनु । अविन्दन् । ऋषिषु । प्रऽविष्टाम् ॥
तां । आऽभृत्य । वि । अदधुः । पुरुऽत्रा ।
तां । सप्त । रेभाः । अभि । सं । नवन्ते ॥

५७ यज्ञेनान्तरसंयमेन तपसा प्राज्ञाश्च पूर्वर्षयः
सद् ब्रह्मैव हि विश्वकारणपरं वाचः पदं तज्जगुः ॥
तस्मिन् ब्रह्मपरे पदे च परमे व्योमन्युपान्तर्हिताः
तेष्वन्तर्ऋषिषु स्वयं प्रविविशुस्ता ब्रह्मवाचः समाः ॥ २५ ॥

५८ प्राज्ञेष्वन्तरितां हृदन्तरुदितां छन्दस्वतीं चित्स्वरां
प्रज्ञानात्मकसन्दृशैव ददृशुर्वाचं स्वसंवित्पराम् ॥
तेषामेव मुखादुपाप्य बहुधा भावाय तां सन्दधुः
तामेवानुययुश्च सप्तमुखतो रेभाश्च साङ्केतिकाः ॥ २६ ॥

५९ रेभास्ते पुनरप्रसिद्धवचनाः संशोधनावृत्तिकाः
सत्यासत्यविमर्शनार्थनयनाः सौम्या मनः सत्त्वकाः ॥
सङ्केतार्थकरूपकालिपिमुखाल्लक्ष्यार्थसंवित्प्रदाः
प्रत्यक्षाकृतिरूपतो विरचिता भूयो रहस्यार्थदाः ॥ २७ ॥

६० सोमः सन्मनसो महानधिपतिः सर्वार्थसंशोधकः
सत्त्वात्मा सदसद्विमर्शनमतेः सिद्धः सुसन्दृक् स्वयम् ॥
सोऽस्येत्यत्र पवित्रमान्तरदृशा रेभन् त्सुसंशोधयन्
सुज्ञानार्थपरायणाः सुविशदा रेभाः सुशुद्धा धियः ॥ २८ ॥

६१ आद्यं बिन्दुपदं पराणुकलया पूर्णं विरामात्मकं
रेखाङ्काक्षरचित्रवर्णलिपिभिः स्यान्मुद्रया सप्तकम् ॥
वाच्येवान्तरितानि तानि सकलैस्तत्त्वैः समर्थार्थकैः
वाच्यार्थप्रतिवेदिका स्वरमयी वाक् सप्तसङ्केतिका ॥ २९ ॥

६२ नीरूपाऽपि च वाक् स्वयं स्वरपरा नामात्मिका साऽक्षरा
चिज्ज्योतिर्मयरूपिणी परचिता व्योमैकसत्त्वोत्तरा ॥
सर्वात्मन्यपि वाचका सुनिनदा सक्ता परस्मिन् विभौ
सा साङ्केतिकसप्तकात् समुदिता वाग् विश्वरूपा बभौ ॥ ३० ॥

६३ वाग् वै साऽखिलनामरूपकलया पूर्णा (ऽऽ)त्मचिद्योगतः
विश्वं व्याप्य परेण दिव्यमहसा प्रज्ञानचिद्भागतः ॥
वेदात्माऽखिलसंविदात्मतपसा साक्षात् परोक्षात् स्थिता
विद्यात्माऽप्यपरोक्षतो विजयते पूर्णात्मवाग् देवता ॥ ३१ ॥

६४ तस्माद् यद्यदिहोच्यतेऽनुवचनाद् यद्यत्पुनर्दृश्यते
यस्माद् वागनुभाव्यते सुमनसा यद्यत् प्रतिश्रूयते ॥
सर्वस्मिन्नपि सत्समन्वयमुखात् तादात्म्ययोगार्जितं
सर्वं वाचक-वाच्यवस्तुविभवं तद्वाच एवोर्जितम् ॥ ३२ ॥

॥ इति द्वितीया कला सम्पूर्णा ॥

अक्षरादिमातृका समस्तवस्तुसूचिका
ऽध्यक्षरात्मकाधिदैवसत्यवस्तुवाचिका ॥
साक्षिणश्चिदात्मनः प्रकाशिका प्रपाचिका
साक्षिणीह दैवरातवाक्परा प्रमोचिका ॥ २ ॥

## ॥ तृतीया वाक्तत्त्वकला ॥

### ॥ ऋङ्मन्त्रः ॥

स॒ह॒स्र॒धा पञ्च॒द॒शान्यु॒क्था याव॒द् द्यावा॑पृथि॒वी ताव॒दित्तत् ॥
स॒ह॒स्र॒धा म॑हि॒मानः॑ स॒ह॒स्रं याव॒द् ब्रह्म॒ विष्ठि॑तं ताव॑ती॒ वाक् ॥

(वैरूपः ऋषिः) (ऋ० मं० १० । ११४ । ८)

### ॥ पदपाठः ॥

स॒ह॒स्र॒ऽधा । प॒ञ्च॒ऽद॒शानि॑ । उ॒क्था ।
याव॑त् । द्यावा॑पृथि॒वी इति॑ । ताव॑त् । इत् । तत् ॥
स॒ह॒स्र॒ऽधा । म॒हि॒मानः॑ । स॒ह॒स्रं ।
याव॑त् । ब्रह्म॑ । विऽस्थि॑तं । ताव॑ती । वाक् ॥

६५ "वाग्" ब्रह्मेन्द्रचिदात्मपूरुषचितिः शक्तिः परा वाचका
वाच्यार्थेन निजात्मना समरसात् सिद्धा समानात्मिका ॥
ब्रह्मात्मेन्द्रवदेव सा पुरुषवत् पूर्णा तथा वाक्प्रथा
साक्षाद् ब्रह्म चिदात्मिका च पुरुषी वाग् राजते सर्वथा ॥ १ ॥

६६ ब्रह्मण्येव सहस्रधा सुविततेः श्रेष्ठानि विश्वात्मना
तत्त्वैः पञ्चदशानि तानि विविदुस्तच्छोडशैकात्मना ॥
यावद् ब्रह्म तदास्थितं निजचिता वाक् तावती स्वस्वना
तस्माद् विश्वविभूतियोगविततिर्वाग्ब्रह्मणोः स्यात् समा ॥ २ ॥

६७ तस्यैवास्ति सहस्रशः सुमुदितं शीर्षं शरीरात्मकम्
दृक्छक्तेरपि चक्षुरन्तरुदितं गत्या च पादात्मकम् ॥

स्वां भूमिं प्रतिमात्रयाऽऽत्मनिचितां वाचं च विश्वात्मिकां
सोऽभिव्याप्य ततोऽप्यतीत्य पुरुषः पूर्णोऽधितस्थौ स्वयम् ॥ ३ ॥

६८ सत्येनोर्जति विश्वतः प्रतिमुखः सन् विश्वचक्षुः पुमान्
सत्त्वेनेन्द्रबलक्रियाचितिपरः सन् विश्वबाहुर्महान् ॥
सन्तत्याऽतति विश्वपात् प्रगत्तिः सन् विश्ववेत्ता भवान्
सन्निच्छाकृतितो धमत्यनुपदं विश्वं स्ववाचोत्सृजन् ॥ ४ ॥

## ॥ ऋङ्मन्त्रः ॥

ब्रह्मणस्पतिरेता सङ्कर्मार इवाधमत् ॥
देवानां पूर्व्ये युगेऽसतः सदजायत ॥

( बृहस्पतिः ) ( ऋ० मं० १० । ७२ । २ )

## ॥ पदपाठः ॥

ब्रह्मणः । पतिः । एता । सं । कर्मारःऽइव । अधमत् ॥
देवानां । पूर्व्ये । युगे । असतः । सत् । अजायत ॥

६९ ब्रह्मात्मा परमः स पूर्णपुरुषो वागब्रह्मणः सत्पतिः
चिच्छक्तेरधमन्मनोऽसुमहसा कर्मारवत् फूत्कृतेः ॥
यत्तत्रासदिवैव सिद्धमखिलं प्रादुर्बभूवेह सत्
तन्मात्रात्मकयोनिरात्मचितिभूर्वागेव सा नादभूः ॥ ६ ॥

## ॥ पूर्णात्मिका वाक् ॥

७० पूर्णात्मन्युपसंहिता स्वपुरुषे वाक् चेतनात्मा परा
पूर्णे बिन्दुपदे चिदग्रपुरुषे चिज्ज्योतिरग्राऽक्षरा ॥
प्राक् सृष्टेः परमात्मनश्चितिमुखाद् विद्युत्सुतीक्ष्णा क्षुरा
प्रागूर्ध्वाऽभ्युदियाय सा ऽनलमुखा संवित्सुसत्त्वाक्षरा ॥ ६ ॥

७१ तस्मादेव हि वाङ्मुखात् समुदगादग्निः स सेद्राननः
सर्वेषां मुखमाविवेश महसा वागेव भूत्वा पुनः ॥
वागेवाग्निरिति श्रुतः स पुरुषो वाच्यः स्वचित्त्योज्ज्वलो
वाच्या वाचकशक्तिरेव पुरुषी ज्योतिस्स्वरूपोज्ज्वला ॥ ७ ॥

७२ साऽऽग्नेयी प्रथिताऽत्र तत्रभवती वाग् देवतेन्द्रानना
साऽग्नायी प्रथमा सती भगवती प्राग्दैवतैद्रायना ॥
सा वाचस्पतये रस-स्वरवती स्वाहाऽग्नयेऽध्यर्पिता
स्वाहेन्द्राय चिदात्मने भगवते तस्मै शचीत्यर्चिता ॥ ८ ॥

७३ सेन्द्राणीह सतीन्द्रचित्सुमहसा ज्योतिष्मती वैद्युती
सावित्री च सरस्वती रसवतः सूर्यस्य सा वैष्णवी ॥
सोमात्मा वरुणान्यसौ रसवती सा वैश्वदेवीज्यते
प्राणात्मा च मरुत्वती विजयते वाग् विश्वरूपायते ॥ ९ ॥

॥ तत्त्वत्रयात्मकः परमःपुरुषः ॥

## ॥ ऋङ्मन्त्रः ॥

पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ॥
उतामृतत्वस्येशानो यदन्नेनाति रोहति ॥

( नारायणः ) ( ऋ० मं० १० । ९० । २ )

## ॥ पदपाठः ॥

पुरुषः । एव । इदं । सर्वं । यत् । भूतं । यत् । च । भव्यम् ॥
तउ । अमृतत्वस्य । ईशानः । यत् । अन्नेन । अति । रोहति ॥

७४ पूर्णः सन् पुरुषो गुणेन परमो भूतं च भव्यं भवत्
प्राप्तो विश्वमचेतनं जगदिदं सन् विश्वरूपोऽभवत् ॥
ईशानोऽप्यमृतत्वपूर्णपदभाक् सञ्चेतनात्मा स्वयं
सोऽन्नाद्येन सचेतनः प्रतिबभौ जीवः शरीरान्वयात् ॥ १० ॥

७५ प्रत्यक्षं यदचेतनं जगदिदं तत्त्वादसद् भौतिकं
दिव्यं तत्तु परोक्षमेव परमं सत् केवलं चेतनम् ॥
अध्यात्मं हि सचेतनं च सदसत्सत्वापरोक्षान्तरं
व्यस्तं तच्च समस्तमप्यतिततं पूर्णं तुरीयं समम् ॥ ११ ॥

७६ तत्राचेतनवत्सचेतनवतोः सत्त्वे जगज्जीवयोः
साक्षात्सिद्धचरेऽत्र वस्तुविषये नो संशयोऽस्त्येनयोः ॥
सर्वैः सं विदिते निषेधवचनं न्याय्यान्न सज्जन्क्षते
सर्वे तद् व्यतिरेकतोऽन्वयमुखाद् भावेन संविन्दते ॥ १२ ॥

७७ आदौ चेतनमेव वस्तुवचनं तन्नामरूपान्वितं
पश्चादेतदचेतनं समुदगाद् विश्वं समासान्नजा ॥
आदौ नेति मते किमन्यदधिकं तस्मिन्त्समाकाङ्क्ष्यते
तद्वै चेतनमस्ति किञ्चिदिति वा वक्तव्यमापद्यते ॥ १३ ॥

७८ लोकेऽस्मिन् खलु चेतनेन रहितं प्रत्यक्षभूतं जगद्
भूतेऽस्मिन् त्सकलेऽपिचेतनततं दिव्यं परं तद् बृहत् ॥
अध्यात्मं भुवि चेतनेन सहितं तेनैव सत्त्वाल्लसत्
तज्जीवेन सचेतनं तनुभृतां स्वीयापरोक्षं महत् ॥ १४ ॥

७९ साक्षादेवमचेतनेन जगता भूतेन शब्दादिना
स्वान्तर्येण सचेतनेन वसता स्वीयेन जीवात्मना ॥
दिव्यं केवलमेव चेतनमतः सिद्धं समस्तास्पदं
तस्माच्चेतनमेव सर्वजगतां मूलं सुपूर्णं पदम् ॥ १५ ॥

८० तस्मात्तत्त्वविभेदतस्त्रिविधतस्तैर्भूत-देवा-ऽऽत्मभिः
तत्तद्वाचकशब्दशक्तिवचनात् त्रेधैव वागप्यसौ ॥
व्यस्तेषु प्रततेषु वस्तुषु तता व्यस्ता समस्ताऽपि सा
वद्वत् साऽन्वयतोऽतिरेकमुखतः पूर्णा तुरीया परा ॥ १६ ॥

॥ चतुष्पात् पूर्णः पुरुषः ॥

## ॥ ऋङ्मन्त्रः ॥

एतावानस्य महिमाऽतो ज्यायाँश्च पूरुषः ॥
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

( नारायणः ) ( ऋ० मं० १० । ९० । ३ )

## ॥ पदपाठः ॥

एतावान् । अस्य । महिमा । अतः । ज्यायान् । च । पुरुषः ॥
पादः । अस्य । विश्वा । भूतानि । त्रिऽपात् । अस्य । अमृतं । दिवि ॥

---

तावानस्य महिमा ततो ज्यायांश्च पूरुषः ॥
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥

( साम० आ० कां० ४ । ६ )

---

तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः ॥
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

( अथर्व० १९ । ६ । ३ )

८१ एतावान् परमोऽस्य तस्य महिमा भूयान् स भूमात्मना
तत्त्वानां त्रितयैकसत्त्वगरिमा पूर्णेन्दुबिन्द्वात्मना ॥
तत्त्वैस्तत् त्रिवृतं त्रिपात् सदमृतं दिव्यात्मतेजोऽञ्चितं
तुर्यं तत्त्रितयातिरिक्तमपदं तत्त्वत्रयेऽप्यन्वितम् ॥ १७ ॥

८२ तावानस्य चिदात्मनोऽपि परमो भावः परोक्षोदितः
तावन्तो महिमान एव बहुधा भूमात्मसत्त्वोर्जिताः ॥
तस्मादेवं समस्तभूतिषु समो ज्यायान् परः पूरुषः
तद्योगेन च वाक् परा समुदगात् पूर्णा चतुष्पात् स्वरा ॥ १८ ॥

## ॥ चतुः शृङ्गो रुद्रः ॥

## ॥ ऋङ्मन्त्रः ॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ॥
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश ॥

(वामदेवः) (ऋ० मं० ४। ५८। ३)

## ॥ पदपाठः ॥

चत्वारि। शृङ्गा। त्रयः। अस्य पादाः।
द्वे इति। शीर्षे इति। सप्त। हस्तासः। अस्य ॥
त्रिऽधा। बद्धः। वृषभः। रोरवीति।
महः। देवः। मर्त्यान्। आ। विवेश ॥

८३ रुद्रोऽसौ दिवि रोरवीति तपसा सन् वैद्युतोऽग्निः स्वयं
भर्गो वाग्रसवर्षकः स वृषभः कालानलः केवलः ॥
प्राक्-प्रत्यक्-सपरोक्षचित्सुमहसा त्रेधा निबद्धोऽचलः
मर्त्यान् प्राणचिताऽऽविवेश मनसा वाचा बभूवोज्ज्वलः ॥ १९ ॥

८४ शृङ्गैः शासनवाङ्मुखैः सुनिशितैः सत्त्वै श्चतुर्भिः समैः
शक्तैः सन्नियमार्थसत्त्वकपदैः सक्तैस्त्रिभिश्चासमैः ॥
शीर्षाभ्यां सकलात्मयौगिकचितोः संविक्रियाभ्यां समं
हस्तैः सप्तभिरात्मचित्कृतिपरैः प्राणैः स रौति स्वयम् ॥ २० ॥

## ॥ रौद्री वाग् वैद्युती ॥

८५ रौद्री वाग् दिवि वैद्युतार्चिषरवा रुद्रात्मनैवार्जिता
रौद्रेणाऽऽत्मनि रोरवीति मनसा प्राणेन चित्त्योर्जिता ॥
भर्गात्माऽखिलदोषभर्जनपरा कालानला वैद्युती
रुद्रात्माभ्युदिताऽऽविवेश मनुजान् प्राणैर्हृदा संविदा ॥ २१ ॥

८६ वाग् वै ब्रह्ममुखा प्रचेतनमुखा दिव्याग्निविद्युन्मुखा
वाच्या विश्वमुखा प्रशासनमुखा पूर्णेन्दुबिन्दून्मुखा ॥
वेद्या वेदमुखा प्रभा-स्वरमुखा स्वच्छन्दसा चिन्मुखा
विद्यात्माऽभ्युदयोन्मुखा रसमुखा ब्रह्मात्मसंविन्मुखा ॥ २२ ॥

८७ को जानाति निजं परेशममरं सत्यं समस्तान्तरं
को ज्ञातुं स्वधियाऽर्हति स्वरपरां ब्रह्मात्मवाचं पराम् ॥
बुध्याऽप्येवमचिन्त्यतां प्रति जगौ वाचाऽप्यनिर्वाच्यतां
पूर्णं निर्गुण-सर्वसद्गुणगणैर्ब्रह्मात्मवाग्वैभवम् ॥ २३ ॥

८८ रुद्रश्चिद्रसवाक्स्वरस्वरणतः सोऽग्निः परो रुद्रियः
रुद्राणी परमस्वरानुकरणाद् कूवा सर्वतोऽप्यग्रिया ॥

साऽम्नायी त्रिपदा सती परतमा पूर्णा चतुष्पाच्छ्रुता
सेन्द्राणी परवैद्युतात्मकचिता तत्त्वत्रयैकाश्रिता ॥ २४ ॥

८९ एवं तत्त्वगुणोन्मुखा चिदनला सर्वात्मचित्त्योत्कला
भावं भावमनूदियाय सकला पूर्णात्मसत्ताकला ॥
प्रत्यक्षाच्च परोक्षतोऽपि परतस्तत्रापरोक्षेऽन्तरे
भूतेष्वाभुवनेषु वाग् विरमते देवेषु जीवात्मसु ॥ २५ ॥

॥ गौरी रुद्राणी वाक् ॥

॥ ऋङ्मन्त्रः ॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ॥
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

( दीर्घतमाः ( ऋ० मं० १ । १६४ । ४१ ) †

॥ पदपाठः ॥

गौरीः । मिमाय । सलिलानि । तक्षती । एकऽपदी । द्विऽपदी । सा । चतुःऽपदी ॥
अष्टाऽपदी । नवऽपदी । बभूवुषी । सहस्रऽअक्षरा । परमे । विऽओमन् ॥

९० रुद्रो वाग्रस-सुस्वरस्वरणतस्तन्नामरूपार्हतां
प्राप प्राणमनोवचःकरणतो भर्गात्मभावोर्जिताम् ॥
गौरी वाक् परमात्रयाऽऽत्मनिचिता पूर्णा सहस्राक्षरा
रुद्राणी स्वयमाप चित्समरसात् सत्तां समस्तात्मताम् ॥ २६ ॥

---

† टिप्पणी—एतन्मन्त्र द्वयार्थः "वेदार्थकल्पकतायां विस्तरशो व्याख्यातः

## ॥ चतुष्पदी वाक् ॥

## ॥ ऋङ्मन्त्रः ॥

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

( दीर्घतमाः ) ( ऋ० मं० १ । १६४ । ४५ )

## ॥ पदपाठः ॥

चत्वारि । वाक् । परिऽमिता । पदानि । तानि । विदुः । ब्राह्मणाः । ये । मनीषिणः ॥
गुहा । त्रीणि । निऽहिता । न । इङ्गयन्ति । तुरीयं । वाचः । मनुष्याः । वदन्ति ॥

९१ चत्वारि प्रमितानि वाचकचितेर्वाचः पदानि श्रुतेः
तानि त्रीणि गुहाहितानि मुनयस्तत्त्वाद्रहस्याद् विदुः ॥
सार्थे स्वे विषये वदन्ति मनुजा व्यक्तं तुरीयं पदं
सा वाक् तेन चतुष्पदी प्रति भवेत् सर्वार्थसंवित्प्रदा ॥ २७ ॥

## ॥ आधिभौतिकी वाक् ॥

९२ वाग् वै सेयमचेतना ध्वनिमयी व्योमादितन्मात्रका
सा तेजो-जल-भूमिभिश्च मरुता मेघेन चिद्विद्युता ॥
साकं तेषु मिथोऽभिघातमुखतः सं श्रूयते सा बहिः
साक्षात् तत्स्वर-वर्ण-शब्दवचनाद् बाह्या भवेद् भौतिकी ॥ २८ ॥

## ॥ आधिदैविकी वाक् ॥

९३ दिव्या केवलचेतनाऽम्बरतता वाक् संविदानाऽऽत्मना
वेद्या वेदमुखेन वेदवदना ब्रह्मात्मसंवित्स्वना ॥
योगेनान्तरस तपसा श्रोतुं च सा शक्यते
योग्रे मूर्धनि संश्रुतेति ऋषिभिः सा दैविकी शस्यते ॥ २९ ॥

॥ आध्यात्मिकी वाक् ॥

९४ सर्वान्तस्तु सचेतनाऽऽत्मनि हिता सिद्धा त्रिशक्त्यात्मिका
साऽहम्प्रत्ययचित्तिसंस्फुरणतः सोच्चार्यते ज्ञानदा ॥
मूलाप्ता च चतुष्पदी स्वरपरा प्राणोदिता वैखरी
मूर्धन्यन्तरनाहताऽऽत्मनिनदा वागेव साऽऽध्यात्मिकी ॥ ३० ॥

॥ तुरीयात्मिका परा वाक् ॥

९५ पूर्णात्मा परमाऽऽत्मसत्त्वरसना सा पूर्णबिन्द्वानना
तुर्या पूर्णकलारसेन्दुनयना सर्वात्मसत्त्वायना ॥
सञ्ज्ञारूपगुणक्रियादिचितिभिः सञ्ज्ञापयन्तीष्यते
सर्वज्ञानरसप्रदा स्वरवती सर्वज्ञकल्पायते ॥ ३१ ॥

९६ तत्त्वेनैव समस्तवस्तुविषये ज्ञेयं समं ज्ञायतां
तत्त्वानामपि सामरस्यहृदये लक्ष्यं परं ज्ञाप्यताम् ॥
तत्त्वार्थैकसमर्थनाच्छ्रुतिमुखाद् वाचा धियाऽऽश्रीयतां
तत्त्वज्ञानगुणेन वाक् स्वरमयी स्वानन्ददाऽऽश्रूयताम् ॥ ३२ ॥

॥ इति तृतीया कला सम्पूर्णा ॥

तत्त्वतस्त्रयी त्रयार्थयोगिनीह वाक् परा
सत्प्रभामयी परार्थभागिनी स्वराक्षरा ॥
तत्त्ववित्परानुभावहृत्समीरणा स्वरा
तत्त्वसंविदैव दैवरातवाक्स्मृताऽऽन्तरा ॥ ३ ॥

## ॥ चतुर्थी प्रसिद्धप्रणवकला ॥

### ॥ ॐकारः प्रणवः ॥

### ॥ सत्यज्ञानान्तरब्रह्मात्मिका वाक् ॥

### ॥ ऋङ्मन्त्रः ॥

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ॥
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥

( दीर्घतमाः ) ( ऋ० मं० १ । १६४ । ३९ )

### ॥ पद पाठः ॥

ऋचः । अक्षरे । परमे । विऽओमन् । यस्मिन् देवाः । अधि । विश्वे । निऽसेदुः ॥
यः । तत् । न । वेद । किं । ऋचा । करिष्यति । ये । इत् । तत् । विदुः । ते । इमे । सं । आसते ॥

९७ "ओङ्कारो"ऽध्यक्षरात्मा स्वरसदनुकृतेर्वर्णमात्रात्रयेष्टः
सङ्ख्यातैकस्वरात्मा स्वरदनलचितेः पूर्णसत्त्वावशिष्टः ॥
वागेवेयं प्रसिद्धा प्रणवपरतनूर् वाचका शब्दशक्तिः
सत्यं ब्रह्मैव पूर्णं प्रभवति परमं तच्च वाच्यार्थरूपम् ॥ १ ॥

९८ अध्यक्षः सोऽक्षरात्मा निजसमजगतां सन्नधिष्ठानधामा
सत्यात्मा ब्रह्मसत्त्वः स्वपदि विरमते सन् त्स पूर्णो विरामः ॥
सर्वज्ञः सर्वशक्तिः प्रभवति भगवान् त्संविदा सम्प्रपूर्णः
सेव्यो विद्याद्यधीशः सकलरसचिता वेदवाचाऽभ्युदीर्णः ॥ २ ॥

॥ अक्षरं ओङ्कारवाक्परम् ॥

९९ ओमित्येषा परा वाक् परमपुरुषहृच्छ्वासिनी संविदात्मा
साक्षात् सर्वज्ञकल्पा परमिखिलजगद्भासिनी संयमात्मा ॥
विद्या वेदानवद्या सकलहिततमा छन्दसाऽऽप्ता स्वरार्णा
वेद्या वेदात्महृद्या जगति रसतमा ब्रह्मणस्पत्युदीर्णा ॥ ३ ॥

१०० यद् यत् सत्त्वं सरूपं सगुणमपि परं निर्गुणं वाऽप्यरूपं
वाचो ब्रह्मात्मनश्च प्रतिपदमुदितं सर्वथा स्यात् समानम् ॥
एकेनैवाक्षरेण प्रकृतिचितितत्तं शब्दसामर्थ्ययोगाद्-
ओङ्कारेणैव सम्यक् प्रकटितमखिलं वस्तुतत्त्वं स्वमानम् ॥ ४ ॥

१०१ ऋक्सत्त्वादर्चनीयं स्वररसमहसां छन्दसां मन्त्रवाचां
दृक्तत्त्वाद्दर्शनीयं परतरमहसा साक्षरं संविदर्थम् ॥
साक्षात्-प्रत्यक्-परोक्षात्प्रतिविततमं तत् त्रितत्त्वप्रपूर्णं
वाग्-वाच्यार्थाऽनुवक्तृप्रतिपदनियतं स्वाक्षरं पूर्णसत्त्वम् ॥ ५ ॥

१०२ विश्वे देवाश्च यस्मिन् सममतिमिलिता स्तेऽक्षरे सन्निषेदुः
विश्वान्तर्यामिसत्त्वं प्रथमपदमथं व्योममूमाक्षराख्यम् ॥
यो वै तन्नैव विद्यात् प्रतिवचनमृचा किङ् करिष्यत्यभिज्ञः
सत्यं ब्रह्माक्षरं तत् परममनुविदन्नन्वियात् सोऽमृतत्वम् ॥ ६ ॥

॥ अक्षरं तद् ब्रह्मवस्तुपरम् ॥

१०३ आकारोऽत्राधिभूते जगदिदमखिलं प्रोतमोतं समन्ताद्
आकाशोऽपीह यस्मिन् प्रति भवति हितः संयमादक्षरेऽन्तः ॥
तद्वद् यस्याक्षरस्य प्रतिनियमभृतं शासने तिष्ठतीदं
तद् ब्रह्मैवाक्षरं सत् प्रभवति परमं चेतनं वस्तु सत्यम् ॥ ७ ॥

॥ अक्षरं शासनशक्तिकं वाक्परम् ॥

१०४ सत्यं तच्छासनं सन्मतिकृतिनियमाच्छन्दसोऽक्षय्यसत्त्वं
सत्यासत्योद्विमर्शात् सुविहिततपसा संशितं शास्त्ररूपम् ॥
साक्षात् सर्वज्ञकल्पं सकलहिततमं वेदवागक्षरार्थं
प्रत्यक्षब्रह्मरूपं प्रभवति जगतां शासने शास्त्ररूपम् ॥ ८ ॥

॥ सर्ववेदमूलपरम् प्रणवाक्षरम् ॥

सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति ॥
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि-ओमित्येतत् ॥
( कठोपनिषत् अ० १, २, १६ )

१०५ सर्वे वेदाः सुविद्यास्वररसवचसा यत् पदं ह्यामनन्ति
सर्वज्ञास्ते तपांसि प्रतिहितनियमै यत् सुवाचा वदन्ति ॥
इच्छन्तो वस्तु सत्यं जगति मुनिवरा ब्रह्मचर्यं चरन्ति
ब्रह्मैवेति श्रुतं तत् खमिति निगदिताद् "ओमितीदं" विदन्ति ॥ ९ ॥

॥ तदक्षरमेव श्रेष्ठं आलम्बनम् ॥

एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ॥
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥
( कठोपनिषत् अ० १, २, १६ )

१०६ श्रेष्ठं स्वालम्बनं तत् सकलरसकृते संविदाऽऽनन्दभूत्यै
साक्षाद् ब्रह्मप्रतीकं प्रतिकृतिविहितं ब्रह्मनिष्ठादिसिध्यै ॥
यज्ञे ज्ञाने च योगे श्रवणविधिपरे सर्वविद्यासमृध्यै
वेदारम्भे तथान्ते प्रतिपदमुचितं प्रोच्यतामोमितीदम् ॥ १० ॥

१०७ प्रत्यक्षं ब्रह्म वाक् स्यात् तदिदमतितरां ब्रह्म पूर्णं परोक्षं
स्वारस्यादक्षरं तत् परमचितिहितं वस्तु वाच्यार्थरूपम् ॥

तस्माद् वाग्-ब्रह्मणोर्वै तदिह समुचितं यस्त्यजेद् वाच्यमर्थं
तस्यास्यां केवलयां तदिदमनुचितं वाच्यपि स्यान्निरर्थम् ॥ ११ ॥

१०८ ओङ्कारेऽस्मिन् परात्मोच्छ्वसितरसमहाव्याहृतिज्योतिषोग्राः
सङ्ख्यामात्राश्चतस्रस्त्रिवृदुदितमहःपूर्णबिन्दुस्वराग्राः ॥
मन्त्राख्या भूर्भुवःस्वर्मह इति च महादिव्यचिज्ज्योतिरग्राः
तिस्रस्तत्राधिमात्रा अ उ म इति महः स्यात् तुरीयस्त्वमात्रः ॥ १२ ॥

१०९ ब्रह्मैव स्यान्महस्तत् परचितिमहसा सोऽयमात्मा महस्वान्
आदित्यो दिव्यतेजाः परतरतपसा ज्योतिरात्माऽभ्युदीर्णः ॥
सोमः शान्त्या प्रपूर्णः समरसकलया सन् मनश्चिन् मनस्वान्
सर्वे पादात् तुरीयात् स्वररसमहसा ते महान्तो महार्णाः ॥ १३ ॥

॥ प्रथमं अधिलोकं तत्त्वम्-अधिभूतार्थसत्त्वम् ॥

११० "भू" र्भूमिः साऽवमेयं प्रथमपदपरा स्यादिहाऽऽन्त्याऽग्निगर्भा
मध्ये स्यादन्तरिक्षं "भुव" इति विदिता मध्यमा वायुगर्भा ॥
ऊर्ध्वा द्यौः सूर्यसंस्था "स्व" रिति हि परमा सोत्तमा चेन्द्रगर्भा
तत्त्वार्थादाधिलोकाददितिपदमिदं भौवनं भूतगर्भम् ॥ १४ ॥

१११ भूर्वै सान्ना च पृथ्वी चिदनलसदना गन्धतन्मात्रसत्त्वाद्-
एन्थ्रश्चापोऽन्तरिक्षं ह्यसुरसकलिता वैद्युता रौद्रसत्त्वाद् ॥
स्वः स्यात् तेजः सरूपं जगदुदयमुखे दिव्यमुद्भूतमाद्यं
भूयस्त्वाधेयसत्त्वात् त्रिवृदुदितकृतेर्भौतिकं तत्त्ववेद्यम् ॥ १५ ॥

११२ अन्नं भूमेः सुसत्त्वं हृदि भवति मनः सान्नसत्त्वं च तत् स्याद्
आपः प्राणाः समिष्टास्तदुचितरसतस्ते तदापोमयाः स्युः ॥
तेजस्तद् वाक्सुसत्त्वं स्वररसकलितं सा च तेजोमयी वाक्
तस्माद् भूतत्रयैक्यात् त्रिकरणमुदगाद् भूतमात्रात्रयासम् ॥ १६ ॥

॥ द्वितीयं अधिज्यौतिषं तत्त्वं अधिदैवतार्थसत्त्वम् ॥

॥ पृथिव्याः पतिः अग्निः ॥

११३ "भू" रग्निर्भूमिभर्ता ज्वलदनलमुखो ज्योतिरात्माऽभ्युदीर्णः
सोऽन्नादीनां च भोक्ता प्रतिपचनकृतेर्दाहको दीपकः स्यात् ॥
सोऽग्निर्वाक्सत्त्वसिद्धः स्वरदसुरसनायोगतः सोऽधिवक्ता
सृष्टेरादौ प्रजातः परमपुरुषतो वाङ्मुखादेव गीर्णः ॥ १७ ॥

११४ ब्रह्माऽयं वेदवाचां प्रभवति परमव्योमसद् वेदवक्त्रो
भौमोऽग्निर्देवतात्माऽवनिसदनपदे सन् हविर्भुक् चिदास्यः ॥
अग्नेः स्वाहा स्वधा च स्वररसरसने वाचिके दिव्यशक्ती
वाच्यार्थात्माग्निमय्यौ श्रुतिवचनतनू दक्षवामार्धवृत्ती ॥ १८ ॥

॥ मध्यमलोकाधिपतिः वायुः ॥

११५ वायुर्मध्ये भुवः स्याचरदसुवचनो मध्यमो वैद्युतास्यः
रुद्रोज्योतिश्चितेन्द्रो बहिरिह पवनः पावयन् त्सर्वलोकान् ॥
सिद्धोऽपीन्द्रस्य सख्ये विचरति सहसा प्राणचिद् रुद्रसूनुः
नीरूपोऽपि स्वयं सन् परचितिमहसा सम्बभौ दर्शनीयः ॥ १९ ॥.

॥ उत्तमो द्युलोकाधिपतिः सूर्यः ॥

११६ सूर्योऽसौ स्वः स्वरूपो दिवि चितितपसा भ्राजते ज्योतिरात्मा
वृष्ट्या सन्तर्पयन् वै निजरसमुखतः प्राणसत्त्वात् सरस्वान् ॥
जीवात्मा संविधर्ता जगति हि जगतां जीवतां प्राणिनां सन्
सर्वेषामन्तरात्मा स भवति सविता तस्थुषां स्थावराणाम् ॥ २० ॥

११७ विष्णुर्दिव्यो महस्वान् प्रभवति जगतां सत्त्वभूमा मनस्वान्
विश्वेषां रक्षकः सन् त्सु जयति महतां सोऽपराजय्यसत्त्वा ॥
इन्द्रस्येष्टः सखा सं त्रिभुवनविजयी सन्नुपाधेरुपेन्द्रः
सत्त्वात् सर्वत्र पूर्णः स्वकगुणगणैर्भूतिभिर्विश्वरूपः ॥ २१ ॥

॥ अधिविद्यं तत्त्वम् ॥

११८ भू वै ऋक् छन्दसाऽऽसा स्वररसकलिता वाक् चिदग्नेरुदीर्णा
वायोर्योगात् प्रजातं भुव इति च यजु र्यज्ञकर्मादिसत्त्वैः ॥
उद्गीतं तत्र साम स्वरिति सुमहसा सागरस्यस्वराप्तं
सिध्दं मात्रात्रयीष्टं प्रणवमनुपदं साधिविद्यं त्रिपात्त्वम् ॥ २२ ॥

॥ तृतीयं अध्यात्मं तत्त्वम् ॥

॥ अकारः मात्रापादः प्रथमः ॥

११९ अद्वैतः सन् "अकारः" स्वर इति गदितः सर्ववर्णादिभूतः
सर्वेषु व्यञ्जनेषु प्रतिमुख उदितः सर्ववर्णोन्मुखः स्यात् ॥
ह्रस्वः सन्नेकमात्रः प्रणवमनुगतः सर्वतत्त्वार्थसत्त्वात्
सर्वत्रायं समोऽसौ रविरिव विततः सोऽस्ति योऽध्यक्षसत्त्वः ॥ २३ ॥

१२० अध्यात्मं चेतनात्मा सकलतनुगतो दिव्यवैश्वानरोऽग्निः
प्रत्यङ् स्थूले शरीरे पचनचितियुतः स्थूलभुक् सम्प्रकास्ते ॥
सन्द्रष्टा जागृतिस्थ श्चिदनलनयनः प्राङ्मुखो वाक्स्वरास्यः
स्वाहाकारेण भोक्ता चरदसुवदनः सन् "अकारे" समास्ते ॥ २४ ॥

॥ द्वितीयः उकारः मात्रापादः ॥

१२१ तद्वद् भूयो द्वितीयः प्रथममनुगतो मध्यमोऽभूदुकारः
दीर्घः स्याद् "ओ" द्विमात्रः प्रथमपदयुतेः सोऽप्यकाराद् गुणाप्तः ॥
ऐन्द्रो रौद्रश्चिदात्मा स्वरदसुसदनस्तैजसो वैद्युतोऽग्निः
साक्षी भोक्ता विविक्तः प्रतिहितमनसा स्वप्नभाक् सूक्ष्मदेहे ॥ २५ ॥

॥ तृतीयो मकारः मात्रापादः ॥

१२२ तार्तीयोऽयं मकारो द्विपदगुणयुतः स्यात् त्रिमात्रः प्लुतोऽन्त्यः
देहेऽन्तः कारणाख्ये समकरणहितः सन् ऽसुषुप्तौ प्रलीनः ॥

प्रत्यङ्चित्त्याऽऽत्मसत्त्वः सवितृचितिपरः सोऽपि दिव्योऽग्निरिष्टः
प्राज्ञात्मा ज्ञाननेत्रो निजमहिमपरानन्दभुक् संविदाऽऽस्ते ॥ २६ ॥

१२३ प्राज्ञः सर्वान्तरात्मा सकलगुणनिधिः सच्चिदानन्दसत्त्वा
शान्तः स्वान्तर्विलीनः परमरसमयः सर्ववेत्ता सुसन्दृक् ॥
नान्तःप्रज्ञोऽविशिष्टो गुणकृतिरहितो नो बहिःप्रज्ञ इष्टः
संवित्सत्त्वावशिष्टः स्वपदि विरमते ब्रह्मचैतन्यपूर्णः ॥ २७ ॥

॥ अग्नियज्ञं तत्त्वम् ॥

१२४ यज्ञे भूर्गार्हपत्यस्तदनु ऋगुदितो वाक् स होताऽग्निशिष्टः
यष्टाऽन्यो दक्षिणाग्निर्भुवः इति यजुषा चक्षुरध्वर्युरिष्टः ॥
साम्नोद्गाता स ऐन्द्रः स्वरिह हवनभूः प्राणगोऽग्निस्तृतीयः
ब्रह्मा तस्मिंस्त्रयीवित् प्रभवति मनसा यज्ञसाक्षी तुरीयः ॥ २८ ॥

॥ अमात्रः तुरीयः पादः पूर्णबिन्दुरूपः ॥

१२५ सोऽनुस्वारोऽन्तिमः स्यात् सततमणुतमः सन्नमात्रस्तुरीयः
सोऽद्वैतः सन् प्रशान्तो लसति शिवतमः सत्त्वपूर्णो विरामः ॥
तस्मिन् त्सर्वात्मयोगात् सकलगुणसमा ब्रह्मरूपा परा वाक्
स्वात्मन्योङ्काररूपे स्वपदि विरमते ब्रह्मणा सामरस्यात् ॥ २९ ॥

॥ अर्धमात्रात्मिका तुरीयपदा परा वाक् ॥

१२६ बिन्द्वोस्तस्यार्धसत्त्वात् समरसमुदिता साऽर्धमात्रात्मिका वाग्
याऽनुच्चार्या विशेषात् स्वर-सुरसचिता साऽर्धचन्द्रप्रतीका ॥
पूर्णब्रह्मात्मयोगात् तदवगतिकृते स्वात्स्वरूपाऽऽवतीर्णा
प्राज्ञात्मोङ्कारशीर्षे लसति निजपदे नामनेमात्मगीर्णा ॥ ३० ॥

॥ तिस्रोमात्राः मृत्युमत्यः प्रयुक्ताः ॥

१२७ तिस्रोमात्राः समर्था स्त्रिगुणकृतिहितास्तास्त्रयीभावयुक्ताः
त्रेधा भावैर्विभिन्नाः सविषयविषमा मृत्युमत्यः प्रयुक्ताः ॥
अन्योऽन्यं ताः सुसक्ताः सममतिकृतिभि श्छन्दसाऽसुस्वराप्ताः
योगात् पूर्णेन्दुबिन्दोः समरसकलया ब्रह्मणा ताः समस्ताः ॥ ३१ ॥

१२८ तस्मादोमित्यनेन प्रणवपरचिता तत्रिमात्राक्षरेण
सर्वस्मात् पूर्णसत्त्वं परमिह पुरुषं ध्यायति प्रज्ञया यः ॥
ज्योतीरूपे परस्मिन् रसतमपुरुषे पूर्णयोगादुदीर्णः
सम्पन्नः सौमनस्यात् स्वहृदि विरमते सामरस्येन पूर्णः ॥ ३२ ॥

॥ इति चतुर्थी कला सम्पूर्णा ॥

---

ओमिति प्रणौति सर्वभूतिपूर्णपूरुषं
व्योम्नि चित्स्वरप्रपूर्णसत्त्वसंविदर्चिषम् ॥
सोमसत्त्वसन्मनश्चिदिन्द्रवाक्समाशिषा
सामगाननीतदैवरातवाक् स्थिराऽऽयुषा ॥ ४ ॥

---

## ॥ ओङ्कारतत्त्वज्ञानकोष्टकम् वैदिकम् ॥

| अनु० संख्या | १ महाव्याहृतयः | २ अधिलोकम् | ३ अधिभौवनं | ४ भुवनम् | ५ भुवनानि | ६ अधिभूतम् | ७ अधिज्यौतिषम् | ८ अभयः | |
|---|---|---|---|---|---|---|---|---|---|
| ● | आत्मा ब्रह्म- | अदितिः | रुद्रियाः तनवः | इन्द्राग्नी | वैष्णव्याः तनवः | सत् | रसात्मा | चैतमोऽस्मि | |
| ४ | महः | आदित्यः | अग्निगर्भा | उत्तमा | इन्द्रगर्भा | आत्मा | चन्द्रमाः | परमोऽस्मि | |
| ३ | स्वः | द्यौः | इराशया भूः | परमा | इन्द्रियावती द्यौः | तेजः | आदित्यः | दिव्योऽस्मि | |
| २ | भुवः | अन्तरिक्षम् | रजाशया भूः | मध्यमा | विमृधा द्यौः | आपः | वायुः, इन्द्रः- | वैद्युतोऽस्मि | |
| १ | भूः | पृथिवी | अयाशया भूः | अवमा | अंहोमुक् द्यौः | अन्नं,-पृथिवी | अग्निः | भौमोऽस्मि | |
| | ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ | |
| अनु० | गण-देवताः देवाः | देवाः | अधिविद्यम् | वेदाः | अध्यात्मम् | त्रिकरणानि | भूतमात्राणि | प्रणवमात्राः | |
| ● | विश्वरूपः ज्योतिरात्मा | परमात्मा | अहिर्बुध्न्यः | छन्दांꣳसि | आत्मा | सत् | सन्मयः | ॐ | ● |
| ४ | सहस्रशः पुरुषः | पुरुषः | ब्रह्म | अथर्ववेदः | अन्नम् | आत्मा | चिन्मयः | अनुस्वारः | ४ |
| ३ | द्वादश-आदित्याः | विष्णुः | यजूँषि | साम | व्यानः | वाक् | तेजोमयी | मकारः | ३ |
| २ | एकादश-रुद्राः | रुद्रः | सामानि | यजुः | अपानः | प्राणः | आपोमयः | उकारः | २ |
| १ | अष्टौ-वसवः | ब्रह्मा | ऋचः | ऋक् | प्राणः | मनः | अन्नमयम् | अकारः | १ |

## ॥ अध्यात्मकं औपनिषदम् तदक्षरतत्त्वम् ॥

| | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |
|---|---|---|---|---|---|---|---|---|
| अनु० | पादाः | मात्राः | करणानि | अवस्थाः | शरीराणि | दृष्टिः प्रज्ञा | भोक्तारः | अन्तरात्मानः |
| १ | प्रथम | अकारः | चक्षुः | जागृतिः | स्थूलं | बहिः प्रज्ञः | स्थूलभुक् | वैश्वानरः |
| २ | द्वितीयः | उकारः | मनः | स्वप्नः | सूक्ष्मं | अन्तः प्रज्ञः | प्रविविक्तभुक् | तैजसः |
| ३ | तृतीयः | मकारः | प्रज्ञा | सुषुप्तिः | कारणं | नान्तः प्रज्ञं | आनन्दभुक् | प्राज्ञः |
| ४ | चतुर्थः | अमात्रः<br>ॐ | आत्मा | तुर्या | तुरीयं | न प्र ' नाप्रज्ञं | प्रज्ञानघनः<br>अभोक्ता | आनन्दात्मा |
| | ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ |
| अनु० | ईशाः | करणानि | तत्स्वरूपम् | अधिप्रजम् | प्रजाः | आत्मा | प्रजाः करणानि | व्याहृतयः |
| १ | ईश्वरः | वाक् | विज्ञातं | माता | देवाः | वाङ्मयः | पिता-मनः | भूः |
| २ | हिरण्यगर्भः | प्राणः | अविज्ञातं | प्रजाः | पितरः | प्राणमयः | प्रजाः-प्राणः | भुवः |
| ३ | विराट् | मनः | विजिज्ञास्यम् | पिता | मनुष्याः | मनोमयः | माता-वाक् | स्वः |
| ४ | परमात्मा | आत्मा | विज्ञाता | चेतनात्मा | आत्मा | चिन्मयः | त्रिकरणात्मा | ॐ |

# ॥ पंचमी कला ॥

## ॥ प्रणवाक्षर-ब्रह्मोपासना ॥

१२९ पूर्णात्मा प्रकृतेः परः स पुरुषः सञ्चेतनः केवलः
पूर्णानन्दरसे परे विरमते पूर्णेन्दुबिन्दूत्कलः ॥
प्रत्यक्षं प्रणवं स्वरन्तमनुयन् प्राज्ञात्मकं निष्कलं
प्रत्यञ्चि प्रणवाक्षरे विरमतां प्रज्ञानवाक्चित्कले ॥ १ ॥

१३० स्वान्तस्तत् प्रणवाक्षरं प्रति जपन् नित्यं धियाऽऽधीयतां
वाच्यात्मैकसदर्थभावनपरो लक्ष्यं परं श्रूयताम् ॥
वाचा प्राणमुखेन सत्त्वमनसा शान्त्याऽनुसन्धीयतां
साक्षात्कारचिता स्वरूपपरया स्वान्तर्दृशा दृश्यताम् ॥ २ ॥

१३१ स्वात्मन्यन्तरिता प्रचेतनपरा संविद्रसात्माक्षरा
स्वाहम्प्रत्ययतः स्फुरत्यनुपदं सा वाक् प्रतीची परा ॥
तस्यां तत्प्रणवाक्षरं परतरं ब्रह्मात्मसद्वाचकं
सत्यां वाचि नियोजयेत् प्रतिमुखं लक्ष्यार्थसत्त्वोच्चकम् ॥ ३ ॥

१३२ मूलाधारपदात् सनाभि-हृदयान् मूर्धान्ततो धारणात्
मालासूत्रसुधारया स्फुरणया वाक्चित्स्वरोच्चारणात् ॥
मानेन प्रणवस्वरं समरसं सञ्चिन्तयेन् मानसे
मौनेनात्मनि संविदा मननतो जापो भवेन् मानसः ॥ ४ ॥

१३३ वक्त्रे सद्रसधारया, रसनया सूक्ष्मस्वरैकाग्रया
वाचाचोच्चरणात् स्वरश्रवणतो जापः स चोपांशुकः ॥
स्पष्टोच्चारणतो बहिः श्रवणतः शब्दात्मको वाचकः
प्राणाद् वाङ्मुखतः सहैव मनसा बाह्यो भवेद् वाचिकः ॥ ५ ॥

१३४ ओमित्येवमनुस्वराक्षरमुखाद् वागब्रह्मणः सत्पतिः
प्राणात्माऽयमुपास्यतां चितिमुखो मुख्यः स वागुन्मुखः ॥
सेन्द्रोऽग्निः स बृहस्पतिश्च बृहती वागत्र तस्याः पतिः
सैवेहाङ्गिरसोऽखिलाङ्गरसचिद्योगेन वाचस्पतिः ॥ ६ ॥

१३५ सर्वज्ञेश्वरवाचकं श्वसदनुस्वारोन्मुखासुस्वरं
ज्ञानेनापि तदर्थभावपरया स्वान्तर्धिया संस्मरन् ॥
कामेनातिशुभेन सत्त्वमनसा प्राणेन सूक्ष्मं स्वरन्
ओमित्यक्षरमन्तरात्मनि जपेत् सच्छ्रद्धयाऽऽत्मस्वरम् ॥ ७ ॥

१३६ स्वान्तर्धारणया चिदात्मपरया स्वाच्छिन्नमूलाग्रया
स्वान्ते सन्ततधारयाऽनुचरया धीयोगसत्त्वाग्रया ॥
सैकाग्र्यादनु सन्दधीत परमं ब्रह्मात्मवस्त्वन्वितं
साक्षात् तत् प्रणवस्वराक्षरसमं सत् संविदाऽन्तर्हितम् ॥ ८ ॥

१३७ ध्येयं वस्तु परं स्वमान्तरतमं बाह्यं परोक्षं च वा
ध्यातुः सामरसाप्तयाऽऽन्तरदृशा लक्ष्यात् तदेकाग्रया ॥
ओमित्यास्वरदेकतानसृतया सत्प्रत्ययैकर्द्धया
ध्यायेन् मौनसमुद्रयाऽऽत्मरतया सच्चेतनान्तर्धिया ॥ ९ ॥

१३८ ध्येयैकात्मकसत्यवस्तुततया सत्तैकचिद्भासया
वेद्यैकार्थकपारमार्थहितया सन्मात्रनिर्भासया ॥
ओमित्यक्षरसामगानरसतः स्वान्तः समाधीयताम्
एकत्र त्रिपुटीसमैकरसतः स्यात् संयमो ध्यायताम् ॥ १० ॥

॥ औपनिषदो मन्त्रवर्णाः ॥

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ॥
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ॥
(मुण्डकोपनिषद् २।२।४)

१३९ ओङ्कारो धनुरीशशक्तिवचनं ब्रह्मास्त्रसत्ताशिरः
सोऽहङ्कारचिता शितासुवचनो जीवोऽयमात्मा शरः ॥
वेद्यं वस्तुचिदात्मकं परतमं ब्रह्मैव लक्ष्यं स्वयं
वेद्धव्यं स्वचितोऽप्रमादहृदयात् स्यात् तन्मयः स्वान्वयम् ॥ ११ ॥

१४० हिङ्कारः स्वरसामसद्रसपरः सच्छान्तिचित्कारकः
हुङ्कारः परशक्तिबीजकमनु दुष्टोपसंहारकः ॥
हूं स्या नीलसरस्वतीस्वरमनु र्मन्यूग्रतारातनुः
ओङ्कारो भुवि रुद्रतारकमनु स्ताराय तस्मै नमः ॥ १२ ॥

१४१ ओमित्येव चितात् परात्मवचनाद् आत्माऽनु सन्धीयतां
सोऽहङ्कारचिताऽन्वयैकरसतः स्वान्तः समाधीयताम् ॥
स्वस्तिः शान्तिरुदेति सौम्यमहसा स्वान्ते सदा ध्यायतां
शक्तिः स्वात्मनि संशिताऽसुतपसा सर्वेष्टदाऽऽधीयताम् ॥ १३ ॥

॥ उद्गीथः प्रणवस्वरपरः ॥

१४२ उद्गीथः प्रणवः श्रुतः स्वरतमः पूर्णादनुस्वारतः
सोद्गाता परसाममन्त्रवदनाद् "ओमित्यनूद्गायति ॥
उद्गीतात् स्वरणादनुश्रवणतस्तत्साममन्त्रान् स्वयं
सोद्गायन् स्वरसस्वरे विरमते तत्सामरस्यान्वयम् ॥ १४ ॥

॥ प्रणवाक्षरपरः सामरसस्वरः ॥

१४३ सत्त्वानां प्रथमो रसो रसतमः सिद्धो रसानां समः
सोद्गीथः परमः स्वरात् परतमः सद्गायनैकोत्तमः ॥
भूतानामिह भूजलाप्सुपरवाग् ऋक्सामतः सोऽष्टमः
तस्मादेव परेश्वरीय उदगाद् ओमित्यसौ सत्तमः ॥ १५ ॥

## ॥ अनुज्ञाक्षरं प्रणवसञ्ज्ञापरम् ॥

१४४ जानीते स्वयमेव योऽनुवचनादन्योऽन्यभावान्वयं
जानानोऽयमिहान्तरात्मनिरतः शान्तिं समेति स्वयम् ॥
स्वानुज्ञां प्रतिदातुमप्यनुपदं भूयोऽनुजानात्ययं
प्रज्ञानात्मन आदितः समुदगाद् "ओमित्यनुज्ञाक्षरम् ॥ १६ ॥

१४५ श्रौते यज्ञमुखे सदा प्रथमतस्तद्यज्ञसंसाधनाद्
ओमित्येव तदग्निहोत्रकरणे यष्टाऽनुजानाति तद् ॥
अध्वर्योर्वचनादपां प्रणयने तत्साक्षिणा ब्रह्मणा
यज्ञारम्भकृतौ निजानुवचनाद् ओमित्यनुज्ञायते ॥ १७ ॥

१४६ पूर्वं यज्ञविधेः कृतावधिकृताः सर्वेऽपि ते ऋत्विजः
मन्त्रादोमिति मन्त्रणात् पुनरनुज्ञाताः समे ब्रह्मणा ॥
स्वे स्वे कर्मणि वर्तयन्ति सततं यत्नेन यज्ञं द्विजाः
ओमित्येव जपेन संस्तवनत स्ते यज्ञसिद्धिं जगुः ॥ १८ ॥

१४७ हंसोऽसौ प्रतपन् दिवि स्वतपसा सूर्यो महस्वान् त्स्वयं
हंसात्मस्वरसाभिरप्यनुसरन् त्सोऽद्भिः. सरस्वानयम् ॥
हंसं स्वं तमनुस्वरन् त्सुमनसा प्राणैः स्वरात्मान्वयं
हंसः सोऽहमिति स्वरानुकरणे हंसायते सोऽन्वहम् ॥ १९ ॥

१४८ हंसाख्येन सरस्वता रसवता सूर्येण संविद्धता-
ऽहंसत्त्वेन सरस्वती रसवती सर्वाक्षरात्मोदिता ॥
हंसात्मप्रणवाक्षरामृतरसा हंसोच्चतारस्वरा
स्वाहंसात्मकपूर्णवस्तुवहनात् सा हंसवाहिन्यभूत् ॥ २० ॥

१४९ दिव्यं विश्वविभूतिपूर्णपुरुषं हंसं तमाहुर्विदो
दिव्यानां स्वरसात्मनां सममपां सख्ये चरन्तं हृदा ॥

हंसीं वाचमनुष्टभं स्वरवतीं चानूच्चरन्तं स्वया
हंसात्मानमिहान्तरं कविवराः स्वेन्द्रं निचिक्युर्धिया ॥ २१ ॥

१५० वाद्यः प्राण इति श्रुतोऽत्र सविता हंसः प्रजानां पतिः
सोऽसौ स्वीयमनुस्वरन् प्रणवकं व्योमन्युदेत्यन्वहम् ॥
मुख्यः प्राण इह श्रुतिप्रतिनुतः सर्वान्तरो वाग्युतः
मुख्या वागियमात्मना विजयते सैन्द्राग्रसत्त्वान्विता ॥ २२ ॥

१५१ प्राक् सृष्टेः परमात्मवाक्चितिमुखादिन्द्राग्नितेजोमुखः
प्राणो मुख्य इहोदगात् स्वरमुखः सर्वान्तरः प्राङ्मुखः ॥
प्रत्यञ्चि प्रणवं स्वरन् त्सुमनसा योगादुदेति स्वयं
प्राणापानगतेरुदीर्णवचसा हंसात्मवागन्वयात् ॥ २३ ॥

१५२ सा वाक् प्राणचिदात्महंसरसनासत्त्वाद् रसास्वादनात्
सद्रस्यैः सितहंसवाहनरता स्वारस्यचिन्नादनात् ॥
साऽहंसत्त्वसमग्रवर्णवचना प्राणात्महंसायना
सैवोङ्काररसस्वरैकवदना हंसात्मतारस्वना ॥ २४ ॥

१५३ स्वान्तर्हंसवतीं स्वरां रसवतीं स्वाहम्मतिप्रत्ययात्
साहञ्चित्प्रणवाक्षरस्वरयुतां वाचं परामुच्चरेत् ॥
प्राणापानगतेर्निरीक्षणमुखाद् धीयोगतस्तां जपेत्
प्रत्यक्सन्ततशान्तितो विरमतां तत्संविदात्मान्वयात् ॥ २५ ॥

१५४ तत् प्रातः सवने सहौषसरसैर्मन्द्रैः सुसौम्यैः स्वरैः
प्रायो व्याघ्ररुतोपमैरसपरैर्जापः स मन्त्राक्षरैः ॥
सोऽपि प्राणमुखेन च स्वरवता तद्वैखरीवाङ्मुखाद्
ओङ्काराक्षरबीजमन्त्रवचनात् स्याद् विश्रुतेर्वाक्स्वरात् ॥ २६ ॥

१५५ भूयः कण्ठगतैश्च मध्यमतरैर्मध्यन्दिने सुस्वरैः
स्थूलै दीर्घपदै गंभीररक्त स्तैश्चक्रवाकानुगैः ॥
ओङ्कारम् प्रजपेदनावृतमुखात् स्पष्टं प्रतिश्रूयतां
हिङ्कारादिवदेव दिव्यनिनदात् सोऽन्यैः समाकर्ण्यताम् ॥ २७ ॥

१५६ मूर्धन्यैर्निनदैस्तृतीयसवने तारस्वरैरुच्चकैः
मुख्यै हंसमयूरनादपरमैः सर्वोत्तमैःस्तैः प्लुतैः ॥
प्राग्वक्त्रात् प्रणवं जपेच्च शृणुयात् तत्रैकतानान्वयाद्
बाह्यं शब्द-वचोऽन्तरं न शृणुयाद् एकाग्रतैकाश्रयात् ॥ २८ ॥

१५७ एकान्ते विपिने निजेऽपि सदने निश्चिन्तया निर्भयाद्
एकाकी स्थिरसन्धृतेन मनसा प्राणेन वाचा धिया ॥
निर्द्वन्द्वेन च मुक्तकण्ठमुखतो मूर्धन्यनादान्वयाद्
ओङ्कारम् प्रतिघोषयन् विरमतां शृण्वन् त्स्वरन्तं स्वयम् ॥ २९ ॥

१५८ श्रोत्रं त्वक् पुनरक्षिणी च रसना घ्राणं मनः सन्मतिः
प्राणाख्यैः सह सप्तभिः प्रतिचितं ज्ञानं हि तैर्धीन्द्रियैः ॥
वाचैवानुवदत्ययं स्वविदितं ज्ञानाय तत्त्वार्थिनां
तस्माद् वागिह सर्वथाऽऽन्तरतमा तेभ्योऽतिरिक्ताऽष्टमी ॥ ३० ॥

१५९ तत् प्रत्यङ्मुखतोऽन्तरेव हि जपन् मन्त्राक्षरं संस्मरेत्
प्राणस्यापि गतेः स्वरन्त्सुशृणुयात् स्वान्तः श्रुतेः स्वं स्वरम् ॥
तस्मिन्नात्मनि चेतनेऽन्तरदृशा सद्भावतः संविदा
स्वान्तः शान्तिरसात्मिकामनुभवेद् ब्रह्मात्मनिष्ठां सदा ॥ ३१ ॥

१६० वागेवं परमात्मसत्त्वमहिमापूर्णा समा ब्रह्मणा
वाच्यार्थात् प्रणवाक्षरात्मतनुभृत् सा संविदानाऽऽत्मना ॥

विश्वेषां जगतामपीह जननी मात्री च जीवात्मनो
विश्वार्था समुपास्यतां समरसात् तद्वाक्सुधा सेव्यताम् ॥ ३२ ॥

॥ इति पञ्चमी कला सम्पूर्णा ॥

ओमितिस्वरत्सदात्मवस्तु वाच्यमिज्यतां
सो ऽहमित्यनुस्फुरत् स्वमान्तरं प्रतीक्ष्यताम् ॥
व्योमपूर्णशह्वशक्तिनादवाक् प्रतीयतां
सोमनीतदैवरातवाक्सुधा प्रपीयताम् ॥ ५ ॥

## ॥ षष्ठी गुप्तप्रणवकला ॥

### ॥ ईङ्कारः ॥

१६१ "इङ्" काराक्षरमीशवित्स्वरपरं चित्सामरस्योच्चरं
सेन्द्रात्मानुनिनादतोऽनुकरणात् पूर्णात्महृत्सुस्वरम् ॥
"ईङ्काराय" परात्मने रसकृते "स्वाहा" नमस्तेऽर्प्यते
मात्राभिः सकलात्मभि श्चतसृभिः सह्बिन्दुना सोऽर्च्यते ॥ १ ॥

१६२ ऋग्वेदे तु परात्मवस्तुवचनं स्यादेकमीङ्कारकं
ब्रह्मात्मेन्द्रचिदीश्वरानुवचनं वाच्यार्थसन्दर्शकम्
ब्रह्मेव प्रतिपूर्णचित्स्वरकलालक्ष्यार्थसंलक्ष्यकं
नादानुस्वरणात् स्वरानुकरणाद् ध्वन्यार्थसम्बोधकम् ॥ २ ॥

१६३ प्रायस्तत् परमोमिति स्वरणतः क्लृप्तं यजुर्मन्त्रकं
मात्राभिस्तिसृभिः सुसंहितमतः सिद्धं त्रयीमूलकम् ॥
ऋङ्मन्त्रेषु तु नास्ति तत् क्वचिदपि व्योमन्यदोऽन्तर्हितं
गायत्रीति तदेकमक्षरमयं छन्दस्तु दैवीरिताम् ॥ ३ ॥

॥ "ई" इति तत्त्वत्रयार्थाक्षरं, जगद्-ईश-जीवात्मपरम् ॥

१६४ ईमित्येवमचेतनं जगदिदं प्रत्यक्षगं भौतिकं
पारोक्ष्यात् परमाधिदैवतपदं तत् केवलं चेतनम् ॥
अध्यात्मं हि सचेतनं स्वयमहञ्चित्त्याऽपरोक्षात्मकं
सामस्त्यात् मति बोधकं परमियात् तत्रैकमीङ्कारकम् ॥ ४ ॥

## ॥ आधिभौतिके जगति ईङ्कारः ॥

### ॥ ऋ मन्त्रः ॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ॥
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ॥
(दीर्घतमाः) (ऋ० मं० १।१६४।३२)

---

### ॥ पदपाठः ॥

यः । ईम् । चकार । न । सः । अस्य । वेद ।
यः । ईम् । ददर्श । हिरुक् । इत् । नु । तस्मात् ॥
सः । मातुः । योना । परिऽवीतः । अन्तः ।
बहुऽप्रजाः । निःऽऋतिम् । आ । विवेश ॥

---

१६५ यो वै भूतमिदं चकार सहसा चिद्योगशक्त्याऽन्वयं
सोऽपि स्वीयमनन्तसत्त्वकलितं पूर्णं न वेद स्वयम् ॥
यः प्रत्यक्षमिदं ददर्श विततं किं तत् स वेदाञ्जविद्
विश्वं दीर्घतमास्त्वदर्शयदिदं संश्रावयन् "ईमिति" ॥ ५ ॥

१६६ सेयं विश्वविसृष्टिरत्र वितता यस्माद् बभूवादितः
सोऽप्येतां न दधे बलेन यदि वा स्वान्तर्दधेऽनादितः ॥
योऽस्याध्यक्ष इति श्रुतोऽस्ति परमो ब्रह्मात्मकः पूरुषः
सोऽप्येनामिह वेद पूर्णमिति वा नाप्तं न वेदेति वा ॥ ६ ॥

॥ परोक्षे परमे वस्तुनि ईङ्कारः ॥

## ॥ ऋङ्मन्त्रः ॥

तिस्रो मातृस्त्रीन् पितॄन् बिभ्रदेक ऊर्ध्वस्तस्थौ नेमवग्लापयन्ति ॥
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥

(दीर्घतमाः) (ऋ० मं० १।१६४।१०)

## ॥ पदपाठः ॥

तिस्रः । मातॄः । त्रीन् । पितॄन् । बिभ्रत् । एकः ।
ऊर्ध्वः । तस्थौ । न । ईम् । अव । ग्लापयन्ति ॥
मन्त्रयन्ते । दिवः । अमुष्य । पृष्ठे ।
विश्वऽविदम् । वाचम् । अविश्वऽमिन्वाम् ॥

## ॥ ऋङ्मन्त्रः ॥

मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदो वाचमविश्वविन्नाम् ॥

(अथर्व० ९।९।१०)

## ॥ पदपाठः ॥

मन्त्रयन्ते । दिवः । अमुष्य । पृष्ठे ।
विश्वऽविदः । वाचम् । अविश्वऽविन्नाम् ॥

१६७ वाचो व्याहृतयस्त्रिभौवनपदास्ता भूर्भुवः स्वः परा-
स्तिस्रस्ताः खलु मातरस्त्रिजगतां चिज्ज्योतिरप्योत्तराः ॥
ये लोकात्रितये त्रयश्च पितर स्तेऽग्नीन्द्रसूर्यात्मकाः
सर्वेषामपि पालकाश्च जनका वाग्भिर्युता ज्योतिषाः ॥ ७ ॥

१६८ सर्वाधारकलोकशक्तिकतनू स्तिस्रोऽत्र मातॄः सतीः
ज्योतिर्मूर्तिमयान् प्रकाशनपरान् अग्नीन्द्रसूर्यान् पितॄन् ॥
एकः सन् स्वयमेव बिभ्रदखिलान् ऊर्ध्वः परो व्यापकः
तस्थौ पूर्णकलान्वितः स भगवान् त्सन् पारमैश्वर्यभाक् ॥ ८ ॥

१६९ ईम् पूर्णं पुरुषं परं तममृतं सर्वात्मसत्त्वात्मकं
विश्वाध्यक्षमनन्तशक्तिसचिवं सत्यंस वसत्त्वात्मकम् ॥
सर्वे ते खलु मातरश्च पितरोन ग्लापयन्त्युत्तमं
नान्ये केचिदपि स्पृशन्ति सहसा नार्हन्ति तं बाधितुम् ॥ ९ ॥

१७० एतां वास्तविकीं स्थितिं भगवतः कीर्तिं महाशक्तिकां
वाचं तामिह विश्ववेदसमिमां विश्वैरमेयात्मिकाम् ॥
विश्वे विश्वविदः समर्थपुरुषास्ते मन्त्रयन्तेऽर्थतो
व्योम्न्यन्तः परतः स्थिता दिविषदो विश्वैरविन्नां स्वतः ॥ १० ॥

१७१ विद्युच्छक्तिनिनादचित्यनुकृतिः सा व्योमतन्मात्रका
ब्रह्माण्डाक्षरशब्दशक्तिकरवा सूक्ष्मध्वने र्वाचका ॥
ईङ्काराक्षरशब्दबीजवचनां तां सद्रसां सुस्वरां
वाचं मन्त्रवदाचरन्ति मुनयो नित्यं जपन्त्यान्तराम् ॥ ११ ॥

१७२ "इङ्" काराक्षरतः सुवाच्यमचलं तन्नादलक्ष्यं परं
प्राज्ञा विश्वविदोऽत्र विश्वसुविदं तं संविदोपासितुम् ॥
सर्वज्ञानमयीमनन्यविदितां सद्वाचकैकाक्षरां
वाचं तां परमात्मनश्चितिमयीम् "ईम्" मन्त्रयन्ते सदा ॥ १२ ॥

१७३ पूर्णं तत् परमं प्रचेतनमयं संवित्सुसत्त्वायनं
प्रत्नं वस्तु परोक्षमीशवचनं वागक्षरैकाननम् ॥
"ईम्" इत्येव निदर्शयन् स्वरवतः सं वेदितं श्रूयतां
"सीम्" इत्येव पुनर्निजस्वरमुखाद् भूयस्तदाश्राव्यताम् ॥ १३ ॥

॥ अपरोक्षे अन्तरात्मनि ईङ्कारः ॥

## ॥ ऋङ्मन्त्रः ॥

य ईं चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य ॥

( पराशरः ) ( ऋ० मं० १ । ६७ । ७ )

## ॥ पदपाठः ॥

यः । ईम् । चिकेत । गुहा । भवन्तम् ।

आ । यः । ससाद । धाराम् । ऋतस्य ॥

१७४ अध्यात्मं सकलान्तरेऽपि निहितः सञ्चेतनैकात्मको
यो ऽध्यास्तेऽत्र गुहान्तरे प्रणिहितः सन् "ईञ्" चिकेत स्वयम् ॥
योऽन्तस्तत्र ससाद वाचममृतां चित्सत्त्वधारामयीं
शान्तः सोऽत्र रमेत वस्तुवचनां ध्यानन् पराम् "ईम्" इति ॥ १४ ॥

१७५ प्रज्ञानेन पराशरो मुनिवरः प्राज्ञं समस्तान्तरं
प्राज्ञात्मानमिमं प्रचेतनपरं वह्निं च वैश्वानरम् ॥
प्रत्यक्षादपरोक्षतश्च परतः पूर्णानुभावान्वयात्
प्रत्यादर्शयद् "ईम्" इति स्वरपरं वागात्मधारान्वयम् ॥ १५ ॥

१७६ सर्वेषामपि चेश - जीव - जगतां शीर्षण्यनादाक्षरां
सौम्यानन्दसुशान्तिसद्रसरतां सानाहतां चित्स्वराम् ॥
स्वान्तर्यां च चिदात्मवाचकपरां वाचं समस्तान्तरां
सर्वज्ञाः कवयः स्वमूर्धनिरताम् "ईम्" मन्त्रयन्ते पराम् ॥ १६ ॥

ब्रह्मणस्पतेः वाक्स्वरूपः ईङ्कारः ॥

ब्रह्मणस्पतिमीयुषीं वाचमेतां प्रतीचीं विप्राः सन्धिया शृणोतन ॥
छन्दस्तुभमृकर्तीं जगतीं यदीं वाचं धिया कृणुते ब्रह्मणस्पतिः ॥

( छन्दोदर्शनम् ) ( अनु० २ । ७ )

## ॥ पदपाठः ॥

ब्रह्मणः । पतिम् । ईयुषीम् । वाचम् । एताम् ।
प्रतीचीम् । विप्राः । सम् । धिया । शृणोतन ॥
छन्दःऽस्तुभम् । बृहतीम् । जगतीम् । यत् । ईम् ।
वाचम् । धिया । कृणुते । ब्रह्मणः । पतिः ॥

१७७ ब्रह्मात्मानमुपेयुषी सुमनसा छन्दस्वती चित्स्वरा
ब्रह्मैकाक्षरसत्त्वसुस्वरपरा स्वान्तः प्रतीची परा ॥
ब्रह्मानन्दपरा तदीमिति पदा सत्संविदाऽऽश्रीयतां
ब्रह्मात्मैव निजामनुस्वरचिताम् "ईम्" इत्यनुश्रूयताम् ॥ १७ ॥

## ॥ "ईम्" इति ब्रह्मणस्पतेः गुह्यं नाम ॥

ब्रह्मणस्पतेर्यः समिदं गृणाति श्रदस्मै दधानोऽमृतं नाम गुह्यम् ॥
तस्येदु विश्वमिदं भवति भद्रं ब्रह्म तदीञ् ज्योतिर्विश्वस्य दर्शयत् ॥

( छन्दोदर्शनम् ) ( अनु० ३ । १ । ८ )

## ॥ पदपाठः ॥

ब्रह्मणः । पतेः । यः । सम् । इदम् । गृणाति ।
श्रद् । अस्मै । दधानः । अमृतम् । नाम । गुह्यम् ॥
तस्य । इत् । ऊम् इति । विश्वम् । इदम् । भवाति । भद्रम् ।
ब्रह्म । तत् । ईम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

१७८ छन्दोबीजकमन्त्रवर्णपरकं वाक्सत्त्वनश्चित्पतेः
प्रच्छन्नं दिवि नाम गुह्यममृतं वाग्ब्रह्मणः सत्पतेः ॥
छन्दस्यं परमीमिति स्वरणतस्तद् ब्रह्म वाचस्पतेः
छन्दोदर्शनवाङ्मुखे समुदितं ज्योतिः परं दर्शयत् ॥ १८ ॥

॥ ईङ्कारो गुप्तः प्रणवः ॥

१७९ गुप्तोऽयं प्रणवः स वेदहृदयाच्छन्नो रहस्यार्थकः
गुह्यं नाम सुभद्रदं भगवतः सद्ब्रह्मसत्त्वार्थकम् ॥
छन्दोदर्शनतः प्रदर्शितमिदं गुह्यार्थसन्दर्शकं
विश्वस्य प्रतिबोधकं श्रुतिविदां ज्योतिः परं दर्शयत् ॥ १९ ॥

॥ यजुर्मन्त्रे स्पष्टतरः ईङ्कारः ॥

ईङ्कारा॒य॒ स्वाहा॑ । ईङ्कृता॒य॒ स्वाहा॑ ॥

वैश्वदेवकाण्डे, अश्वमेधे ( तै० यजुः सं० ७, १, ८, १-२ )

१८० ईङ्कारः परमो रस-स्वरमय श्छन्दोयजुर्मन्त्रकः
सन्नेकाक्षरसत्त्वकोऽनुकरणाद् ब्रह्मात्मको वैदिकः ॥
"ईङ्काराय" सदात्मचित्स्वरभृते "स्वाहा" नमस्तेऽर्पितं
नादानन्दकृद् "ईङ्कृताय" भवते "स्वाहा" मनस्तर्पितम् ॥ २० ॥

१८१ अश्वानां परतैजसैकवपुषां सूर्यस्य सर्वात्मनः
रश्मीनां सरसस्वरानुकरणाद् "ईम्" इत्युदीर्णः स्वनः ॥
बाह्याभ्यन्तरचेतनात्मकिरणाद् यज्ञोऽश्वमेधेऽर्च्यते
ब्रह्मात्मैव हि संविदां स्वरचिताम् "ईम्" इत्युपामन्त्र्यते ॥ २१ ॥

१८२ यद् वै मन्त्रपदे "कमीमिदु" पदं प्रायः प्रति श्रूयते
यास्केनोक्तमनर्थकं प्रतिचितं तत् पादसम्पूरणे ॥
कं ब्रह्मेति मतं शिरोऽम्बुसुखकं सद्वस्तुसन्दर्शकं
सानुस्वार-तुरीयकस्वरपदाद् "ईम्" इत्यपि स्वार्थकम् ॥ २२ ॥

१८३ तच्छब्दः खलु सर्वनामपरको नो कस्यचिद् वाचकः
प्राधान्येन निदर्शकः प्रतिभवेत् प्रायः परोक्षार्थकः ॥

"ओङ्कारः" प्रथितः स्वरानुकरणात् प्राप्तः सदित्यर्थकः
लोके सोऽयमनर्थकोऽपि विदितो नो नामरूपार्थकः ॥ २३ ॥

१८४ औचित्येन परात्मवस्तुपरकाद् ब्रह्मात्मसद्वाचकाद्
औपास्येन च संविदे सुविहितः सर्वैः समः स्वीकृतः ॥
ध्यानाद् धारणया समाधिरसदः स्वालम्बनैकार्थकः
ध्येयार्थैकसुनिष्ठयाऽऽत्मनिरतैः सद्वस्तुसम्प्रापकः ॥ २४ ॥

१८५ "ईङ्कारो" ऽयमनर्थकोऽपि जगति प्रायोऽप्रसिद्धः पुनः
यत्किञ्चित्परवस्तुबोधपरकः प्रत्यक्षवाक्सुस्वनः ॥
प्रामाण्येन च वेदमन्त्रमुखतो भूयोऽप्यनु श्रावितः
प्राधान्यात् प्रथमे च पुंसि वचने स्यान्मध्यमे चोत्तमे ॥ २५ ॥

१८६ ईमित्येवमखण्डचिन्निनदतः स्वर्वेत् सदाऽस्ति स्वयं
सीमानामविभक्तिलिङ्गवचनैर्न व्येत्यथो अव्ययम् ॥
मौनेनान्तरनुस्वरत्यनुलवं सत्सामरस्यान्वयं
सौम्यानन्दरसानुभावकलया पूर्णं स्वभावाद्द्वयम् ॥ २६ ॥

१८७ ईमित्येतदिदीति धातुपरतःस्तत्पारमैश्वर्यतः
सानुस्वारपरैकसत्त्वकनुमा सद्बिन्दुना योगतः ॥
सत्येन्द्रेन्द्रियसत्त्वसद्रसचिता तद्वाक्स्वरैकान्वयात्
साक्षाद् ब्रह्मपराक्षरं समुदगात् पूर्णात्मकादव्ययात् ॥ २७ ॥

१८८ वाच्यं वस्तु परार्थरूपकपरं ध्वन्यं च लक्ष्यं परं
वाग् वै वाचकशक्तितत्त्वकपरा संवित्स्वरात्मा परा ॥
ऐकात्म्याज्जगद् - ईश - जीवपरतस्तत्त्वत्रयैकान्वयाद्
"ईम्" इत्येकमिहाक्षरं प्रभवति प्रत्येकशोऽपि स्वयम् ॥ २८ ॥

१८९ प्रज्ञानं परमात्मचिद्रसतमं पूर्णं हृदय्यं समं
सञ्ज्ञानादिकपूर्णषोडशकलं प्राज्ञात्मभावोत्तमम् ॥
साक्षात्कारहृदोदितं हिततमं प्राणात्मकं सत्तमं
साक्षाद् ब्रह्म परात्मकं तततमं पूर्णात्मकं चित्तमम् ॥ २९ ॥

१९० ब्रह्मैवेदमदर्शमित्यनुनयात् पूर्णाद् इतीन् इत्यतः
ब्रह्मानन्दरसानुभावमुदितं हर्षस्वरोद्गारकः ॥
दृष्टं सन्तममुं परात्मपुरुषं नाम्नेन्द्रमाचक्षते
दीप्तं तं परमिन्धमक्षिपुरुषं दक्षात्मकं वीक्षते ॥ ३० ॥

१९१ इन्धो दक्षिणनेत्रगोऽक्षिपुरुषः सूर्यः स इन्द्रात्मकः
तद्वामेऽक्षिणि राजतेऽस्य च सुदृग् वामा विराट् तत्सती ॥
तुर्या साऽक्षरमातृका समुदगाद् "ईम्" वामनेत्रात्मिका
शक्तिः सोमरसात्मशान्तिकलया पूर्णेन्दुचिच्छीर्षिका ॥

१९२ ब्रह्मानन्दभरेण सोमकलया शान्त्या स्वरोच्चारितं
दृष्ट्वाऽदर्शमिती "इन्" इति स्वकलया पूर्णं प्रहर्षेरितम् ॥
इन्द्रे चेन्धपदे समार्थपरतस्तत्पामैश्वर्यतः
सद्योगादिदि धातुनाऽपि च नुमा सिद्धं प्लुताद् "ईम्" इति ॥३२॥

॥ इति षष्ठी कला सम्पूर्णा ॥

ईमितीदमीशनाम गुह्यमेव शंसितं
सीमितं सदिन्द्रहृत्प्रचेतनाधिसंशितम् ।
वेदवाचि गुप्तमप्यनर्थमप्रकाशितं
दैवरातहृत्तपः सुशोधितं प्रकाशितम् ॥ ६ ॥

## ॥ सप्तमी शक्तिप्रणवकला ॥

### ॥ श्रीः ॥

१९३ "श्रीः" शक्तिः प्रतिसंश्रिता स्वपुरुषे सा श्रद्धया श्रूयतां
श्रीशात्मप्रणवाक्षरात्मवपुषे श्रद्धात्मिका श्रीयताम् ॥
शक्त्या भक्ति-विभूति-भुक्तिरसदा सा श्रेयसोपास्यतां
शान्त्याऽऽनन्दरसानुभावसुहृदा निश्श्रेयसायास्यताम् ॥ १ ॥

१९४ पूर्णात्मा परमश्चिदात्मपुरुषः श्रीपारमैश्वर्यतः
प्रज्ञो विश्वविभूतिसत्त्ववपुषा वाचाऽऽत्मशक्त्याऽन्वितः ॥
प्राज्ञात्मा प्रणवस्वरात्मकलया लक्ष्म्या श्रिया चाश्रितः
पूर्णानन्दरसेऽन्तरे विरमते संवित्समुद्रोच्छ्रितः ॥ २ ॥

### ॥ ऋङ्मन्त्रः ॥

य इमा विश्वा भुवनानि जुह्वद्-ऋषिर्होता न्यसीदत् पिता नः ॥
स आशिषा द्रविणमिच्छमानः प्रथमच्छद् अवराँ आ विवेश ॥

( विश्वकर्मा ) ( ऋ० मं० १०।१।१ )

### ॥ पदपाठः ॥

यः । इमा । विश्वा । भुवनानि । जुह्वत् ।
ऋषिः । होता । नि । असीदत् । पिता । नः ॥
सः । आशिषा । द्रविणम् । इच्छमानः ।
प्रथमऽच्छत् । अवरान् । आ । विवेश ॥

१९५ यज्ञात्मा परमः स पूर्णपुरुषः सन् त्सर्वहुद्यज्ञकृद्
यज्ञात्सन्यभि सञ्जुहाव तपसा भूतानि विश्वान्यपि ॥
भूयः सोऽन्वजुहोत् तपोग्निवदने स्वात्मानमथ्यन्ततः
भूमानन्दरसे विलीन इव सन् पूर्णो विरामात्मना ॥ ३ ॥

## ॥ ऋङ्मन्त्रः ॥

तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ॥
छन्दांꣳसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥

( नारायणः ) ( ऋ० म० १० । ९० । )

## ॥ पदपाठः ॥

तस्मात् । यज्ञात् । सर्वऽहुतः । ऋचः । सामानि । जज्ञिरे ।
छन्दांꣳसि । जज्ञिरे । तस्मात् । यजुः । तस्मात् । अजायत ॥

१९६ तस्मादेव परात्मनः समुदगाद् यज्ञात्मनः पूरुषात्
साक्षाद् ब्रह्ममयी त्रयी रसमयी छन्दस्स्वरा ज्योतिषा ॥
सर्वज्ञानसुपूर्णसत्त्वकल्या सर्वज्ञकल्पाऽञ्जसा
सा ऋक्-साम-यजुर्मयी विजयते मन्त्रात्मना छन्दसा ॥ ४ ॥

## ॥ यजुर्मन्त्रः ॥

अहे बुध्निय मन्त्रं मे गोपाय ।
यमृषयस्त्रयीविदा विदुः ॥
ऋचः सामानि यजूꣳषि ।
सा हि श्री रमृता सताम् ॥

॥ श्रीः ॥

१९७ सारुद्रेणसुगोपिता स्वरचिता गुप्ताऽऽत्मना छन्दसा
वाग् ब्रह्मात्मनि संहिता रसचिता सत्यात्मना चिद्रसा ॥
साक्षाद् ब्रह्म सती चिदात्मनिरता श्रद्धात्मना श्रूयतां
"सा हि श्रीरमृता सतां" श्रुतिमतां सर्वात्मनाऽऽश्रीयताम् ॥ ५ ॥

१९८ सा ऋक् चित्स्वरसंहिता स्तुतिमयी छन्दस्वती स्वर्वती
सा यज्ञेन यजुष्मती कृतिमयी चक्षुष्मती चिद्वती ॥
साम्ना सामवती रसस्वरमयी साऽऽत्मन्वती प्राणती
सा वाङ् मन्त्रमयी त्रयी श्रुतिमयी संविद्वती श्रीः सती ॥ ६ ॥

॥ ऋङ्मन्त्रः ॥

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ॥
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधि वाचि ॥

( बृहस्पतिः ) ( ऋ० मं० १० । ।२ )

॥ पद पाठः ॥

सक्तुम्ऽइव । तितउना । पुनन्तः ।
यत्र । धीराः । मनसा । वाचम् । अक्रत ॥
अत्र । सखायः । सख्यानि । जानते ।
भद्रा । एषां । लक्ष्मीः । निऽहिता । अधि । वाचि ॥

॥ लक्ष्मीः ॥

१९९ सत्त्वान्नेन हि सत्त्वशुद्धिकरणे दोषादितः सर्वथा
चालन्या परि शोधयन्ति करणै र्यत्नेन सक्तुं यथा ॥
सत्येऽन्तस्तपसा शितेन मनसा वाचं पुनन्तोऽन्तरे
सत्यामेव वदन्ति ते मुनिवराः सत्यात्मनिष्ठाः परे ॥ ७ ॥

२०० तेषां वाचि सदर्थबोधकलया चित्संविदेकात्मिका
सत्या या परशक्तिकाऽऽत्मनिहिता लक्ष्मीः सुभद्रात्मिका ॥
सैवेशात्मनि सत्यसंविदुदये सत्यं प्रति ज्ञाप्यते
सैव श्रीः परमात्मवस्तुपरया सच्छ्रद्धया प्राप्यते ॥ ८ ॥

२०१ श्री - गो - भू - घनधान्यवैभवकला सर्वस्वरस्योत्पला
शश्वज्जीवनशक्तिशान्तिविमला प्राणप्रसादोज्ज्वला ॥
श्रेयस्सत्त्वविभूतिचित्तिरसदा पापघ्निकार्थप्रदा
श्रेया वाग्रससत्त्ववर्षनिनदा विद्यात्रयी सर्वदा ॥ ९ ॥

२०२ सद्धर्मोर्जितयज्ञकर्मकुशला धीयोगभूहृन्मयी
सद्विद्या सदसद्विवेकशबला सर्वात्मसंविन्मयी ॥
सच्छ्रद्धा नवभक्तिरत्नलषिता सेवादिसम्पन्मयी
सत्यात्मोदितपूर्णसत्त्वलसिता सा श्रीः परा चिन्मयी ॥ १० ॥

२०३ श्रीमाता परमात्मना सुलसिता पूर्णा परा देवता
श्रेयःसाधनसत्क्रियासुललिता प्रेमैकरस्याश्रिता ॥
श्रद्धात्मोदितसंविदाऽऽन्तरहृदा निश्श्रेयसे श्रीयतां
सा शक्तिप्रणवात्मवाक्चिदमृता श्रीः सर्वदाऽऽश्राव्यताम् ॥

॥ श्रीसूक्ते लक्ष्मीमन्त्रः ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ॥
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

२०४ श्रीसूक्ते परशक्तिकां चितमयीं तुष्टाव विष्णोः सतीं
तां गुप्तप्रणवाक्षरां मनुमयीं तां पद्मिनीमीमिति ॥
शक्राभीष्टशरासमींस्वरपरं तत् तन्त्रशास्त्रान्तरे
श्रीमित्येव समाश्रितं हि कमलाबीजात्ममन्त्राक्षरम् ॥ १२ ॥

२०५ शक्तेरीमिति पद्मिनीमनुमयी लक्ष्मीः स्वसत्त्वात् समा
श्रीं बीजेऽन्तरिता सुपूर्णकलया चिल्लक्षणा सत्तमा ॥
एकेनैव हि शक्तिबीजमनुना सैकाक्षरेणास्यतां
तच्छक्तिप्रणवाक्षरेण मनुना सा श्रीः सदोपास्यताम् ॥ १३ ॥

२०६ श्रीः सेवार्थपरा सदाश्रयपदा श्रिञ्धातुतो गम्यते
सेवा सा त्रय-पञ्च-सप्तकपदा धीयोगतो भाव्यते ॥
सच्छ्रद्धात्मिकया श्रिया वसुपदं सत्यं हि वस्त्वाप्यते
सा श्रध्दैव हृदात्मिका क्रतुविदां यज्ञस्य पत्नीष्यते ॥ १४ ॥

२०७ तस्मादेव हि सप्तधीन्द्रियगणात् सा संविदानाऽऽत्मना
सर्वस्मात् प्रभवेत् पराऽऽन्तरतमा वागष्टमी ब्रह्मणा ॥
साष्टाङ्गै र्विहिता नमस्कृतिपरा श्रध्देह सेवात्मिका
सा भक्तिः परमात्मतन्मयपरा श्रीशक्तिसत्तात्मिका ॥ १५ ॥

२०८ वागेवाष्टपदीह धीन्द्रियपदैः प्राणैश्च तैः सप्तभिः
शक्त्या चेतनया भवेन्नवपदी पूर्णेन्दुना बिन्दुना ॥
श्रद्धात्मैव चिदात्मनः परतनूर्वागेकसत्त्वात्मिका
श्रीशक्तिः परमात्मिका प्रभवति श्रेयस्सु निरश्रेयसे ॥

२०९ पूर्णात्मानममुं परं स्वपुरुषं वाचा परश्रद्धया
पूर्णा श्रीर्मनसा प्रणौति नमसा सत्यात्मसम्बद्धया ॥
तच्छक्तिप्रणवाक्षरात्मतनुभृज्ज्ञानादियोगोदयात्
पूर्णानन्दरसात्मना विरमते सद्ब्रह्मसत्त्वाश्रयात् ॥ १७ ॥

२१० श्रीः श्रद्धाश्रमशक्तिशान्तिशबलं स्वः श्रेयसं शं शिवं
रेफो रक्तरजोऽग्नितैजसपरं रम्यं सरस्यं रवम् ॥
ईशानीपदमीङ्कृतेः समुदगात् पूर्णात् तुरीयात् स्वरात्
पूर्णेनैव हि बिन्दुना समभवत् पूर्णं विरामाक्षरम् ॥ १८ ॥

॥ यजुर्मन्त्रः ॥

श्रीश्च ते लक्ष्मीश्च पत्न्यौ, अहोरात्रे पार्श्वे, नक्षत्राणि रूपम्, अश्विनौ व्यात्तम् ॥

( शुक्लयजुः सं० ३१। २२ )

॥ श्रीः-लक्ष्मीः ॥

२११ श्रीविष्णोः पुरुषस्य सत्त्वगुणतो ज्ञानप्रधानात्मनः
"श्रीर्लक्ष्मी" रिति ते उभे प्रियतमे इच्छा-क्रियाशक्तिके ॥
तस्यैवेह परात्मनोऽङ्गपरके तत्सत्त्वबोधोचिते
नाद-ज्योतिपरे तथाऽनुगुणके ते नाम-रूपात्मिके ॥ १९ ॥

२१२ बाहू आयुधरूपके प्रभवतस्तेशङ्खचक्रात्मिके
शक्ती तत्त्वगुणक्रिये उभयतस्ते शब्दतेजोऽर्थके ॥
बाह्याभ्यन्तरसत्त्वरूपमुदिते ते वाङ्मनोरूपके
भूयास्तां भुवि भद्रदे त्रिजगतां मात्रात्मचिद्रूपके ॥ २० ॥

२१३ हस्ताप्ते वरदाभयप्रकलिते तल्लक्ष्ममुद्राङ्किते
पत्न्यौ योषिदभीष्टदिव्यवपुषौ बाहुद्वयालिङ्गिते ॥
श्रीस्तत्राश्रयसत्पदा चितिपरा सा स्वाश्रयप्रापिका
लक्ष्मीर्लक्ष्मगुणेन लक्ष्यनियता सद्वस्तुसंलक्ष्यका ॥ २१ ॥

२१४ सर्वार्थे श्रयते स्वयं स पुरुषः शक्तिं परां स्वां श्रियं
सर्वार्थेषु सदात्महृत्सचिवया सोऽपि श्रियाऽऽश्रीयते ॥
लक्ष्मीर्लक्षपति स्वमान्तरतमं तत्सम्पदां लक्षणा
लक्ष्म्या लक्षणया परात्मकलया पूर्णः पुमान् लक्ष्यताम् ॥ २२ ॥

२१५ श्रीर्लक्ष्मीश्च विसर्गकस्वरमुखात् सन्मात्रसत्त्वोन्मुखात्
तद्बिन्दुद्वययोगतः सममुखात् सर्वात्मसंविन्मुखात् ॥
एकस्मात् परमात् स्वसाक्षिपुरुषात् सेच्छाक्रियासत्त्वके
आस्तां ते रसतेजसोदितसम् ते सोमसूर्यात्मके ॥ २२ ॥

२१६ पूर्वस्मिन् प्रणवद्वयेऽपि च शिरोबिन्दुस्तुरीयः श्रुतः
पूर्णः सोऽयमपादतत्त्वकपरो योऽन्त्योऽग्रियोऽप्याश्रितः ॥
एकः सन् प्रथमः स पूरुषपरो द्वेधात्मशक्त्योदितः
स्याच्छक्तिप्रणवे विसर्गरुचिरो योगैकसत्त्वोर्जितः ॥ २४ ॥

॥ कृष्णयजुर्मन्त्रः ( तै० आ ) ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ॥

॥ ह्रीः, लक्ष्मीः ॥

२१७ "ह्रीर्लक्ष्मीश्च" समास्थिते भगवतः पत्न्यौ तु शाखान्तरे
पार्श्वे पार्श्वगते च ते प्रभवतो युक्ते अहोरात्रके ॥
ते सूर्यात्मन एव कालपरतः शक्त्योषसा नक्तया
ते तेजोरससत्त्वके विलसत स्ते चाश्विनोः सत्तया ॥ २५ ॥

२१८ ते मित्रावरुणात्मसत्त्वकलिते स्यातामहोरात्रके
ब्रह्म-क्षत्रसुतैजसे सममिते युक्ते क्रतूदक्षके ॥
श्रीर्लक्ष्मीश्च विसर्गशक्तिरुचिते ते वामदक्षात्मिके
ते संवित्कृतिशक्तिके हरिचिते तेजोरसैकात्मिके ॥ २६ ॥

२१९ "ह्रीः" शक्त्या हरतीति धातु कृतितो व्योमासतेजोमयी
"ह्" त्वाकाशसुबीजकाक्षरपदं "रेफः" प्रकाशोऽनलः ॥
"ई" शान्तिर्भवतीह वामनयना शक्तिर्विसर्गात्मिका
सेशानी भगवत्सती भगवती सिद्धा क्रिया शक्तिका ॥ २७ ॥

२२० शक्तेस्तत् परबीजमन्त्रकमिदं "श्रीं ह्रीम्" इति श्रूयते
शाक्तै : सा कमलात्मिकाऽपि च महालक्ष्मीरिति स्तूयते ॥
"ह्रीं" बीजं भुवनेश्वरीमनुमयं संसिद्धमेकाक्षराद्
"ओं ह्रीं श्रीम्" इति च त्रितारवचनं श्रीचक्रराज्ञीपरम् ॥ २८ ॥

२२१ बिन्दुः सोऽत्र विसर्गमूल उदगात् पूर्वः स्वरात्माश्रितः
सोऽनुस्वार इति श्रुतः श्रुतिमुखात् सिद्धः पराशक्तिकः ॥
पूर्णब्रह्मपरः परात्मकलया पूर्णो विरामात्मकः
वाक्छक्तेः परमं तदेतदखिलं ब्राह्मीकलावैभवम् ॥ २९ ॥

२२२ एकेनैव हि मूलबीजमनुना "श्रीम्" इत्युभे शक्तिके
श्रीयेतां तदुपासने सममतेः सात्म्येन सैकात्मिके ॥
श्रीर्भूमिस्तदिलाभिधा वसुमती सीतेति सञ्ज्ञास्तुता
सेन्द्रोपेन्द्रसमास्थिता प्रतिहिता विश्वस्य धृत्यै धृता ॥ ३० ॥

२२३ श्रीर्भूरित्यपि केचिदत्र विविदुर्विष्णोस्तु पत्न्यौ परे
श्रीः श्रेयस्करसम्पदभ्युदयकृत् सर्वाश्रया राजते ॥
भूर्भूमात्मकसत्त्वशक्तिरुदगादाधारशक्तिः परा
भूतानां जनने स्थितौ विलयने सा मूलभूता मता ॥ ३१ ॥

२२४ वेदेषु प्रणवाक्षरत्रयमिदं दिव्यध्वजाभ्युन्नतं
वेद्यार्थात्मकसम्पदभ्युदयदं ज्ञानप्रकाशोदितम् ॥
वाग्-ब्रह्मात्मसमस्तसत्त्वरसदं सच्छान्तिशक्त्योर्जितं
विश्वस्मिन् भवतु स्वयं विजयदं तद् "दैवरातोद्धृतम् ॥ ३२ ॥

॥ इति सप्तमी कला सम्पूर्णा ॥

श्रीरितीह विष्णुशक्तिसञ्ज्ञकं निसर्गकं
विश्वतो विभूतिरूपसृष्टिकद् विसर्गकम् ॥
श्रीमितिस्वतन्त्रमन्त्रशक्तिबीजसुस्वरं
श्रीयतां श्रुतेश्च दैवरातवाग्रसाक्षरम् ॥ ७ ॥

ई ॐ श्रीः

ॐ भूर्भुवः स्वः

# तत्सवितुर्वरेण्यं
# भर्गो देवस्य धीमहि
# धियो यो नः प्रचोदयात्

देवरातः गोकर्ण

# ॥ अष्टमी गायत्री कला ॥

## ॥ गायत्री वेदमाता ॥

२२५ गायत्रिमन्त्राक्षरवाक् परात्मिका गायत्यलं ब्रह्म परं चिदात्मिका ॥
सा त्रायते प्राणभृतः स्वगायकान् साऽऽमन्यते प्रेमहृदात्मगाथिका ॥ १ ॥

२२६ गायत्रसच्छन्दसि संहितात्मा गाता ऋषिर्मन्त्रदृगिन्द्रसत्त्वा ॥
मित्रादुदीर्णस्तपसा स विश्वामित्रः प्रसिद्धो भुवि पारदृश्वा ॥ २ ॥

२२७ ऐन्द्रात्मनो गाथिन एव राज्ञः पुत्रः प्रभावानिह सत्प्रतिज्ञः ॥
राजर्षिरादौ प्रथितः स धीरः राजन्यतेजोबलतः सुवीरः ॥ ३ ॥

२२८ गायत्रिमन्त्रेण तपः प्रभावात् तद्ब्रह्मवाचा सवितुः प्रसादात् ॥
ब्रह्मर्षिरेव प्रबभूव योगाच्छकाः स सृष्ट्यादिकृते प्रयोगात् ॥ ४ ॥

२२९ ज्ञानेन योगात् तपसा समाधेः साक्षात्कृतेरात्मन ईशबुद्धेः ॥
पूर्णानुभावाभ्युदयादिसिद्धेः स मन्त्रदृक् सञ्जयति प्रसिद्धेः ॥ ५ ॥

२३० गायत्रिमन्त्राभ्युदितेन जन्मना धीयोगसंसाधितयज्ञकर्मणा ॥
सत्संविदौपासनकर्मयोगतो धीमान् स विद्वाञ् छ्रुतिमान् स कर्मवान् ॥ ६ ॥

## ॥ ऋङ्मन्त्रः ॥

अ॒ग्निर॑स्मि॒ जन्म॑ना जा॒तवे॑दा घृ॒तं मे॒ चक्षु॑र॒मृतं॑ म आ॒सन् ॥
अ॒र्कस्त्रि॒धातू॒ रज॑सो वि॒मानोऽज॑स्रो घ॒र्मो ह॒विर॑स्मि॒ नाम॑ ॥

( विश्वामित्रः ) ( ऋ० मं० ३ । २६ । ७ । )

अ॒ग्निर॑स्मि॒ जन्म॑ना०-

त्रि॒धातु॑र॒र्को रज॑सो वि॒मामानोऽज॑स्रं ज्योति॑र्ह॒विर॑स्मि॒ सर्व॑म् ॥

( सामवेदः )

## ॥ पदपाठः ॥

अ॒ग्निः । अ॒स्मि॒ । जन्म॑ना । जा॒तऽवे॑दाः । घृ॒तम् । मे॒ । चक्षुः॑ । अ॒मृत॑म् । मे॒ । आ॒सन् ॥
अ॒र्कः । त्रि॒ऽधा॒तुः । रज॑सः । वि॒ऽमानः॑ । अज॑स्रः । घ॒र्मः । ह॒विः । अ॒स्मि॒ । नाम॑ ॥

## ॥ पद पाठः ॥

त्रि॒ऽधा॒तुः । अ॒र्कः । रज॑सः । वि॒ऽमानः॑ । अज॑स्रम् । ज्योतिः॑ । ह॒विः । अ॒स्मि॒ । सर्व॑म् ॥

२३१ स जातवेदाः स्वविदाऽग्निरात्मवान् सर्वज्ञ आसीत् स्वयमिन्द्रसत्त्ववान् ॥
जातात् समाविर्हितविश्ववेदतो ज्ञानात् प्रजातः स जिगाय विश्वतः ॥ ७ ॥

२३२ तेजश्च चक्षुः परमस्य दिव्यं नित्यं जगच्चक्षुरुदेति सौर्यम् ॥
तेजोरसाभ्यां परिपूर्णमास्यं सेन्द्राग्नितेजोमयवाक्पुरस्यम् ॥ ८ ॥

२३३ अर्कस्त्रिपात् सः त्रिजगत्प्रधानः पादैस्त्रिभिर्विश्वमिदं मिमानः ॥
ज्योतिस्स्वरूपो भुवि भोक्तृरूपो भोग्यस्तथा सर्वहविस्स्वरूपः ॥ ९ ॥

२३४ योगेन सर्वात्मकभावसिद्धो दिव्यानुभावोदितवित्तसमृद्धः ॥
विश्वस्य सन्मित्रमिवाभिवृद्धः ब्रह्मर्षिनामादिविभूत्यभीद्धः ॥१०॥

२३५ स वै स्वतन्त्रस्तपसा समर्थः सृष्ट्यादिकार्येऽपि बभूव सार्थः ॥
प्रापञ्चिके विश्वविभूतिकेऽर्थे गायत्रिमन्त्रेण हि पारमार्थे ॥११॥

२३६ द्विजत्वसत्त्वाद्यनुभावसिध्यै ब्रह्मात्मसाक्षात्कृतिचित्तसमृध्यै ॥
सन् सत्त्वशुध्यादिकृते समर्थो गायत्रिमन्त्रः प्रभवेद् यथार्थः ॥१२॥

॥ गायत्रीमन्त्रः ॥

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥
धियो यो नः प्रचोदयात् ॥

( विश्वामित्रः ) ( ऋ० मं० ३। ६२। १० ) साम० १४६२ ॥
वा० शुक्लयजुः ३, ३५ ॥ २२, ९ ॥ ३०, २ ॥ ३६, ३ ॥
तै० कृ० यजुः, १, ५, ६, ४ ॥ ४, १, ११, १ ॥
तै० आ० १, ११, २ ॥

## ॥ पदपाठः ॥

तत् । सवितुः । वरेण्यं । भर्गः । देवस्य । धीमहि ॥
धियः । यः । नः । प्रऽचोदयात् ॥

२३७ ज्योतिः परं " तत् सवितुर्वरेण्यं " प्रचोदकं प्राणभृतां धियां नः ॥
दिव्यात्मनः पूर्णपदं शरण्यं ध्यायाम आधारतयाऽधिगम्यम् ॥१३॥

२३८ गायत्रिसञ्ज्ञा परमन्त्रवर्णा तच्छन्दसाप्ता पद - पादपूर्णा ॥
परोक्षसद्ब्रह्मतनूरुदीर्णा प्रत्यक्षचिद् वाक् परमार्थपूर्णा ॥१४॥

२३९ गायत्रिमन्त्राक्षरशब्दसत्त्वा सद्वस्तुयोगेन परात्मसत्त्वा ॥
गायत्युदीर्णं परमार्थतत्त्वं वाग् - वस्तुसद्वाचकविन्महत्त्वम् ॥१५॥

२४० गायत्रिवाग् वाचकचित् समर्था गायत्यजस्रं परमं स्वमर्थम् ॥
ब्रह्मैव सा बोधयति स्वशक्त्या ब्रह्मात्मकं भावयति स्वचित्त्या ॥१६॥

२४१ गायत्रसच्छन्दसि संहिता स्वरा गायन्त्यनु ब्रह्म परं परापरा ॥
गायन्तमन्वेति निजार्थतत्परा सा त्रायते तं स्वरसेन वाक् परा ॥१७॥

२४२ ज्योतिर्वरेण्यं परमात्मनः स्वकं प्रकाशकं तत् परदेवतात्मकम् ॥
ध्यायाम आत्मन्यनुसन्दधीमहि प्रत्यक्तमं सर्वधियां प्रचोदकम् ॥१८॥

२४३ गायत्रसच्छान्दसमन्त्रवाचा पूर्णात्मशक्त्या परया स्ववाचा ॥
पूर्णात्मसत्त्वात्मकमेव दिव्यं ज्योतिर्वरेण्यं प्रति चिन्तनीयम् ॥१९॥

२४४ गायत्रिनाम्नी त्रिपदाऽक्षरात्मिका साऽष्टाक्षरैस्तैस्त्रिपदैः सुसंहिता ॥
सिद्धा चतुर्विंशतितत्त्वकाक्षरा मन्त्रात्मिका ब्रह्मतनूः समा स्वरा ॥२०॥

२४५ प्रत्यक्षतो ब्रह्म परं सदक्षरं मन्त्रात्मकं सामरसस्वराक्षरम् ॥
सत्यात्मकं वाचकसत्त्ववित्परं गायत्रिनाम्नाऽभ्युदियाय वाक्परम् ॥२१॥

२४६ षट्कुक्षिरूपात्मकतिर्यगूर्ध्वाधराततता साऽम्बरदिक्छरीरा ॥
दिश्याग्निचिन्निऋतिवायुरुद्रब्रह्माद्यनन्तात्मकदेवतासा ॥२२॥

२४७ अध्यात्ममान्त्रयषडङ्गरूपकं तत् सम्प्रसिद्धं हृदयं च शीर्षकम् ॥
शिखा ततः स्यात् कवचं त्रिनेत्रकं हस्तद्वयोत्ताडितमस्त्रकल्पकम् ॥२३॥

२४८ तत्रापि तन्मन्त्रमयाक्षरं नमः स्वाहा वषड्ढुं प्रति वौषडेव फट् ॥
सा पञ्चशीर्षाऽपि च पञ्चदिक्तता स्यात्स्येन तद्दैवतपञ्चकान्विता ॥२४॥

२४९ प्राग् दक्षिणा प्रत्यगुदक् परोर्ध्वा दिशो हि ताभिः सह पञ्चशीर्षा ॥
इन्द्रो यमोऽपां पतिरत्र सोमो ब्रह्मेति तद्देवतनामरूपे ॥२५॥

२५० अन्तर्हिता ज्ञानमयी सवृत्तिका श्रोत्रादिपञ्चेन्द्रियतत्त्वशक्तिका ॥
गायत्रिमन्त्रस्य बटूपनायने तस्योपदेशे विधिरुत्तरेऽयने ॥२६॥

२५१ गायत्रिनाम्नी परदेवतात्मिका चिज्ज्योतिरिन्द्रात्मकचेतनात्मिका ॥
अग्निर्मुखं तच्च हविर्भुगान्तरं बाह्यं तु तस्या वचनं तदुत्तरम् ॥२७॥

२५२ ब्रह्मा शिरश्चोर्ध्वततं स्वरात्मकं तस्याश्च विष्णुर्हृदयं परात्मकम् ॥
रुद्रः शिखा कुण्डलिनी चिदग्रका पश्चात् स्थिता सोर्ध्वमुखाऽसुनाडिका ॥२८॥

२५३ योनिः सवित्री पृथिवी प्रतिष्ठया सेयं स्वयं प्राणभृतां समाश्रया ॥
स्यात् सर्वभूतप्रसवैकहेतुका सर्वात्मवागग्रपदा प्रमातृका ॥२९॥

२५४ विश्वादिमा व्योमतनूर्दिगम्बरा तन्मात्रयाऽनुस्वरिताऽखिलान्तरा ॥
वागेव गायत्रिमुखा पराक्षरा चिदात्मिकेन्द्राग्निमुखाऽऽत्मवित्स्वरा ॥३०॥

२५५ प्राणादिधीपञ्चकसत्त्ववृत्तिका सद्ब्रह्महृद्रूपकचित्तिशक्तिका ॥
दिक्पञ्चकाभ्याततपञ्चशीर्षका रुद्रस्य तत् पाशुपताननात्मिका ॥३१॥

२५६ एवं हि गायत्रिमुखाधिगम्यं तत्त्वं गुणोपास्तिकृतेऽवलम्ब्यम् ॥
तद्वस्तुसद्बोध-सभावनाप्यं तत्त्वान्वयात् तन्मयतावगम्यम् ॥३२॥

॥ इति अष्टमी कला सम्पूर्णा ॥

गायति स्वयं परं निजस्वरेण वाक् परा
त्रायतेऽखिलं जगत् सदा चिदात्मिकाक्षरा ॥
दैवतेन्द्रतेजसा द्विजत्वचित्प्रपादिका
दैवरातवाक्सुधा ऋषित्वहृत्प्रसादिका ॥ ८ ॥

# ॥ नवमी गायत्रीतत्त्वकला ॥

## ॥ गायत्री पञ्चवक्त्रा ॥

२५७ गायत्रिमाता त्विह पञ्चवक्त्रा गुणादितत्त्वैः सह पञ्चवर्णा ॥
समासतो लोहितशुक्लनील सुवर्णहारिद्रसमानवर्णा ॥ १ ॥

२५८ सा श्वेतवर्णाऽखिलवर्णसत्पदा निसर्गतोनिर्मल-निष्कलङ्कदा ॥
स्वभावतः केवलसत्त्वचित्स्मिता सत्त्वात्मिका संविदलङ्कृता हृदा ॥ २ ॥

## ॥ साङ्ख्यायनसगोत्रा ॥

२५९ सङ्ख्यैव वाक् तत्त्वदृशाऽनु गीयते सङ्ख्येयवस्त्वात्मतथाऽनु नीयते ॥
तत्सङ्ख्ययैवाखिलवस्तु गम्यते सद्वस्तु सङ्ख्यायनमित्युदीर्यते ॥ ३ ॥

२६० सङ्ख्यात्मसच्छक्तिकवस्तुमात्रा साङ्ख्यायनी वागिह तत्सगोत्रा ॥
गायत्रिसच्छान्दसचित्तिमात्रा चिदात्मनाऽऽप्ता सहजाऽधिमात्रा ॥ ४ ॥

२६१ सङ्ख्यात्मिकानां सदसत्परात्मनां सत्त्वायनं ब्रह्म परं ससत्त्वनाम् ॥
परस्परात्मोदययोगसत्त्वना सा वाक् सगोत्राभ्युदगात् परात्मना ॥ ५ ॥

२६२ यश्छन्दसां सन् वृषभः प्रवर्षक श्छन्दोभ्य एवाभ्युदगात् प्रहर्षकः ॥
सच्छदसेन्द्रोऽञ्चति वाक्प्रचोदकः सेन्द्रात्मनो ब्रह्मण आप्रचोदिका ॥ ६ ॥

२६३ सा छन्दसां तद्वचसां च माता गायत्रिनाम्ना प्रथमा प्रगीता ॥
सा ज्योतिषोऽग्नेर्मुखतः प्रजाता वाक् छन्दसाक्ता सरसस्वरासा ॥ ७ ॥

२६४ गायत्रिसत्त्वप्रमुखेन संहिता वाक् छन्दसा ब्रह्मणि सा समाहिता ॥
प्रत्यक्षतो ब्रह्मपरा समाश्रिता मन्त्रात्मिका सेयमृगात्मिकाऽऽश्रुता ॥ ८ ॥

॥ परमतत्त्वार्थरूपा गायत्री ॥

## ॥ ऋङ्मन्त्रः ॥

तावा॑नस्य महि॒मा तत॒ो ज्याया॑ँश्च॒ पूरु॑षः ॥
पादो॑ऽस्य॒ सर्वा॑ भू॒तानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥

( ऋ० मं० १० । ३० । ३ ) ( सामवेदः )

## ॥ पदपाठः ॥

तावा॑न् । अ॒स्य॒ । म॒हि॒मा । ततः॑ । ज्याया॑न् । च॒ । पुरु॑षः ॥
पादः॑ । अ॒स्य॒ । सर्वा॑ । भू॒तानि॑ । त्रि॒ऽपात् । अ॒स्य॒ । अ॒मृत॑म् । दि॒वि ॥

२६५ पूर्णात्मकः सन् पुरुषश्चतुष्पाज्ज्योतिर्मयो विश्वविभूतिपूर्णः ॥
गायत्रिनाम्नी तमनुप्रपन्ना चतुष्पदी वाक् पुरुषानुविन्ना ॥ ९ ॥

२६६ सा सर्वभूतप्रकृतिस्वरूपा तेजोजलान्नाप्तसदात्मरूपा ॥
शक्तिः परा वागपि सा चतुष्पाद् विद्या त्रयी वेदमयी विदात्मा ॥१०॥

२६७ पृथ्वी प्रभूता त्रितयी समस्ता सैवाखिलोके भुवनत्रयाप्ता ॥
आद्याऽदितिर्व्योमपरा तुरीया तन्मात्रका वाक् च चतुष्पदी या ॥११॥

२६८ अध्यात्ममेवं तदिदं शरीरं वागात्मनोर्दिव्यतनुत्रयाप्तम् ॥
प्राणात्मकं सत् त्रितयं प्रमुख्यं चतुष्टयं तद् हृदयं च वाच्यम् ॥१२॥

२६९ वाग् वै चतुष्पादपि षड्विधाद् या गायत्रिनाम्नी परशक्तिराद्या ॥
व्याप्तेह सर्वत्र परात्मधाम्ना तन्नामरूपादिगुणैर्महिम्ना ॥१३॥

२७० एकाङ्कके वस्तुनि वाचकेऽक्षरे पादश्चतुर्थांशकलाङ्करूपकः ॥
अर्धं समार्धं त्रितयं द्विपादकं पादोनमुक्तं त्रिपदार्थरूपकम् ॥१४॥

२७१ एकं चतुष्पादकलादिपूर्णं साकं समैकार्थकसत्त्वपूर्णम् ॥
सोऽयं चतुष्पात् पुरुषोऽत्रपूर्णः चतुष्पदी वाक् पुरुषेण पूर्णा ॥१५॥

॥ षड्विधा गायत्री ॥

२७२ भूतं समं वाक् पृथिवी शरीरं प्राणस्तयाऽन्तर्हृदयं विशिष्टम् ॥
गम्यं श्रुतेः षड्विधसत्त्वशिष्टं गायत्रितत्त्वं हि चतुष्पदेष्टम् ॥१६॥

॥ भूतात्मिका वागात्मिका च ॥

२७३ सर्वाणि भूतानि च पञ्च तानि खादीनि शब्दादिगुणान्वितानि ॥
वाच्यार्थसद्वस्तुसमन्वयेन व्याप्ता परा वागपि तत्समाना ॥१७॥

॥ पृथिवीरूपा - शरीररूपा च ॥

२७४ प्रज्ञावतां प्राणभृतां प्रतिष्ठा पृथ्वीयमाधारतमा गरिष्ठा ॥
प्रत्यक्तरं सत्त्ववतां शरीरं प्रत्यक्षतो भौतिकपञ्चकारम् ॥१८॥

॥ प्राणात्मिका ॥

२७५ प्राग् दक्षिणाप्रत्यगुदङ् मुखोर्ध्वतः प्राणोऽतति प्राणिति पञ्चवृत्तिः ॥
प्राणात्मकं ब्रह्म हि पूरुषात्मकं प्रज्ञानचिज्ज्यौतिष मन्तरात्मकम् ॥१९॥

२७६ भूतादिकानामपि चाखिलानां प्राणात्मनां प्राणभृतां च वाचाम् ॥
प्रत्यञ्चि सौम्यं हृदयं प्रधानं प्रज्ञानसत्त्वं हि धियां निधानम् ॥२०॥

२७७ ज्योतिः परं पूर्णमनाद्यनन्तगं सान्तर्बहिर्व्याप्तमिहान्तरात्मगम् ॥
सत्त्वं स्वरं सद्रसचित्कलामृतं सन्नामरूपादिकलात्मवाक्सृतम् ॥२१॥

२७८ कर्णौ पिधायात्मनि संयतात्मना बाह्यादिशब्दाश्रवणात् स्वरात्मनः ॥
यच्छ्रूयते मूर्धनि दिव्यसत्त्वनो दिवीव विद्युज्ज्वलदग्निचित्स्वनः ॥२२॥

२७९ तन्नामरूपात्मकमेव विश्वं वाक्पूरुषज्यौतिषचित्स्वरूपम् ॥
अन्तर्बहिर्व्याप्ततमं सदास्यं दृष्टं श्रुतं चेति सतामुपास्यम् ॥२३॥

२८० सा व्योमवाणीव सदैव सिद्धा सा मेघनादोदितविद्युतेद्धा ॥
मूर्ध्न्यन्तरेऽनाहतनादगीता सौम्यामृतज्यौतिषवाक् प्रणीता ॥२४॥

२८१ शीर्षण्यनादानुगतात्मसृष्टिः प्रत्यङ्मुखाऽन्तः श्रवणेन दृष्टिः ॥
सच्चित्परञ्ज्यौतिषदर्शनाप्ति स्तद्धाम्रसासात्मरसेन तृप्तिः ॥२५॥

२८२ ज्योतिः परं तच्चरणाभिधानात् तत्सर्वभूतैकपदाभिधानात् ॥
त्रिपात् सुदिव्यामृतसन्निधानात् पूर्णं परं ब्रह्म गुणप्रधानात् ॥२६॥

२८३ छन्दोऽभिधानादिह तत्तु नेति चेत् तथैव चेतोऽर्पणकृद् वचो भवेत् ॥
गायत्रिमन्त्रादिवचोऽवलम्बनात् तद् ब्रह्म वेद्यं सकलैरुपासनात् ॥२७॥

२८४ भूतादिपादव्यपदेशतः सत स्तस्मिन् परस्मिन्नुपपत्तितस्ततः ॥
तद्विश्वभूतादिपदात्मकं परं ब्रह्मैव तत् पूर्णपदात्मकाक्षरम् ॥२८॥

२८५ तद्ब्राह्मणे मन्त्रमुखे च वेदे पृथग् विभक्तेरुपदेशभेदे ॥
वेद्यैकतत्त्वादिह नो विरोधो वाग्वस्तुसत्सामरसावबोधः ॥२९॥

२८६ व्योमैकतन्मात्रकवाचि संस्थितं वाचः परं तत् परमार्थसन्ततम् ॥
वाचैकयैवोभयथोपदिश्यते वाच्यं ह्यनिर्वाच्यमपि प्रतीयते ॥३०॥

२८७ ओमित्यदस्तस्य मतं सुवाचकं वाच्यं परं ब्रह्म तदर्थरूपकम् ॥
वेद्यं तदोमित्यनु वेदवेदितं ध्येयं सुधीभिः परमं सुधीहितम् ॥३१॥

२८८ वाचः परं चाखिलवागगोचरं धीभ्यः परं पूर्णममेयमक्षरम् ॥
वाचाप्यनिर्वाच्यमचिन्त्यमुत्तमं ज्योतिः परं ब्रह्म समं बृहत्तमम् ॥३२॥

॥ इति नवमी कला सम्पूर्णा ॥

वेदमन्त्रवाङ्मुखेन सुस्वरेण गीयतां वेद्यमन्तरात्मवस्तु तत्त्वतो निवेद्यताम् ॥
ज्योतिरेव तत्परेण धीरसेन सेव्यतां ब्रह्म तत् परं श्रुतं च दृष्टमित्युपास्यताम् ॥९॥

## ॥ दशमो कला ॥

### ॥ वाचोऽपि परत्वाद् ब्रह्मणः अनिर्वचनीयत्वम् ॥

२८९ वाचाऽनयाऽनभ्युदितं परात् परं साऽभ्युद्यते येन च वाक् स्वराक्षरम् ॥
तदेव सद् ब्रह्म परं हि निर्गुणं नेदं यदस्माभिरुपास्यते गुणैः ॥ १ ॥

२९० ब्रह्मैव वक्तुं हि यदा प्रवर्तते सा वागशक्ता मनसा निवर्तते ॥
मौनं स्वयं सा भजतेऽविशेषतः नाम्नैव तुष्णीं भवतीह शेषतः ॥ २ ॥

२९१ स्वानन्दरूपं स्वनुभावगीतं सन्नामरूपादिगुणादतीतम् ॥
वेदादिना स्वानुभवैकवेद्यं वाचाऽप्यनिर्वाच्यमतो निवेद्यम् ॥ ३ ॥

२९२ तस्मात्तदन्याः सकलाश्च वाचो विमुञ्चथ ब्रह्मणि सामरस्यात् ॥
पारङ्गता नावमिवैव पूर्वां तत्प्रापकं तारणहेतुसेतुम् ॥ ४ ॥

२९३ सत्यैकवस्त्वाद्यवलम्बनेन सत्प्रत्ययैकाक्षरसावधानः ॥
न चिन्तयेदत्र बाहूँश्च शब्दान् सत्प्रत्ययानप्यखिलानपार्थान् ॥ ५ ॥

२९४ स ब्राह्मणो ब्रह्मविदत्र सर्वं विस्मृत्य विद्यादिकमानगर्वम् ॥
मौनेन तिष्ठेदभिमानहीनं पूर्णात्मभावानुभवादनूनम् ॥ ६ ॥

२९५ विद्यादिपाण्डित्यमथापि मौनं निर्विद्य सात्म्येन च लोकमानम् ॥
बाल्येन तिष्ठेदिह सामरस्याद् ब्रह्मात्मभावोदितबालभावात् ॥ ७ ॥

२९६ वाचाऽपि सोऽनिर्वचनीयतां गतो वाच्यार्थभावं समतीत्य योगतः ॥
विद्यासमाविर्हितसत्स्वरूपतो वेद्यात्मसाक्षात्कृतितो विराजते ॥ ८ ॥

## ॥ गायत्र्याः तुरीयपदस्वरूपम् ॥

२९७ गायत्रिमन्त्राक्षरवाक्स्वरूपा साऽष्टाक्षरासा त्रिपदाऽप्यरूपा ॥
तस्याः परार्थात्मपदं तुरीयं परोरजास्तत् सवितुर्वरेण्यम् ॥ ९ ॥

२९८ प्राणा गयास्तत्स्वरसम्प्रगायकाः वाक् त्रायते तान् रसतः स्वगायकान् ॥
गायत्रि नाम प्रथितं प्रसादकं वाग्देवतायाः स्वरतः प्रमोदकम् ॥१०॥

२९९ केचिच्चतुष्पादमनुष्टुभं तां छन्दस्वतीं वाचमनुब्रुवन्ति ॥
तथा न कुर्यात् त्रिपदां वदेत् तां तुरीयपादः सवितुः स्वरूपात् ॥११॥

## ॥ गायत्र्याः उपस्थाने औपनिषदः यजुर्मन्त्रः ॥

"गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि
न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय
परोरजसेऽसावदो माप्रापदहमदः प्रापम्" ॥ इति ॥
(बृ० उ० ५।१४।७)

३०० तस्या उपस्थानमुपप्रतिष्ठा वागात्मतत्त्वार्थकसंविदेष्टा ॥
गायत्र्यसि ज्यौतिषवाक्स्वरूपा ब्रह्मात्मिका पूरुषशक्तिरूपा ॥१२॥

३०१ पुंसाऽऽत्मना सर्वगुणैः समाना वाक् चेतनात्मैकपदी स्वमाना ॥
एकात्मिका सा सकलानुरक्ता सर्वानुषक्ताऽपि ततोऽतिरिक्ता ॥१३॥

३०२ स्त्रीपुंस्वरूपाच्च तयोः स्वतत्त्वान् मिथोऽन्वयात् सा मिथुनीकृता वाक् ॥
सा चेतनाऽचेतनभृद् द्विरूपा संवित्-क्रियासा द्विपदी विरूपा ॥१४॥

३०३ सचेतना-ऽचेतन-चेतनासतत्त्वै स्त्रिभिर्वाक् त्रिपदी समस्ता ॥
गुणैरपीष्टा मिथुनत्रयासा त्रिशक्तिभिः सा विषमा समा स्यात् ॥१५॥

३०४ व्यस्तैस्त्रिपादैश्च तथा समस्तैः व्यस्ता समस्ताऽपि परा तुरीया ॥
त्रिभ्यश्च तेभ्यः परमाऽऽत्मचित्तिः चतुष्पदी वाग् व्यतिरिक्तशक्तिः ॥१६॥

३०५ इन्द्रात्मकः सन् पुरुषः परात्मा पूर्णात्मकः सोऽयमपाद् अमात्रः ॥
सा वागपि स्वात्मनि तत्समात्रा नो पद्यते सर्वगुणै रमात्रा ॥१७॥

३०६ उपर्युपर्यातपति प्ररोचिषा परः समस्ताद् रजसः स्वरार्चिषा ॥
चिज्ज्योतिषा प्राणयिता जगत्पतिः परोरजाः सम्प्रथितो दिवस्पतिः ॥१८॥

३०७ तस्मै तुरीयाय पदात्मने ते तद्दर्शतायात्मचिते नमस्ते ॥
परोरजश्चित्तपसे मनस्ते सन्दर्शनीयाय सते नमस्ते ॥१९॥

३०८ परोरजाः सोऽभ्युदितस्तुरीयः सोऽसावदस्तत्र पदं वरीयः ॥
मां प्रापदेवं तददस्तुरीयं योगात् प्रतिप्रापमहं वरेण्यम् ॥२०॥

३०९ उपासकोपास्यपरात्मनोस्तयो रुपासनाप्राप्यपदाद्युपात्तयोः ॥
उपाधिराहित्यचिता सुयुक्तयोः उपाहितं चोपनिषत्सुमुक्त्योः ॥२१॥

३१० एतद् यजुर्मन्त्रकमत्र सार्थकं तेनोपतिष्ठेत परात्मदैवतम् ॥
सद् भावयेत् स्वात्मनि पारमार्थकं साक्षात्कृतेः स्यादनुभावसार्थकम् ॥२२॥

॥ एतस्मिन्नर्थे ऋङ्मन्त्रवर्णाः ॥

तत् ते' सवितस्तुरीयं पदं पश्यामि दर्शतम् ॥
ज्योतिर्विश्वस्य दर्शयत् ॥

( छन्दोदर्शनम् अनु० १ । सू० १ । ऋक्० ३ )

## ॥ पदपाठः ॥

तत् । ते । सवितः । तुरीयं । पदं । पश्यामि । दर्शतम् ।
ज्योतिः । विश्वस्य । दर्शयत् ॥

३११ तत् ते तुरीयं सवितर्विमर्शितं पदं प्रपश्यामि धियैव दर्शतम् ॥
प्रत्यक्तमं द्रष्टृतमं स्वसाक्षिकं ज्योतिर्हि विश्वस्य सतोऽस्य दर्शयत् ॥२३॥

३१२ छन्दोवचोदर्शनतः प्रकाशितं छन्दोमयान्मन्त्रमुखात् प्रशासितम् ॥
तत्त्वं तुरीयेन्द्रचिदग्रसंशितं तत्त्वार्थविद्भिर्मुनिभिः प्रशंसितम् ॥२४॥

३१३ तुरीय एव स्वयथादिमो यः साद्यस्तथाऽन्त्यश्च स एव भूयः ॥
यथा त्रिकोणान्तरबिन्दुराद्य स्तथा विलोमादुपसंहृतोऽन्त्यः ॥२५॥

३१४ सृष्टेः स आरम्भ इहादिबिन्दोर्व्यष्टेर्लयो बिन्दुपदे चिदिन्द्रे ॥
तदेव पूर्णं परमं तुरीयं पदं विदुः पूर्णविरामगम्यम् ॥२६॥

३१५ योऽध्यक्ष एकोऽत्र चिदात्मकः सन् योगाद् विभूत्या बहुभावमिच्छन् ॥
वाचा स्वशक्त्या परया समन्ताद् व्याप्याऽऽविरास स्वमहश्चिदन्तात् ॥२७॥

३१६ विश्वं चिता विक्रममाण आदितो वाचा मिमाय त्रिपदानुवादतः ॥
सत्ये तुरीये परमे पदे निजे संवित्समुद्रे विरराम सन्नजः ॥२८॥

३१७ पूर्णश्चतुष्पात् परमः स पूरुषः प्राज्ञात्मिका वाक् परमाऽऽत्मनोऽर्चिषा ॥
गायत्रिमन्त्रेण धियाऽभ्युपास्यतां साक्षात्कृतेः सामरसात् समास्यताम् ॥२९॥

३१८ मुसन्दृगिन्द्रः सविता चिदात्मा सर्वान्तरः सन् परमः समस्तात् ॥
यो व्यापकोऽस्मिन् त्सकले समोऽन्तर्यामी नियन्ताऽस्ति सदाऽखिलेऽन्तः ॥३०॥

३१९ बाह्यैः सरूपादिगुणैर्विहीनो भावैश्च दृश्यैर्विगते विलीनः ॥
दृष्टेः परोऽन्तः स्वचितोऽप्यणीयान् द्रष्टा स्वयं सन्निति दर्शनीयः ॥३१॥

३२० सैवात्मसाक्षात्कृतिरत्र संविदा सत्यस्वरूपस्थितिरेव सर्वदा ॥
वागात्मनोः सामरसात्मना हृदा प्राप्याऽऽत्मधीयोगमुखेन सा मुदा ॥३२॥

॥ इति दशमी कला सम्पूर्णा ॥

छन्दसोऽनुदर्शनेन संविदा विमर्शितं
छान्दसं पदं तुरीयमन्तरेव दर्शितम् ॥
दैवतेन्द्रचित्परं हृदाऽऽत्मना प्रकाशितं
दैवरातवाङ्मुखेन दर्शयत् प्रदर्शितम् ॥१०॥

# ॥ एकादशी कला ॥

## ॥ वाचक-शब्दशक्तिरूपा वाक् ॥

३२१ वागेव सद्वाचकशब्दशक्तिर्वाच्यार्थसद्वस्तुपराऽभिधोक्तिः ॥
विद्यात्मिका संविदुदीर्णभूति र्वेद्यात्मना सन्मिथुनैकवृत्तिः ॥ १ ॥

३२२ वाग् विश्वशक्तिः परमात्मनः समा प्राग् विश्वसृष्टेश्चितिमात्रसत्तमा ॥
सर्वार्थसंवित्प्रतिपत्तिसत्प्रमा साक्षात्प्रमाणात्मतयाऽखिलोत्तमा ॥ २ ॥

३२३ वस्तुप्रपत्त्याऽवगतेरनन्तरं नास्तीह वागाश्रयणं निरन्तरम् ॥
सेतुः सरिन् नौरपि पारगे तथा भुक्तौ च तृप्तौ विरसाशनं यथा ॥ ३ ॥

३२४ तथाऽपि लोकोपकृतेः समीक्षणात् तत्त्वानुभूतार्थगुणप्रकाशनात् ॥
वस्तूपदेशादिकृतेऽवलम्बनाद् वागेव सर्वाश्रयणं प्रशासनात् ॥ ४ ॥

३२५ वाक् छब्दशक्तिः सकलार्थपूर्णा वाच्या परञ्ज्यौतिषचित्प्रभार्णा ॥
श्रद्धात्मसत्सामरसाभ्युदीर्णा श्रेयः - सनिश्श्रेयसवित्प्रकीर्णा ॥ ५ ॥

३२६ चित्सत्त्ववृत्तिः परमाऽऽत्मनः परा श्रद्धात्मिका प्लततमा स्वराक्षरा ॥
पूर्णे परे ब्रह्मणि संहिताक्षरा पूर्णात्मिका पूरुषवाक् सुधा परा ॥ ६ ॥

"वाक् पतङ्गाय धीयते"

(ऋ० मं० १०।१८९।३)

३२७ वाग् वै पतङ्गाय हि धीयते सा प्राज्ञात्मसंवित्कृतिचित्तिभासा ॥
वाग्धारणार्थाऽत्मकलाचिदूर्मिर्वागेव तस्याखिलयोगभूमिः ॥ ७ ॥

" ब्रह्मायं वाचः परमं व्योम "

( ऋ० मं० १ । १६४ । ३५ )

" ब्रह्म वै वाचः परमं व्योम "

( तै० कृष्णयजुः )

३२८ ब्रह्मैव वाचः परमं सदास्पदं व्योमेह पूर्णात्मनि वित्सरः पदम् ॥
प्रज्ञानचित्पूर्णपदं सदुत्तरं ब्रह्मेति तद् व्योमपदं पराक्षरम् ॥ ८ ॥

" यावद् ब्रह्म विष्ठितं तावती वाक् "

( ऋ० मं० १० । ११४ । ८ )

३२९ शक्त्याऽन्वयेन व्यतिरेकयोगतः सन्निर्गुणं वा सगुणं स्वभावतः ॥
यावत् परं ब्रह्म सदा प्रतिष्ठितं वाक् तावती सा तदनु प्रतिष्ठिता ॥ ९ ॥

३३० ब्रह्मात्मनो नित्यमपात्परत्वे वाग् ब्रह्मसत्त्वा तदपात्सुतत्त्वा ॥
सा निर्गुणे ब्रह्मणि मौनसत्त्वा गुणात्मके वाचकशब्दसत्त्वा ॥१०॥

३३१ पूर्णे सुपूर्णाक्षरबिन्दुरूपा सा वागनुस्वारसुनादरूपा ॥
शून्यात्मिका सर्वविशेषशून्या ध्वन्याद्यनुज्ञाक्षरबिन्दुमान्या ॥११॥

३३२ ब्रह्मण्यमात्रे सति वाग् अमात्रा सा ब्रह्मचोदन्युदिताऽतिमात्रा ॥
नीरूपकेऽनिर्वचनीयसत्त्वा निर्वृत्तिचित्पूर्णविरामतत्त्वा ॥१२॥

३३३ सपाद - सद्रूप - गुणादिमत्वे सर्वात्मना साऽप्यनुगुण्यसत्त्वा ॥
सचेतना-ऽचेतन-चेतनात्मा सद्वस्तुतत्त्वत्रयवाक् समात्मा ॥१३॥

३३४ सत्याक्षरब्रह्मसुचेतनात्मता तन्नामरूपादिगुणक्रियात्मता ॥
सर्वात्मना सर्वगुणैः सदात्मता वाग्-ब्रह्मणोर्नाम-सरूपसाम्यता ॥१४॥

३३५ दिव्यध्वनिज्योतिरूपात्तमूर्तिः स्व नामशेषात्मकदिव्यकीर्तिः ॥
सन्नामरूपात्मकताऽऽत्मदीप्ति वाग्-ब्रह्मणोरादिमसत्त्वमूर्तिः ॥१५॥

३३६ तद् वस्तुतस्तत्त्वदृशां विधानं ब्रह्मेति वृध्यादिगुणाभिधानम् ॥
तद्वाच एव प्रथितं प्रधानं सद्ब्रह्मणो गौणमतोऽप्रधानम् ॥१६॥

३३७ ब्रह्मात्मसत्ताद्यविशेषनीतं तन्नामरूपादिगुणादतीतम् ॥
ब्रह्मेति सञ्ज्ञाद्यधिकारहीनं पूर्णं समं बिन्दुवदेव शून्यम् ॥१७॥

३३८ तस्मात् परस्मात् परमः स पूरुषो वाग्ब्रह्मणः सोऽधिपतिर्ऋचा स्तुतः ॥
यन् नामरूपात्मकसत्त्वसम्भवं तद् वाच एवात्र समस्तवैभवम् ॥१८॥

३३९ तन् निर्गुणं वस्तु परं सद् अक्षरं नित्यं स्वसत्त्वात् स्वपदः सद् अच्युतम् ॥
वाचः स्वशक्तेः सगुणं सद् अक्षरद् वाच्यार्थरूपेण सता तद् अच्यवत् ॥१९॥

३४० वाचः समस्तात्मतयाऽन्वयेन निर्नामरूपात्मसमन्वयेन ॥
पूर्णेन बिन्द्वात्मकचिन्मयेन पूर्णं परं ब्रह्म परोक्षयेन ॥२०॥

३४१ बोध्दुं तथा बोधयितुं परस्मै श्रोतुं तथाऽऽश्रावयितुं समस्मै ॥
ब्रह्मेति वागेव जगाद तस्मै प्रत्यर्पणे स्वं परमर्थमस्मै ॥२१॥

३४२ ब्रह्मादिशब्देषु समार्थसत्त्वाल्लक्ष्यार्थरूपं परवस्तुतत्त्वात् ॥
साक्षात् परोक्षाद् अपरोक्षसत्त्वाद् वाग् ब्रह्मवाच्यार्थसरूपसत्त्वा ॥२२॥

३४३ तद् ब्रह्मणो वाक् प्रतिमा समाऽऽस्थिता सा सर्वतोऽस्मात् प्रथमा प्रतिष्ठिता ॥
साक्षात् प्रमाणार्थतया समाश्रुता सर्वार्थसद्वस्तुविदे समाश्रिता ॥२३॥

३४४ वागर्थवृत्योरिह मानमेययोः सन्नामरूपात्मकयोः समानयोः ॥
योगः स्वसाक्षात्कृतये सहेष्टयोः स्यात् सामरस्योर्जितयोर्विशिष्टयोः ॥२४॥

३४५ ब्रह्मात्मनो वाक् स्फुरणान्तरात्मिका शक्तिः सुनिःश्वाससगुणक्रियात्मिका ॥
भूतादिसृष्टेरपि कारणात्मिका माता जगज्-जीव-परेशमातृका ॥२५॥

३४६ प्रज्ञानरूपस्य सती चिदात्मन स्तत्त्वादिविज्ञानगुणप्रकाशने ॥
प्रमाणभूता प्रतिमेह वाक् परा माता प्रमात्री श्रुतिमात्रगोचरा ॥२६॥

॥ इन्द्रात्मनः तस्य वागेव तनूः ॥

## ॥ ऋङ्मन्त्रः ॥

वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् ॥
इन्द्रात् परि तन्वं ममे ॥

( ऋ० मं० ८ । ७६ । १२ )

## ॥ पदपाठः ॥

वाचम् । अष्टाऽपदीम् । अहम् । नवऽस्रक्तिम् । ऋतऽस्पृशम् ।
इन्द्रात् । परि । तन्वम् । ममे ॥

३४७ वाक् सन्तता साऽष्टसु धीन्द्रियेषु प्राक् स्वात्मनः प्राणनचिन्मयेषु ॥
अष्टापदी साऽष्टदिगूर्जिता स्यात् प्राज्ञात्मनेन्द्राग्निचिताऽर्जितास्यात् ॥२७॥

३४८ सा मध्यबिन्दूर्ध्वरताऽष्टदिग्गता नवाङ्गपादा नवदिक्षु सङ्गता ॥
दिग्देवताचित्सहिताष्टमातृकाः सद्बिन्दुसत्त्वान्नवशक्तिकर्तृका ॥२८॥

३४९ ऋतं स्वमात्मानमुपस्पृशन्तीं सत्यस्वरूपं तमनुस्वरन्तीम् ॥
वाचं परामात्मचिता वदन्तीमिन्द्रान्मितामात्मतनूं विदन्ति ॥२९॥

३५० ससर्षयो दर्शनसन्निदानाः प्राणात्मका धीन्द्रियचित्सदानाः ॥
वागष्टमी साऽऽखिलवित्प्रदाना ब्रह्मात्मना सोर्जति संविदाना ॥३०॥

॥ छन्दसां वर्षकः इन्द्रः, छन्दोभ्य एव इन्द्राविर्भावः ॥

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव ।
स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् ॥

( तै० शीक्षोपनिषत् ३ । १ । ) ( वैश्वदेव काण्डे )

## ॥ पद्पाठः ॥

यः । छन्दसाम् । ऋषभः । विश्वरूप इति विश्वरूपः ।

छन्दोभ्यः । अधीति । अमृतात् । समिति । बभूव ।

सः । मा । इन्द्रः । मेधया । स्पृणोतु ।

अमृतस्य । देव । धारणः । भूयासम् ॥

३५१ यश्छन्सां वर्षयिता परो भवान् सन् विद्युदात्मा भगवान् महोमहान् ॥
छन्दोभ्य एवाभ्युदितात् परामृताद् अविर्बभूवेन्द्र इतीयते श्रुतात् ॥२१॥

३५२ सेन्द्रः समग्रात्मविभूतिपूर्णः सन्मेधयाऽस्मान् परया स्पृणोतु ॥
छन्दस्सुवाचा शरणं प्रपन्नो ज्ञानामृतं वर्षयतात् प्रसन्नः ॥२२॥

॥ इति एकादशी कला सम्पूर्णा ॥

वाक् परात्मशब्दशक्तिरेव वाचकोच्यते
वाच्यमर्थमन्विताऽऽत्मबोधनाय याच्यते ॥
वेदवाक्प्रवर्षकेन्द्रदेवताभिधाऽर्च्यते
वेदवाङ्मुखेन दैवरातवाक्सुधाऽञ्च्यते ॥११॥

## ॥ द्वादशी कला ॥

### ॥ वाग्-आत्मनोर्दाम्पत्यसत्त्वम् ॥

### ॥ अध्यात्मतत्त्वसिद्धम् ॥

### ॥ ऋङ्मन्त्रः ॥

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ॥
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ॥

पतङ्गः ( ऋ० मं० १० । १७८ । २ )

### ॥ पदपाठः ॥

पतङ्गः। वाचम्। मनसा। बिभर्ति। ताम्। गन्धर्वः। अवदत्। गर्भे। अन्तरिति ॥
ताम्। द्योतमानाम्। स्वर्यम्। मनीषाम्। ऋतस्य। पदे। कवयः। नि। पान्ति ॥

३५३ पतङ्ग आत्मा सविताऽधिदैवते द्वौ तौ समानौ सयुजौ ससत्त्वकौ ॥
अन्तर्बहिर्व्याप्ततमौ सदातनौ चिज्ज्योतिरात्मप्रतिमानुरूपकौ ॥ १ ॥

३५४ आत्माऽत्र वाचं मनसा बिभर्ति सत्ताचितिज्ञप्तिगुणस्वभावाम् ॥
तां संस्फुरन्तीं सहसा हृदन्तः प्राणः सदैवानुवदत्यजस्राम् ॥ २ ॥

३५५ प्रद्योतमानां कवयः परां तां बाह्येन्द्रियैरस्खलितां हृदिस्थाम् ॥
रक्षन्ति वाचं तपसाऽऽत्मनीति तत्त्वं तु वागात्मपरं विदन्ति ॥ ३ ॥

३५६ यावान् प्रपूर्णः परमोऽन्तरात्मा युक्तस्तथा वागपि तावतीष्टा ॥
ब्रह्मात्मनः सा प्रतिमा परा वाक् विश्वादिसृष्टेरपि सत्तमा प्राक् ॥ ४ ॥

## ॥ वागेव चिदात्मनो माता ॥

### ॥ ऋङ्मन्त्रः ॥

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं विचष्टे ॥
तं पाकेन मनसाऽपश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम् ॥

ऋग्निः, ( ऋ० मं० १० । ११४ । ४ )

### ॥ पदपाठः ॥

एकः । सुऽपर्णः । सः । समुद्रम् । आ । विवेश ।
सः । इदम् । विश्वम् । भुवनम् । वि । चष्टे ॥
तम् । पाकेन । मनसा । अपश्यम् । अन्तितः ।
तम् । माता । रेळ्हि । सः । ऊम् इति । रेळ्हि । मातरम् ॥

३५७ एकः सुपर्णः स समुद्रमाप्यं स्वैकास्पदं व्योम चिताऽऽविवेश ॥
स एव विश्वं भुवनं विचष्टे सॅश्चेतनात्मोर्जति विश्वसाक्षी ॥ ५ ॥

३५८ तं चेतनं साक्षिणमत्र पूर्णं पक्वेन चान्तर्मनसाऽन्वपश्यम् ॥
माता परा वागिह तत्प्रमात्री तं लेढि रस्यात् स च मातरं ताम् ॥ ६ ॥

३५९ वागात्मनोर्वाचक-वाच्यसत्त्वयोः सन्मातृपुत्रीयगुणाप्तयोस्तयोः ॥
परस्परं लेह्नमात्मसात्कृतेः साक्षात्कृतेर्यौगिकदृक्समाकृतेः ॥ ७ ॥

३६० तयोस्तु तत्त्वार्थकमातृ-मेयता सम्भाविता योगगुणैकमात्रता ॥
प्रकाशकत्वार्थिततत्प्रकाश्यता वागात्मनोरित्यवगम्यतां श्रुता ॥ ८ ॥

३६१ प्रागेव सिद्धस्य चिदात्मनोऽस्य वागेव मातेति वचोरहस्यात् ॥
वागात्मनोरेव हि मातृ-मेयभावात् तयोर्योग इहानुनेयः ॥ ९ ॥

३६२ तदात्ममातृत्वमपीह वाचः प्रमाणभूतप्रतिमास्वरूपम् ॥
माता प्रमात्री परमाऽऽत्मनः सा वाक् तत्प्रमेयः प्रथितः परात्मा ॥१०॥

३६३ ईशात्मनोऽहंस्फुरणात्मिकाऽऽदिमा शक्तिर्हि निश्श्वासगुणा प्रचेतना ॥
भूतादिसृष्टेरपि मूलभूमिका वागेव मातेति मता प्रमातृका ॥११॥

३६५ प्रज्ञातृरूपस्य चिदात्मनः सतस्तत्त्वादिविज्ञानगुणप्रकाशतः ॥
प्रमाणभूतेति च वाक् परात्मिका माता प्रमात्री प्रतिमा प्रमात्मिका ॥११॥

३६६ वागेव माता हृदि लेढि तं सुतं प्राणोऽत्र पुत्रः स च रेढि मातरम् ॥
अन्योऽन्यमेतौ प्रति लीढ इत्ययं वाक्-प्राणयोर्योग इहेष्यतेऽन्वयात् ॥१३॥

३६६ वाचि स्थितं तत्पतिमेनमैन्द्रं प्राणं न्यचाय्यन्निति चैतरेयः ॥
प्राणोऽत्रमुख्यः स हि जीव आत्मा प्रेयोऽस्तु वासिष्ठमतोऽनुनेयः ॥१४॥

३६७ सूर्यस्तदन्तः पुरुषः परात् परः सर्वान्तरात्माऽपि सदा निरन्तरः ॥
उद्गीथरूपां प्रणवाक्षरात्मिकां वाचं परामुच्चरति स्वरात्मिकाम् ॥१५॥

३६८ अध्यात्ममात्मप्रतिमाऽत्र मूलादाधारचक्रादुदिताऽऽत्ममूलात् ॥
पूर्णा चतुष्पात् परमा स्वराद्या वाग् वाचकात्मा चितिशक्तिराद्या ॥१६॥

३६९ वाचस्तु तस्याः पतिरन्तरात्मा वाच्यार्थरूपः प्रथमोऽधिवक्ता ॥
वागात्मनोर्युक्ततमोऽत्र तस्माद् दाम्पत्ययोगः परमः समस्मात् ॥१७॥

३७० वेदेषु दाम्पत्यसरूपसत्त्वं वाग्-ब्रह्मणोः सन्मिथुनत्वमुक्तम् ॥
परस्परं नेमसमात्मकत्वं तादात्म्ययोगादिति वस्तुतत्त्वम् ॥१८॥

३७१ केचित् पुनर्मानवदेहिवत् तयोः सद् वामदक्षार्धसरूपमूचिरे ॥
तद् गौणमुख्यत्वमपीष्टमेनयोः स्त्री-पुंस्वरूपत्वमपीह मेनिरे ॥१९॥

३७२ तादात्म्यतो वाच्य-सुवाचकात्मनोस्तत्त्वैक्यमिष्टं गुणि-तद्गुणात्मनोः ॥
वाच्योऽर्थरूपः पुरुषः परो गुणी वाग् वाचकाख्या गुणशक्तिरूपिणी ॥२०॥

३७३ सा वागियं ब्रह्मणि वाचका स्यात् साक्षादिदं ब्रह्म तदेकरस्यात् ॥
तद्वाच्यरूपार्थकमर्थसत्त्वात् साक्षि श्रुतं ब्रह्म परोक्षलक्ष्यम् ॥२१॥

३७४ सन् निर्गुणं चास्ति हि नामरूपगुणक्रियातीतमतः परोक्षम् ॥
ब्रह्मेति तत् किञ्चिदिवैव वस्तु मायेति वाचैव दिशन्ति सन्तः ॥२२॥

३७५ यथा बहिर्व्योमनि पर्वतान्तरे जिह्वाग्रतो मूर्धनि मानवान्तरे ॥
निरन्तरं स्वादुरसो यदृच्छया स्वयं स्रवत्यन्तरजस्रधारया ॥२३॥

३७६ तथा चिदात्मन्यपि संस्फुरत्यलं सत्ताचितिज्ञप्तिगुणादिहृत्कलम् ॥
स्फूर्तिः स्वरा सूक्ष्मतमा रसाप्लुता वागेव साऽहञ्चितिविक्रियाप्तता ॥२४॥

३७७ यथा भुवि प्रज्वलतोऽमितेजसो रवेर्दिवीद्धात् तपतो बलीयसः ॥
सूक्ष्मः स्वरोऽजस्रमुदेति सन् त्स्वतस्तथैव सोऽन्तस्तु चिदात्मनः सतः ॥२५॥

३७८ श्राव्यो विदा वाक्स्फुरणस्वभावः श्रेयो हृदा चित्स्फुरणात्मभावः ॥
द्रष्टा श्रुतीष्टः प्रति दर्शनीयो दृष्टः श्रुतः सोऽयमिति स्वनेयः ॥२६॥

३८९ वाचोपदेशाच्छ्रवणाच्छ्रुतेर्दृशा प्राप्यं परोक्षं परमं स्वसन्दृशा ॥
तत्रानिवार्यं वचनानुशासनं ज्ञानेऽपरोक्षे श्रवणादिसाधनम् ॥२७॥

३८० तस्मात् परो ज्ञानमयोऽत्र यज्ञो योगोऽपि तद्वागवलम्बनेज्यः ॥
गायत्रिमन्त्रादिमुखेन शिष्टो ब्रह्मोपदेशो विहितो विशिष्टः ॥२८॥

### ॥ मन्त्रादिवागवलम्बनेन परमात्मसाक्षात्कारः ॥

### ॥ ऋङ्मन्त्रः ॥

बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ॥
अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं नि चिक्युः कवयो मनीषा ॥

( ऋ० मं० १०। १२४। ९ )

## ॥ पदपाठः ॥

बीभत्सुनाम् । सऽयुजम् । हंसम् । आहुः ।
अपाम् । दिव्यानाम् । सख्ये । चरन्तम् ॥
अनुऽस्तुभम् । अनु । चर्चूर्यमाणम् ।
इन्द्रम् । नि । चिक्युः । कवयः । मनीषा ॥

३८१ यं हंसमाहुर्दिवि वैद्युतं तमपां च सख्ये सयुजं चरन्तम् ॥
अनुष्टुभं वाचमनूचरन्तमिन्द्रं निचिक्युः कवयो धियाऽन्तः ॥२९॥

३८२ सेन्द्रोऽयमात्मा स्वरति स्वमन्त्रकं तं हंस हंसेति जपत्यहर्निशम् ॥
विदन्ति वागेव पराऽत्र साऽजपा गायत्रिनाम्नीति च योगवित्तमाः ॥३०॥

### ॥ हंसात्मिका वाक्, सरस्वती हंसवाहना ॥

३८३ हंसीह सा वाग् रसना रसायना हंसात्मिका साऽऽत्मनि वाग्रसस्वना ॥
साऽहश्चिता साऽञ्चति हंसवाहना हंसायते हंसवताऽसुनाऽऽत्मना ॥३१॥

३८४ हंसीव सा वाक् सदसद्विवेचनात् सोमेन सत्यानृतयोर्विमर्शनात् ॥
क्षीराम्बुनोः सन्मनसा विभाजनात् क्षीरैकरस्याद् रमतेऽब्धिभावनात् ॥३२॥

॥ इति द्वादशी कला सम्पूर्णा ॥

स्वात्मनीह वाक् स्वमूलसत्पदादुदीर्यतां
साऽऽत्मसात्कृतेः कृते स्वसंविदाऽनुदीयताम् ॥
दैवतेन्द्रहंसवाहनाभिधा प्रगीयतां
दैवरातवाकसुधाऽसुहंसिनी प्रगीयताम् ॥१२॥

## ॥ त्रयोदशी कला ॥

### ॥ वाक् परा शक्तिः ॥

३८५ वाक्छक्तिरेव परमाऽऽत्मनि चेतनात्मा वाच्यार्थसत्त्वगरिमाऽखिलसत्त्वभूमा ॥
वेदात्मिका स्वररसामृतसंविदात्मा वेद्यात्मना लसति भूतिषु सस्सार्वभौमा ॥१॥

३८६ वागेव सा चितिपराऽऽत्मनि संविदाना वाच्यार्थवस्तुवचनाऽञ्चति चेतमाना ॥
वाचः परः प्रभवतीति पुमान् प्रतीतः स ब्रह्मणस्पतिरिति श्रुतिभिः प्रगीतः ॥२॥

३८७ प्राक् सृष्टितोऽप्यसदिवैव विलीनमासीद् वागृष्टितोऽपि न तदाप यदास किंस्वित् ॥
तन्नामशेषकलयाऽप्यविशेषतश्चिन् निर्नाममात्रपरमेतदितीति किञ्चित् ॥३॥

३८८ तस्मिन् निजे परमवस्तुनि मौनसत्त्वात् तूष्णीमसन्निव स आस सुपूर्णसत्त्वा ॥
वाचा हृदा पुनरनिर्वचनीयमेयो निर्वेद-निर्वृतिधियाऽप्यविचिन्तनीयः ॥४॥

३८९ तस्मात् स इन्द्र इह नास्ति सदेति नेमे तं मेनिरे कथमिवाददृशुर्द्दशेमे ॥
स्तोतुं कथं स्ववचसा प्रभवन्ति, तन्मे स्तोत्रे मनोऽनुवचनं न चलेत् पुनर्मे ॥५॥

३९० तस्मिन् परात्मवचने शरणं हि मौनं तस्मादनन्यशरणोऽनुभवाम्यकामम् ॥
नित्यं नयामि नयनं प्रभवे विषण्णः स्तूष्णीं भवामि च भवे विभवे निषण्णः ॥६॥

३९१ प्रत्यक्षसन्ततविभूतिकविश्वरूपं प्रत्येकशः सगुणशक्तिसनामरूपम् ॥
प्रज्ञानचेतनकलाञ्चितसत्स्वरूपं प्राज्ञात्मकं तदिह सन्ततमप्यरूपम् ॥७॥

३९२ ब्रह्मात्मकः स परमः पुरुषोन्तरात्मा ब्रह्मात्मिकाऽऽत्मकलयोर्जति वाक् परात्मा ॥
ब्रह्मात्मकं तदुभयं मिथुनैकसत्त्वं ब्रह्मैव सत् प्रभवतीह परापराख्यम् ॥८॥

३९३ प्रत्यक्षतो लसति वागिह सा पराख्या सा वस्तुतोऽक्षरपराऽप्यपरा स्वराख्या ॥
पूर्णः प्रचेतनकलाभ्युदितः परात्मा स ब्रह्मणस्पतिरपीह बृहन् तस्मा[illegible] ॥९॥

३९४ सत्यं सदास्ति भगवान् स निजानुकामं
नित्यं करोति चितिमान् नितरां निकामम् ॥
प्रत्नं समस्तजगतां परमं प्रकामं
प्राज्ञं नमामि मनसा वचसाऽप्यकामम् ॥१०॥

३९५ ब्रह्मेति चेन्द्र इति वा श्रुतनाममात्रं
मार्येत्युपेन्द्र इति वाऽनुमतोऽनुमन्त्रम् ॥
मन्त्राश्रयेण मननेन धिया निजान्तः
सच्छ्रद्धया परतमं सुविदन्ति सन्तः ॥११॥

३९६ सृष्ट्यादिसर्वविषयेष्वपि भावनेयं
वाचा प्रमाणपरया सकलं सुमेयम् ॥
ब्रह्मेन्द्ररुद्रवसुविष्णुमुखाः परोक्षा
मन्त्रैः सुवाचकमुखैश्च विदा समीक्ष्याः ॥१२॥

॥ ब्रह्मात्मवाग्धमनिध्वनेः विश्वविसृष्टिः ॥

॥ ऋङ्मन्त्रः ॥

ब्रह्मणस्पतिरेता सं कर्मारं इवाधमत् ॥
देवानां पूर्व्ये युगे ऽ सतः सदजायत ॥
( बृहस्पतिः, ऋ० मं० १० । ७२ । २ )

॥ पदपाठः ॥

ब्रह्मणः । पतिः । एता । सम् । कर्मारः ऽ इव । अधमत् ॥
देवानाम् । पूर्व्ये । युगे । असतः । सत् । अजायत ॥

३९७ स ब्रह्मणस्पतिरनन्तगुणैर्महस्वान्
सद्वाक्सुपूर्णकलया रमते मनस्वान् ॥
फूत्कारतो निजचितोच्छ्वसनात् सरस्वान्
कर्मारवत् समधमत् तपसा सहस्वान् ॥ १३ ॥

३९८ तस्मात् पराद् धमनतः सुनिनादसत्त्वात्
स्वस्मात् सुवाक्स्वरणतः परचित्तितत्त्वात् ॥
आविर्बभूव सकलं जगदेतदादौ
स्वाविष्कृतं प्रति ददर्श ऋषिः स आद्यः ॥१४॥

३९९ तद्ब्रह्मणस्पतिमुखाद् धमनेर्निनादात्
तद्वाङ्मुखानुनिगदादुदियाय विश्वम् ॥
तच्चेतनात्ममुखतः प्रतिनामरूपं
सर्वं जगत् प्रति बभौ सगुणं सरूपम् ॥१५॥

४०० नाम्नाऽनुरूपमपि वस्तु गुणानुनीतं
धाम्ना स्वधर्मगुणतः क्रियया प्रणीतम् ॥
तादात्म्यतत्त्वकलयाऽऽत्मनि नाम सत्यं
तच्चात्मवस्तु गुणनाम्नि निजेऽस्ति नित्यम् ॥१६॥

॥ रुद्रस्य विद्युद्रवाद् विश्वाविर्भावः ॥

## ॥ ऋङ्मन्त्रः ॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ॥
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥

( वामदेवः, ऋ० मं० ४ । ५८ । ३ )

## ॥ पदपाठः ॥

चत्वारि । शृङ्गा । त्रयः । अस्य । पादाः ।
द्वे इति । शीर्षे इति । सप्त । हस्तासः । अस्य ॥
त्रिऽधा । बद्धः । वृषभः । रोरवीति ।
महः । देवः । मर्त्यान् । आ । विवेश ॥

४०१ रुद्रः स वैद्युतचिता दिवि रोरवीति बद्धस्त्रिधा त्रिभुवनेषु च बोभवीति ॥
भर्गः स्ववाग्रससुवर्षणतो विसृष्टान् मर्त्यानिमान् निजचिता महसाऽऽविवेश ॥१७॥

॥ तस्य चत्वारि शृङ्गाणि ॥

४०२ चत्वारि चित्तिपरमाणुकलाशितानि शृङ्गाणि शुङ्गपरिमाणचितोच्छ्रितानि ॥
वाच्यानि वाक्पद-पदार्थसमाहितानि ब्रह्मात्मवेदवदनानि दिगाततानि ॥१८॥

४०३ ओम्भूर्भुवः स्वरुदितानि महः पराणि तद्व्याहृतीष्टपरमन्त्रपदाक्षराणि ॥
सद्भूतसंस्थभुवनात्मरजः पराणि ब्रह्माग्निवायुरविसत्त्वचितोच्चराणि ॥१९॥

॥ त्रयो अस्य पादाः ॥

४०४ पदास्त्रयोऽस्य गतिका भुवनात्मकास्ते छन्दस्त्रयात्मकपराः सरसस्वरास्ते ॥
गायत्रिवाक्परिमितास्त्रिपदार्थपूर्णाः स्वान्तः शरीरकरणात्मकचित्युदीर्णाः ॥२०॥

॥ द्वे शीर्षे ॥

४०५ वाच्यं च वाचकमिहास्य तु शीर्षयुग्मं संवित्क्रियाचितिपरं जगदादियुग्मम् ॥
युक्तात्मनां तनुभृतां परमं शरण्यं योगादुपास्यमुभयं प्रथमं वरेण्यम् ॥२१॥

४०६ सोषा श्च रात्रिरिति ते च दिवा-निशाख्ये ज्योतीरसात्मकलिते शिरसी सुदिव्ये ॥
युक्ते सितासितपरे भवतो विरूपे स्वर्थे मिथः प्रचरतोऽत्र गुणानुरूपे ॥२२॥

४०७ स्त्री-पुंस्त्वरूपकपरं प्रथितं समार्धनारीश्वरात्मतनुरूपमनादिसिद्धम् ॥
तत् सोमसूर्यसमसत्त्वकमेव सोमा-रुद्रात्मकं लसति शक्तिशिवैकनाम्ना ॥२३॥

॥ सप्त हस्तासो अस्य ॥

४०८ प्राणात्मकाः कृतिचिताऽऽत्मनि सप्त हस्ता
ज्ञानेन्द्रियात्मकचिताश्च धियः समस्ताः ॥
दिग्देवतासहितसप्तदिशः प्रसक्ताः
शक्ताः समस्तकरणे कृतिभिःप्रशस्ताः ॥२४॥

४०९ प्राणक्रियाप्रकृतिकाः स्वरिताः स्वराख्याः
सामस्वराद्यनुकृतेरपि षड्जमुख्याः ॥
वीणादितन्तुपरिवादनतोऽनुसृत्याः
वाणीमुखात् तदनुवादनिनादकृत्याः ॥२५॥

॥ त्रिधा बद्धः ॥

४१० कालात्मकैश्च सवनैरपि तत्स्वराप्तैर्बद्धास्त्रिधा(ऽ)सुनियमैर्विषमैः समैस्तैः ॥
तत्राप्युदात्तसहितस्वरितानुदात्तैश्छन्दः स्वरैस्त्रिभिरपि प्रतिमात्रयाऽऽप्तैः ॥२६॥

॥ वृषभो रोरवीति ॥

४११ ज्ञानप्रधानपुरुषः परमः स रुद्रः प्राणप्रमुख्यमहसाऽभ्युदगात् सुभद्रः ॥
स्वच्छन्दसां सुवचसां प्रतिवर्षकः सन् विद्युन्मुखः स्वनिनदाद् दिवि रोरवीति ॥२७॥

४१२ तस्मान्निनादमुखतः स्वरयाऽऽत्मवाचा भूतानि सर्वभुवनानि च सम्बभूवुः ॥
भूतैः समैः सह युतैश्च सुचेतनाप्ताः जीवात्मना तनुभृतो मनुजाः प्रजाताः ॥२८॥

॥ महो देवो मर्त्यान् आविवेश ॥

४१३ रुद्रः स्ववाक्सुरसवर्षणतो विसृष्टान्
मर्त्यानिमान् प्रतिविवेश महान् महस्वान् ॥
तस्मादिमे तनुभृतो भुवि रुद्रपुत्रैः
प्राणैः सदा परिचरन्ति च जीवमात्रैः ॥२९॥

॥ सर्वान्तरात्मा रुद्रो वाग्रससमुद्रः ॥

॥ ऋङ्मन्त्रः ॥

अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया ॥
गृभ्णन्ति जिह्वया ससम् ॥

(हर्यतः प्रागाथः, ऋ० मं० ८ । ७२ । ३)

## ॥ पद पाठः ॥

अन्तः । इच्छन्ति । तम् । जने । रुद्रम् । परः । मनीषया ॥

गृभ्णन्ति । जिह्वाया । ससम् ॥

४१४ जीवात्मनां चितिमतां हृदयेऽन्तरात्मा
रुद्रः समान्तरतमोऽत्र परोऽस्ति धीभ्यः ॥
तं जिह्वया रसतमं स्वरसे शयानं
सन्धारयन्ति मनुजाः स्वरया समानम् ॥२०॥

४१५ ज्ञानोदयाय सततं नियमैर्यतन्ते रुद्रं स्वमान्तरतमं समुपासमानाः ॥
ईशानमत्र जगतामपि सर्वविद्याधीशं परं तममृतत्त्वमिहार्थयन्ते ॥२१॥

४१६ विश्वाधिनायकममुं पुरुषं महान्तं स्वान्तर्नियामकमिमं निहितं गुहान्तम् ॥
वाचैव वेदपरया निजया निगद्यं रुद्रं हि संविदुदये प्रणमेत् सुहृद्यम् ॥२२॥

॥ इति त्रयोदशी कला सम्पूर्णा ॥

शब्दशक्तिरेव सर्वशक्तिचित्तिमूलिका
शब्दिता परात्मना प्रचेतनात्ममौलिका ॥
दैवतेन्द्रचित्कलामुखेन विश्वचालिका
दैवरातहृत्कलासवाक्सुधा रसालिका ॥

# ॥ चतुर्दशी कला ॥

## ॥ विश्वनिर्मात्री माता गौरी ॥

## ॥ वैद्युती माध्यमिका वाक् ॥

### ॥ ऋङ्मन्त्रः ॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ॥
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

(दीर्घतमाः, ऋ० मं० १ । १६४ । ४१)

### ॥ पदपाठः ॥

गौरीः। मिमाय। सलिलानि। तक्षती। एकऽपदी। द्विऽपदी। सा। चतुःऽपदी ॥
अष्टाऽपदी। नवऽपदी। बभूवुषी। सहस्रऽअक्षरा। परमे। विऽओमन् ॥

४१७ गौरी मिमाय सलिलानि च तक्षती सा
रुद्रात्मना प्रमितनेमसमात्मसत्त्वा ॥
वाग् वैद्युताग्निरससत्त्वपरा चिदग्रा
विश्वादिसृष्टिकरणात्मगुणाऽखिलाग्रा ॥ १ ॥

४१८ यद् यत् समर्थितमिदं श्रुतिभिः स्वमानं
वाग्रुद्रयोरपि तयोः सकलं समानम् ॥
विश्वादिसृष्टिकृतिचित्प्रकृतं स्वतन्त्रं
विश्वेषु तत्प्रतिपदेषु समैकतन्त्रम् ॥ २ ॥

## ॥ विश्वजनने अग्निना छन्दस्वत्याः वाचः सन्धानम् ॥

### ॥ ऋङ्मन्त्रः ॥

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ॥
आपश्च मित्रं धिषणा च साधन् देवा अग्निं धारयन् द्रविणोदाम् ॥

(कुत्सः, ऋ० मं० १।९६।१)

### ॥ पद पाठः ॥

सः। प्रत्नऽथा। सहसा। जायमानः। सद्यः। काव्यानि। बट्। अधत्त। विश्वा॥
आपः। च। मित्रम्। धिषणा। च। साधन्। देवाः। अग्निं। धारयन्। द्रविणःऽदाम्॥

४१९ सोऽग्निः प्रजापतिरसाविह जायमानः
प्रत्नः प्रजाः प्रजनयन् त्स्वयमाप्तकामः ॥
छन्दाँसि सस्वरसुमन्त्रमयानि काव्या-
न्यात्मन्यधत्त सहसा सकलानि सद्यः ॥ ३ ॥

## ॥ अग्नेः सकाशाद् वाङ्मुखाद् विश्वसृष्टिः ॥

### ॥ ऋङ्मन्त्रः ॥

स पूर्वया निविदा कव्यताऽयोरिमाः प्रजा अजनयन् मनूनाम् ॥
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन् द्रविणोदाम् ॥

(कुत्सः, ऋ० मं० १।९६।२)

### ॥ पदपाठः ॥

सः। पूर्वया। निऽविदा। कव्यता। आयोः।
इमाः। प्र ऽ जाः। अजनयत्। मनूनाम्॥
विवस्वता। चक्षसा। द्याम्। अपः। च।
देवाः। अग्निम्। धारयन्। द्रविणः ऽ दाम्॥

४२० सोऽग्निः पुनः स्वधृतयाऽऽत्मनि पूर्वयैव
वाचा विदा कवितया निजया परेष्ट्या ॥
सेमाः प्रजा अजनयद् भुवि मानवान्ताः
सर्वाः स्वभूतिकल्योर्जितविश्वरूपाः ॥ ४ ॥

४२१ ओजायमानमहसा परमे पदे स्वे
व्योमन्यसौ लसति वाङ्मुखतो महस्वान् ॥
आविर्बभूव तपसेन्द्रचिताऽऽत्मनाऽन्तः
सर्वत्र चेतनमुखात् प्रविवेश शान्तः ॥ ५ ॥

४२२ यो जायमान इह सद् स जनिष्यमाणो
जातः स वाग्रसमुखोऽग्निरभीक्षमाणः ॥
छन्दस्वतीं स्वरसवाचममूं समार्थां
स्वान्तर्दधार सकलप्रसवे समर्थाम् ॥ ६ ॥

४२३ सा वागपीन्द्रमहसाऽभिमुखादुदीर्णा
चिज्ज्योतिषाऽखिलमिदं स्वरसा ज्जजान ॥
सा विश्वभूतिपरमा परमात्मधाम्ना
स्वाविष्कृतेर्निजपरोर्जितिमाजगाम ॥ ७ ॥

॥ ब्रह्मात्मवाग्विश्वसृष्टेरनुक्रमः ॥

४२४ ब्रह्मात्मनश्चितिमुखात् परवाग्विसृष्टिः
चिज्ज्योतिषः सरस - सस्वरशब्दसृष्टिः ॥
वाचोमुखादखिलभूतविभूतिसृष्टिः
वाग्ब्रह्मणो रसचितोरिह विश्वसृष्टिः ॥ ८ ॥

४२५ प्रत्यङ्मुखा चितिपराऽऽत्मनि वाक् प्रतीची
प्राज्ञात्मचेतनकलाऽभ्युदिता समीची ॥
साऽहश्चिताऽऽन्तरमहः करणात् स्फुरन्ती
स्वाहा श्रिया निजपदे स्वरया स्वसन्ती ॥ ९ ॥

४२६ पूर्णः प्रचेतनपरात्मनि राजमानः
प्रत्यञ्चि विद्रसपरोऽयमजायमानः ॥
वाचा विदैव बहुधाऽत्र विजायमानः
वाच्यः परेण तपसा सहसाऽऽजजान ॥१०॥

४२७ विश्वोदयाय भगवान् स सदा तपस्यन्
विश्वात्ययेन मघवान् स्वविदा महस्यन् ॥
विश्वानि भूतभुवनान्यजुहोन्निजान्तः
स्वात्मानमप्यनुतपोऽग्निमुखे समन्तात् ॥११॥

४२८ तस्मान्महातपसि सर्वहुतोऽधियज्ञा-
च्छन्दाँस्युदीयुरखिलानि समाध्यभिज्ञात् ॥
ब्रह्माणि मन्त्रवदनानि ऋगात्मकानि
सामानि सुस्वरपराणि यजुर्मयानि ॥१२॥

४२९ सैव त्रयी जगति साऽखिलसंविदर्णा
सैवाक्षरात्मपरमामृतसत्त्वगीर्णा ॥
सा विश्वभूतभुवनादिविभूतिपूर्णा
सा श्रीः परा भुवि सताममृताऽभ्युदीर्णा ॥१३॥

४३० यश्छन्दसामृषभ इन्द्र इति श्रुतीष्टः
यो विश्वरूपगुणपूर्णविभूतिशिष्टः ॥
छन्दोभ्य एव निजवाङ्मुखतोऽभ्युदीर्णः
वाच्यार्थसंविदुदयात् स्वयमेव पूर्णः ॥१४॥

४३१ अन्योऽन्यजन्मकरणं परमं वरेण्यं
वाग्ब्रह्मवस्तुचरमं चरणं शरण्यम् ॥
वेदे समस्तगुणवस्तुविदे समानं
लोकेऽपि तत् तनुभृतां [illegible] ॥१५॥

४३२ सृष्ट्यादितो यददितेरुदितः स दक्षः
आदित्य आदिममहोमुदितः समक्षः ॥
दक्षात् पुनश्चितिपरात् परमप्रकाशा-
दाकाशभागदितिरास समा दिवाऽऽशा ॥१६॥

४३३ इन्द्रात्मनो जगति वाग्रसचिद्विकासः
तद्वाङ्मुखेन पुनरिन्द्रगुणप्रकाशः ॥
अन्योऽन्यमेवमिह वाचक-वाच्यभावाद्
आविष्कृतिस्तदुभयोः समसत्त्वयोगः ॥१७॥

४३४ वाग् - वस्तुसत्त्वनियतं निखिलं हि साङ्गं
वाग् - आत्मतत्त्वनिहितं निजमन्तराङ्गम् ॥
वाग् - ईशदैवततं सकलं सुदिव्यं
वाग् - ब्रह्मभावविभवं परमं विभाव्यम् ॥१८॥

४३५ एवं समस्तजगतां परमं निदानं
वाग् - ब्रह्मसत्त्वमुदगात् प्रथमं निधानम् ॥
संवित्क्रियासहितभावनचित्प्रधानं
तद्वाक्सुधासमरसात्मगुणाभिधानम् ॥१९

॥ विशिष्टवैदिकशब्देभ्यो विशिष्टगुणवस्तूनां विसृष्टिः ॥

## ॥ ऋङ्मन्त्रः ॥

एते असृग्रमिन्दवस्तिरः पवित्रमाशवः ॥
विश्वान्यभिसौभगा ॥

( [illegible] )

## ॥ पदपाठः ॥

एते । असृग्रम् । इन्दवः । तिरः । पवित्रम् । आशवः ॥

विश्वानि । अभि । सौभगा ॥

## ॥ औपनिषदं ब्राह्मणानुवचनम् ॥

"एते इति वै प्रजापतिः देवानसृजद्, असृग्रमिति मनुष्यान्, इन्दव इति पितॄन्, तिरः पवित्रमिति ग्रहान्, आशव इति स्तोत्रम्, विश्वानीति शस्त्रम्, अभिसौभगेत्यन्याः प्रजाः" ॥ इति ॥

## ॥ ब्रह्मसूत्रम् ॥

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ।
अत एव च नित्यत्वम् ॥

( ब्र० सू० १-३-२८-२९)

---

४३६ "एते असृग्र" मिति वेदमुखात् स्वमन्त्रात्
सैष प्रजापतिरनादिधृतात् स्वतन्त्रात् ॥
एतत् ससर्ज सकलं जगदादिमात्राद्-
एवं स्ववागुदितविश्वविभूतिमात्रम् ॥२०॥

### " एते "

४३७ "एते" इतीरितपदाद् दिवि सर्वदेवान्
एतान् समक्षगुणतैजसचित्स्वभावान् ॥
स्वीयान् त्समान् निजचितोर्जितसत्यभावान्
एतान् [illegible] परमप्रभावान् ॥२१॥

"असृग्रम्"

४३८ तस्माद् "असृग्र" मिति सत्पदतोऽनुरूपाद्
अन्वर्थकादनुगुणात् सुविसर्गसत्त्वात् ॥
जीवान् सदात्मकलया सुविसृष्टिशक्तान्
सर्वान् त्सचेतनमथानसृजन्मनुष्यान् ॥२२॥

"इन्दवः"

४३९ नाम्नाऽऽत्मनेन्दव इति प्रथिताश्च सोमाः
सोमो मनश्चिदपि तन्मनसस्पतिः सन् ॥
तस्माद् रसात्मनि चितान्मनसः प्रजातः
सत्त्वाच्च चिद्रसयुतात् पितृमान् मनस्वान् ॥२३॥

"सोमः पितृमान्"

४४० सोमः स एव पितृमान् स पिता मनस्वान्
सेन्द्रः स्वसामरसतः स्वचिता महस्वान् ॥
तस्मात् तदिन्दुपदतः स पितॄन् त्ससर्ज
स्वस्माच्चिदेकमिथुनान् पितृसत्त्वयुक्तान् ॥२४॥

४४१ तस्मान्मतं तदुभयोरपि मातृ-पित्रो-
स्तत्त्वैक्यतः प्रतिविसृष्टिगुणक्रियाप्तेः ॥
तथ्यं पितृत्वमपि तत्र यथार्थसञ्ज्ञं
सञ्ज्ञानुरूपजनिसत्कृतिसत्प्रतिज्ञम् ॥२५॥

॥ अग्निष्वात्ताः पितरः ॥

४४२ दिव्येषु तेषु पितरोऽग्निषु विद्युताऽऽत्ताः
सौम्याभिरद्भिरपि सद्रसचिद्भिरात्ताः ॥
तेजोरसैकगुणसत्त्वयुताश्च तेऽग्नी-
षोमात्मका जगति सृष्टिकृते समर्थाः ॥२६॥

"तिरः पवित्रम्"

४४३ तिर्यक् सुभूतपदभृद् भुवनादिपात्रं
तिर्यक्त्वसत्त्ववितत्तं च तिरः पवित्रम् ॥
तेनासृजत् स भुवनत्रयलोकरूपान्
गृह्यान् ग्रहात्मकपरानपि पात्ररूपान् ॥२७॥

"आशवः"

४४४ ये चाशवः प्रगतितः प्रति विश्वमाप्ताः
ये चाश्वनामगुणधर्मकृतिप्रदीप्ताः ॥
वागश्वरश्मिरससंविदुपात्तसत्त्वं
तत् स्तोत्रमाशव इतीह पदात् ससर्ज ॥२८॥

"विश्वानि"

४४५ "विश्वानि" विश्वगुणभूतिकविश्वरूपं
विश्वाससत्त्वपरिपूर्णमनन्तरूपम् ॥
शस्त्रं प्रशासनपरं परिशंसनार्थं
तद् विश्वतः प्रति ससर्ज स विश्वशब्दात् ॥२९॥

"अभि सौभगा"

४४६ योगोदितोऽत्र भगवानभि सौभगेती-
त्यन्याः प्रजाः समसृजत् समसौभगाय ॥
व्याप्तं विभूतिकलया सुभगत्वमस्मिन्
तसद् वैश्वरूप्यमुदितं च सदाऽस्ति तस्मिन् ॥३०॥

॥ साङ्केतिकाः "एते" इत्यादयः शब्दाः ॥

४४७ साङ्केतिकास्तु त इमे ऽ त्र समस्तशब्दाः
सङ्ख्यातवस्तुविषयेषु च गुप्तसंस्थाः ॥
तत्त्वार्थबोधकलयाऽन्तरिताः समाख्याः
तन्नामशेषपरया परमात्मना ऽऽ सुः ॥२१॥

४४८ एवं स्वसंविदितमन्त्रमुखात् स्वतन्त्रात्
तत्तत्सदर्थगुणवाचकनाममात्रात् ॥
विश्वानि भूतभुवनानि च देव-जीवाः
वाच्यार्थवस्तुगुणरूपत आविरासुः ॥२२॥

॥ इति चतुर्दशी कला सम्पूर्णा ॥

वेदशब्दतो ऽ त्र विश्वसृष्टिरादितः प्रभौ
नादशक्तिरप्यनादितोऽस्ति विश्वतो विभौ ॥
वेदवस्तुनः परात्मनो विदां सुधानिधौ
वेदसंविदैव दैवरातवाक्सुधा बभौ ॥१४॥

## ॥ पञ्चदशी कला ॥

### ॥ अस्मिन् विषये औपनिषदं तत्त्वम् ॥

४४९ ब्रह्मात्मनो निर्गुणतः परस्मात् प्राग् विश्वसृष्टेः परमाच्च कस्मात् ॥
अखण्डनादात्मपरेह तस्माद् ओङ्कारचिद्वागुदगादकस्मात् ॥ १ ॥

॥ ॐ ॥

४५० ओङ्काररूपाक्षरमन्त्रवर्णः वाग्रूपमात्रात्रितयैकवर्णः ॥
ब्रह्मात्मनोवाचकसत्त्वपूर्णो ब्रह्मैव साक्षात् परचित्त्युदीर्णः ॥ २ ॥

४५१ ओङ्काररूपात् परमाक्षरात् ततो वेदा श्च सर्वेऽभ्युदिता ऋगादयः ॥
तद् वेदबीजाक्षरमास्थितं स्वतो देवाः समस्ताः सुहितास्तदाश्रये ॥ ३ ॥

४५२ लोकैस्त्रिभिस्तत्त्रितयाभ्युदीर्णैः ज्योतिर्भिरेभ्योऽभ्युदितै श्च वेदैः ॥
त्रय्योदितव्याहृतिभिस्तदाद्यं मात्रात्रयेणोदितमोमितीदम् ॥ ४ ॥

४५३ वाच्यार्थ - तद्वाचकयोरभेदात् तादात्म्ययोगादपि तत्प्रभेदात् ॥
वागात्मनोः सन्मिथुनैकसत्त्वं स्त्रीपुँस्त्वकं शक्तिशिवात्मकत्वम् ॥ ५ ॥

४५४ तत्तत्परैस्तैर्निजवाचकाख्यैः शब्दैश्च तत्तद्वचनार्थमुख्यैः ॥
विश्वनि भूतानि च वस्तुजातान्यादौ परात्माऽभ्यसृजत् स्ववाचा ॥ ६ ॥

॥ भूः ॥ (१)

४५५ स भूरिति व्याहरदादिसृष्टौ भूमिं स्वभूतामसृजत् प्रकृष्टाम् ॥
सामर्थ्यतः सस्वरशब्दवर्णा भूमिः परा भूरिह भूमवर्णा ॥ ७ ॥

॥ भुवः ॥ (२)

३५६ ततः परस्माद् भुव इत्युदीर्णं तेनेह मध्येऽसृजदन्तरिक्षम् ॥
द्यावापृथिव्योः समसन्धिरूपं सङ्केतशक्त्या तदपादरूपम् ॥ ८ ॥

॥ स्वः ॥ (३)

४५७ स्वरित्यसौ व्याहरदात्मवाचा तेनासृजद् व्योमगुणप्रकृत्या ॥
तेजः पदं तत् स्वर-सद्रसाप्त्या व्याप्त्या च वागास्पदमादिभूत्या ॥ ९ ॥

४५८ भूरित्यतोऽग्निर्भुव इत्यतो ऽ निलः
स्वरित्यथादित्य इहोदितास्त्रयः ॥
भूरित्यसौ ऋक् प्रति साम तद् भुवः
स्वः स्याद् यजुस्तै श्च समाहिता त्रयी ॥१०॥

४५९ भूरित्ययं प्राण इति श्रुतीष्टो भुवस्तथाऽपान इति प्रतीतः ॥
स्वरित्यसौ व्यान इह प्रभाप्त्या व्याप्त्या तदध्यात्मगुणादितत्त्वात् ॥११॥

४६० ता वा इमा व्याहृतयोऽत्र तिस्रो व्यस्ताः समस्ताः श्रुतिमन्त्रवाचः ॥
एनाः पुनः स्युर्महसा चतस्रो माहाचमस्येष्टमहश्चतुर्थी ॥१२॥

॥ महः ॥ (४)

४६१ आदित्य एवात्र महस्तुरीयो महीयते तेन समस्तलोकः ॥
ज्योतिर्मयोऽसौ तु महान् रसदात्मा दिव्यात्मिकैव हि देवतात्मा ॥१३॥

४६२ ज्योतिश्चतुर्थं हि महस्तु चन्द्रमाः ज्योतिः पुनस्तेन महीयतेऽखिलम् ॥
पूर्णात्मकः पूर्णकलाभिरुत्तमः प्रशान्तहृत् साममहारसोत्तमः ॥१४॥

४६३ महस्तु तद् ब्रह्म तुरीयमुत्तमं तेनैव वेदोऽत्र महीयते समः ॥
आद्या इह ब्रह्ममयाः प्ररोरचकाः वेदाश्च ते मन्त्रमयाः सुवाचकाः ॥१५॥

४६४ महस्तदन्नं प्रथितं मनः परं प्राणोऽत्र तेनैव महीयते परः ॥
ज्योतीरसैकात्मकमेव सन्महो महीयते तद् भुवि भास्वतामहः ॥१६॥

४६५ एता महाव्याहृतयश्चतस्रो वाचश्चतुर्व्यूहतताश्चतुर्धा ॥
यो वेद वाग्ब्रह्ममयीः समास्ताः सत्यं परं ब्रह्म स वेद वेत्ता ॥१७॥

४६६ महस्तु तद् ब्रह्म परं महत्तमं यद् बृंहते यच्च महीयते समम् ॥
विश्वं जगद् बृंहयतीह सत्तमं ब्रह्मैव सत्यं महयत्यनूत्तमम् ॥१८॥

४६७ महः परं ब्रह्म परः स आत्मा सर्वान्तरात्माऽप्रतिमो महात्मा ॥
अन्याः समस्ता अपि देवतास्ता अङ्गात्मिकास्तस्य विभूतिसत्त्वाः ॥१९॥

॥ सप्त व्याहृतयः ॥

४६८ ऊर्ध्वाः परा व्याहृतयोऽत्र तिस्र स्ताभि श्च योगेन हि सप्त सिद्धाः ॥
पूर्वास्तु भूरादय एव तिस्रो महःप्रमुख्याश्च पराश्चतस्रः ॥२०॥

॥ विष्णोः सप्त धामानि ॥

४६९ सप्तैव ता व्याहृतयः श्रुतीष्टाः ताः सप्त वाणीर्विदुरीशशक्तीः ॥
धामात्मिका दिव्यपदात्मिकास्ता विष्णोस्तु लोका भुवनात्मिकाः स्युः ॥२१॥

४७० स्थानानि लोका भुवनानि विष्णो र्धामानि नामानि पदानि जिष्णोः ॥
चराचराणि स्वचिता चरिष्णोः सोपानरूपाणि सदा सहिष्णोः ॥२२॥

॥ जनः ॥ (५)

४७१ "जनः" परा व्याहृतिरेव वाङ्मयी सा पञ्चमी पञ्चजनप्रभामयी ॥
जनो जनानां जनकः स लोकः ज्योतिः परो ज्ञानचिताऽवलोकः ॥२३॥

॥ तपः ॥ (६)

४७२ "तपः" स कोकस्तपसा चिता तपन् स्वतेजसा सद्वचसा समालपन् ॥
तमः सुदुष्टं दुरितं च तापयन् त्स्वाज्ञान-मोहादि दहन् विलापयन् ॥२४॥

४७३ "तपः" परो व्याहृतिरत्र षष्ठी वाग् देवता साऽऽत्मनि पारमेष्ठी ॥
सन्तप्यते ब्रह्मणि संविदिष्ट्या तेनाप्यते ब्रह्म सदात्मदृष्ट्या ॥२५॥

॥ सत्यम् ॥ (७)

४७४ सत्यं हि लोकात्मकमुत्तमं पदं नित्यं परानन्दसुधारसास्पदम् ॥
सत्यात्मकं ब्रह्म परं च वाक्पदं पूर्णात्मकं पूर्णविरामसत्पदम् ॥२६॥

४७५ "सत्यं" महाव्याहृतिरत्र सप्तमी वागात्मिका सर्वगुणा सदात्नी ॥
सत्यव्रतेनात्र समस्ततारिणी तस्मादसत्यादिहृदां प्रतारिणी ॥२७॥

४७६ सत्येन सद् ब्रह्म विदा हृदाऽऽप्यते तत्सत्यवाचा सकलं समाप्यते ॥
सच्छ्रद्धयैवात्मनि सत्यमाप्यते सत्ये पदे सर्वमिदं समाप्यते ॥२८॥

॥ भुवनत्रये सर्वभुवनान्तर्भावः ॥

४७७ त्रिष्वेव लोकेषु हि सप्त लोकान् अन्तर्हितांस्तत्रसमस्तलोकान् ॥
त्रीनेव तान् वै विदुरादिलोकान् वेदे च लोके तदनादिलोकान् ॥२९॥

४७८ तथैव तद्व्याहृतिषु प्रतीष्टं तत्त्वं समं शास्त्रदशाऽविशिष्टम् ॥
सर्वत्र यज्ञादिषु वेदशिष्टं तद् व्याहृतीनां त्रितयं विशिष्टम् ॥३०॥

४७९ तिसृष्वपि व्याहृतिषु प्रयोगे सप्तस्वपि प्रत्यनुमन्त्रयोगे ॥
ओमित्यदः सप्रणवप्रयोगः प्रत्येकशः स्यादनुषङ्गयोगः ॥३१॥

४८० प्राणस्य सत्संयमने समन्त्रके सप्तस्वपि व्याहृतिषु स्वतन्त्रके ॥
प्रत्येकशस्तत्प्रणवस्य योगिके स सार्थकः स्यात् क्वचिदानुषङ्गिके ॥३२॥

॥ इति पञ्चदशीकला सम्पूर्णा ॥

ओमितीह भूर्भुवः स्वरादिवाक्सुवासिनी
व्योमसद्विभूतिसोमहृत्कलासुहासिनी ॥
वेदवाङ्मुखेन विश्वसृष्टिसद्विकासिनी
देवनीतदैवरातवाक्सुधाविलासिनी ॥१५॥

## ॥ षोडशी कला ॥

### ॥ ब्रह्मचोदनी वाक् ॥

४८१ विद्युद्दूज्र्चिदग्रवह्निवदनादज्ञानविच्छेदिनी
विद्यावेदविधिप्रकृष्टवचना स्वच्छन्दसाऽऽच्छादिनी ॥
सत्यासत्यविमर्शनैककरणात् प्रज्ञानहृच्छादिनी
सर्वेषामनुशासनी विजयते "वाग् ब्रह्मसञ्चोदनी" ॥ १ ॥

### ॥ ऋङ्मन्त्रः ॥

**यां पूषन् ब्रह्मचोदनीमारां बिभर्ष्याघृणे ॥**
**तया समस्य हृदयमारिख किकिरा कृणु ॥**

( ऋ० म० ६।५३।८ )

### ॥ पदपाठः ॥

**याम् । पूषन् । ब्रह्मऽचोदनीम् । आराम् । बिभर्षि । आघृणे ॥**
**तया । समस्य । हृदयम् । आ । रिख । किकिः । आ । कृणु ॥**

४८२ या पूष्णः सवितुर्जगत्सुनयना चिज्ज्योतिरग्रानना
या विद्युज्ज्वलदग्निकोग्रवचना वज्रप्रभाग्राञ्चना ॥
चित्या दिव्यतपःप्रभानिशितया वाचा प्रदीप्तारया
सर्वेषां हृदि रेखया लिखतु सा "वाग् ब्रह्मसञ्चोदनी" ॥ २ ॥

४८३ साक्षाद्ब्रह्मसरूपसत्त्ववचसां सञ्चोदयित्री सतां
नित्यानित्यविवेकसत्त्वमनसां सञ्चेतयित्री गिराम् ॥
सत्यैकात्मकवस्तुतत्त्वसदना सञ्चेतमाना सती
सत्यात्मा परदेवतात्मवदना "वाग् ब्रह्मसञ्चोदनी" ॥ ३ ॥

४८४ छन्दःसंहितवेदमन्त्रवचसां प्रत्यक्षसद्ब्रह्मणां
छन्दःपूरुषयोगतः स्वतपसा हृद्योगसत्प्रेरणात् ॥
चिद्योगादृषिषु प्रतिस्फुरणतः श्रुत्याऽऽत्मवाग्वादिनी
ब्रह्मात्माऽक्षरदेवता विजयते "वाग् ब्रह्मसञ्चोदनी" ॥ ४ ॥

४८५ गायित्री सवितुः पराक्षरमयी ज्योतिर्मयी चिन्मयी
सामर्थ्यात् स्वरसेन बोधयति सा ब्रह्मैव संविन्मयी ॥
पूर्णात्मा पुरुषे परात्मनि धियः श्रद्धामयीः प्रेरयेद्
गायन्तं प्रणयेन पालयति सा "वाग् ब्रह्मसञ्चोदिनी" ॥ ५ ॥

४८६ पूर्णाद् विष्णुपदान्महः स्वरपदात् सम्प्रच्युता स्वः स्वरात्
प्रज्ञानादिमहाप्रवाहपरया शक्त्या प्रगल्याऽक्षरात् ॥
प्रत्यक्प्राणचितेः प्रचेतयति सा विश्वं जगच्चेतना
प्रत्यक्षेण धियो विराजयति सा "वाग् ब्रह्मसञ्चोदनी" ॥ ६ ॥

४८७ प्राक् सृष्टेः परमात्मचिद्गुणपरं ब्रह्मैव सत् केवलं
प्रत्नं सिद्धमकारणं ह्यकरणं विश्वादिसृष्टेरलम् ॥
वाचैवात्र बभूव तत्तु सगुणं व्योमादितन्मात्रया
वाच्यं ब्रह्म सुचोदयत्यनुपदं "वाग् ब्रह्मसञ्चोदनी ॥ ७ ॥

४८८ विश्वस्मात् परतः समग्रजगतो मूर्ध्न्यन्तरे व्योमनि
ज्योतिः स्वं सवितारमेव सुषुवे विश्वप्रकाशात्मकम् ॥
तद्विश्वप्रसवे रसस्वरचिता प्रादुर्बभूवात्मनो
विश्वाध्यक्षपरात्मवेदवदना "वाग् ब्रह्मसञ्चोदनी" ॥ ८ ॥

४८९ सर्वेषां हृदि संस्फुरच्चितिकला सा ऽहम्मतिप्रत्यया
सा सर्वेन्द्रिसम्प्रसादविमला सञ्चेतमानाऽत्यया ॥
मूर्ध्न्यन्तः स्वरसामरस्यनिलया सोमामृतैकायना
स्वात्मानं परमं समीरयति सा "वाग् ब्रह्मसञ्चोदनी" ॥ ९ ॥

४९० सिद्धा व्योम्नि सरस्वती स्वरवती चित्त्याऽऽस्रवन्ती सती
स्निग्धा सोमसरित्सुधारसवती संवित्सुतेजस्वती ॥
अन्नं ब्रह्म रसं च संविदमपि श्रेयः सनिश्श्रेयसं
नित्यं प्रेरयतीन्द्रसत्त्वमहसा "वाग् ब्रह्मसञ्चोदनी" ॥१०॥

४९१ दिव्यं जीवनसद्रसं समरसं पूर्णात्मसंविद्रसं
पूर्णं शान्तिसुधारसं सुखरसं शक्तिप्रदं चिद्रसम् ॥
ब्रह्मात्मोदितवाक्सुधारसमयी सर्वस्वसञ्जीवनी
पूर्णानन्दरसं प्रवर्षयति सा "वाग् ब्रह्मसञ्चोदनी" ॥११॥

४९२ विश्वप्राणरसं प्रचेतनरसं सञ्जीवनीयोद्रसं
विश्वाध्यक्षविभूतिसत्त्वकरसं हृत्प्राणसद्ब्रह्मसम् ॥
विद्यावेदसुधामहोदधिरसं वेदात्मवाग्वादिनी
वेदब्रह्ममुखात् सदा वितरताद् "वाग् ब्रह्मसञ्चोदनी ॥१२॥

४९३ वीणावादनसन्निनादवदना वाक्सत्त्वसन्दोहिनी
नानानामसरूपकानुवचना नादानुसन्धायिनी ॥
नादे ब्रह्म परं प्रबोधयति सा वीणारसास्वादिनी
नादब्रह्मपरायणा विजयते "वाग् ब्रह्मसञ्चेदनी" ॥१३॥

४९४ स्वान्तः साररसेन्द्रसेन्दुकल्या स्वोद्गीथ विद्यायनी
सर्वप्राणमनःप्रहर्षनिलया नृणां समाप्याथिनी
साहम्प्रत्ययसानुभावपरया वाचा धियाऽऽवेदिनी
स्वात्मारामरसायनानुहृदया "वाग् ब्रह्मसञ्चोदनी" ॥१४॥

४९५ मूलाधारपदे प्रचेतनमयी प्राणात्मसञ्जीवनी
मूर्धन्यन्तरनाहताऽऽत्मनिनदा हृत्सोमरस्योन्मनी ॥
प्रत्यक्कुण्डलिनीचिदूर्ध्ववदना नाड़ीसुषुम्णायनी
प्रज्ञानामृतवर्षिणी समधियां "वाग् ब्रह्मसञ्चोदनी ॥१५॥

४९६ विष्णौ केवलसत्त्वके भगवती सा योगनिद्रामयी
पूर्णे ब्रह्मणि सामरस्यलसिता सा मौनमुद्रामयी ॥
रुद्रे पूर्णसमाधिसत्त्वनिरता चिद्योगनिद्रामयी
पूर्णात्मा परदेवता चितिमयी "वाग् ब्रह्मसञ्चोदनी" ॥१६॥

४९७ ब्रह्माणीह बृहस्पतेस्तु बृहती नाम्ना स्वरूपात् समा
साक्षाद् ब्रह्म शचीपतेरपि सती सा ब्राह्मणस्पत्यभूः ॥
ब्रह्माणं च बृहस्पतिं निजचितेरिन्द्रं महाहस्तिनं
विश्वस्याभ्युदयाय चोदयति सा "वाग् ब्रह्मसञ्चोदनी" ॥१७॥

४९८ ब्रह्मात्मप्रतिमा रसेन परमा छन्दस्स्वरैकात्मिका
ब्राह्मी स्वाक्षरसत्यवस्तुनि रता सा सत्यमन्त्रात्मिका ॥
ब्रह्माणं च सुमेधसं परमृषिं वीरं नरं कुर्वन्ती
ब्रह्मण्याऽऽत्मवलेन बृंहयति सा "वाग् ब्रह्मसञ्चोदनी" ॥१८॥

४९९ ब्रह्माणी पुरुषे स्ववेदवदने स्वीये परे ब्रह्मणि
प्रज्ञानात्मनि संहिता रसतमा पूर्णा समा ब्रह्मणा ॥
प्राज्ञं विश्वविभूतये निजपतिं शक्त्या प्रसूतेऽर्थिनी
ज्ञानेच्छाकृतिभिः प्रचोदयति सा "वाग् ब्रह्मसञ्चोदनी" ॥१९॥

५०० वाचं धेनुमिमां परामजनयन् विश्वे च देवाः परे
वाच्यार्थैः परमार्थसत्त्वकरसैः पूर्णां चतुर्भिः स्तनैः ॥
विश्वेषामिषमूर्जमायुरमृतं नित्यं दुहाना सती
वाग् धेनुः समुपास्यतां प्रतिनुते "वाग् ब्रह्मसञ्चोदनी" ॥२०॥

५०१ मर्त्यानां सुहितार्थसाधनपरा सर्वार्थसन्धायिनी
कामानामपि कर्मणां समविदां श्रेयोरसाधायिनी ॥
आर्षेयाणि च मन्त्रवर्णवचनान्याधानि पूर्णात्मनो
ब्रह्माणि प्रणुता प्रचोदयति सा "वाग् ब्रह्मसञ्चोदनी" ॥२१॥

५०२ प्रत्यक्षा प्रणवाभिधानसदना पूर्णात्ममन्त्रस्वरा
प्रत्यग्ब्रह्मगुणादिनामवदना तद्वाचकैकाक्षरा ॥
पूर्णज्ञानगुणक्रियाप्रकृतिका दिव्याधनूरूपिणी
लक्ष्यं ब्रह्म सुवेधयेत् स्वतपसा "वाग् ब्रह्मसञ्चोदनी" ॥२२॥

५०३ ईक्षारम्यतिसुस्वनानुकरणा संबिन्निनादानना
शान्तिः शक्तिमयी विराट् सुकिरणा वामाऽऽत्मवामेक्षणा ॥
नादब्रह्ममयी श्रुतिप्रणयना ब्रह्मात्मचिद्योगिनी
नादे ब्रह्मपरं प्रचोदयति सा "वाग् ब्रह्मसञ्चोदनी" ॥२३॥

## ॥ वज्रयोगिनी वाक् ॥

५०४ तारा तापभयादितारणपरा दिव्योग्रताराभिधा
सोत्तीर्णाऽखिलतारकाऽभयकरा फट्कारमन्त्रात्मभृत् ॥
विद्युद्वज्रसुकर्कशोग्रवदना वाग् वज्रयोगिन्यसौ
साक्षाद् ब्रह्मचिदग्रकोग्रवचना "वाग् ब्रह्मसञ्चोदनी" ॥२४॥

## ॥ शास्त्रयोनिः ॥

५०५ ऋग्वेदादिकशास्त्रयोनिरुदगाद् ब्रह्मात्महृद्योगिनी
ज्ञानेच्छाकृतिभृत् त्रिशक्तिपरमा सञ्चेतनाभोगिनी ॥
तद्व्योमादिविभूतिकाखिलजगद्योनिः प्रमाभागिनी
सा ब्रह्माद्यखिलप्रमाणवचना "वाग् ब्रह्मसञ्चोदनी" ॥२५॥

## ॥ अजपा गायत्री ॥

५०६ प्राणापानगतिप्रवृत्तिनिरता सोहंसमन्त्राक्षरा
प्रत्यञ्च्यात्मनि संहितेयमजपा गायत्रिसञ्ज्ञा स्वरा ॥
साऽहम्प्रत्ययचित्प्रकृत्युपहिता सञ्चेतना नादिनी
हंसोऽहंस इति प्रचेतयति सा "वाग् ब्रह्मसञ्चोदनी" ॥२६॥

## ॥ रुद्रशिखा ॥

५०७ रौद्री त्र्यम्बकसोमसूर्यहुतभुग्ज्योतिस्त्रिशक्तिध्वनिः
विद्युज्ज्योतिरुदीर्णवौषडिति तद्वज्रोग्रदिव्यध्वनिः ॥
भद्रा रुद्रशिखाग्रगोर्जितवषट्कारोग्रवज्रध्वनिः
प्रज्ञा पाशुपतास्त्रचिच्छिवधनु "वाग् ब्रह्मसञ्चोदनी" ॥२७॥

## ॥ शाम्भवी मुद्रा ॥

५०८ अन्तर्लक्ष्य-बहिर्दृगूर्जितमहामुद्रा परा शाम्भवी
द्वैविध्यासविरुद्धदिक्सुनियता लक्ष्यैकवेधोद्यता ॥
ब्रह्मात्मार्थकरूपनामनिरता दृक्छ्रोत्रचिद्योगिनी
पूर्णे ब्रह्मणि सैकवस्तुनि हिता "वाग् ब्रह्मसञ्चोदनी" ॥२८॥

५०९ फट्कारास्त्रकमन्त्रनामनिगदा क्रूरोग्रवाग्वादिनी
सा हस्तद्वयताडनादिव तडिद् भूतादिकोत्सादिनी ॥
घण्टावादनसौम्यनादगुणतो विघ्नादिसंहारिणी
साऽऽह्वानेऽपि च देवतार्चनविधौ "वाग् ब्रह्मसञ्चोदनी" ॥२९॥

## ॥ अक्षमालात्मिका वाक् ॥

५१० आदि-क्षान्तगसर्ववर्णरुचिरा श्रेष्ठा शिरोबिन्दुना
पञ्चाशन्निजमातृकाक्षरपरा पूर्णा चतुः षष्टिका ॥
मन्त्रोच्चारणतोऽक्षरानुगणनाद् रुद्राक्षमालार्थिनी
मौनेनात्मनि देवताचिदुदये "वाग् ब्रह्मसञ्चोदनी" ॥३०॥

५११ रेखाङ्काक्षरमन्त्रवर्णततिभिर्योगेन यन्त्रात्मिका
तन्त्रेण त्रितयी सदर्थकलया मन्त्रात्मिका देवता ॥
यन्त्रोल्लेखनतस्तदर्चनविधौ तल्लेखिका लेखनी
सा साक्षात् परदेवताप्रकृतिका "वाग् ब्रह्मसञ्चोदनी" ॥३१॥

५१२ मन्त्राणां जपयज्ञयोगिकविधौ मन्त्राक्षरोच्चारणात्

तत्तद्वर्णलिपिप्रतीकमुखतो मन्त्राक्षरोल्लेखनात् ॥

ध्यानाद् भावनया विदाऽऽत्मनि हृदा चिद्देवतासादिनी

साक्षाद् ब्रह्म परात्मिका विजयते "वाग् ब्रह्मसञ्चोदनी" ॥३२॥

॥ इति षोडशी कला सम्पूर्णा ॥

ब्रह्मचोदनी चिता रसेन वाक् पराभिधा

ब्रह्मवस्तुचेतनागुणेन तत्त्वतस्त्रिधा ॥

ब्रह्म तत् प्रचोदयेत् तदस्य वागुपाभिधा,

ब्रह्मणा प्रचोदिताऽत्र दैवरातवाक्सुधा ॥१६॥

## ॥ सप्तदशी कला ॥

५१३ सद्योजातशिशोः शुभे श्रुतिमुखे तज्जातकर्मान्तरे
वाग् वाग् वागिति तत्रिवारवचनात् सोऽयं त्रयीविद् भवेत् ॥
अस्मिन् सा विशतादिति प्रतिपदं योगेन सम्भावनात्
तस्मिन् त्सा प्रतिराजते स्वरवती "वाग् ब्रह्मसञ्चोदनी" ॥१॥

५१४ सद्योजातशिशोर्मुखे तु मधुना स्वर्णेन दूर्वादिना
जिह्वाग्रे सघृतेन शास्त्रविधिना मन्त्राक्षरोल्लेखनात् ॥
तारा नीलसरस्वती रसवती विद्यादिवाग्वर्धिनी
प्रज्ञानाद् रसनाग्रगा विजयते "वाग् ब्रह्मसञ्चोदनी" ॥२॥

५१५ सोऽज्ञोपीह ततो भवेद् भुवि महाविद्यादिसंसिद्धिभाग्
जिह्वायां हृदये च लेखनकृतेस्तत्संस्कृतेर्योगतः ॥
हृल्लेखा च वधूश्च मन्युमनुराट् तन्मत्रवाग्योगिनी
हृल्लेखा रसनाग्रगा विजयते "वाग् ब्रह्मसञ्चोदनी" ॥३॥

५१६ तत्पश्चादुपनायनेऽपि च वटोः संस्कारकर्मादिना
गायत्रीपरमन्त्रवर्णमुखतो ब्रह्मोपदेशादिना ॥
सन्ध्योपासनया जपादहरहर्धीयोगयज्ञादिना
श्रद्धासत्त्वधियः प्रचोदयति सा "वाग् ब्रह्मसञ्चोदनी" ॥४॥

५१७ भावेनापि च कर्मणा सह विदा ब्रह्मात्मना योगतः
साक्षात्कारकृतेऽनुभूतिधृतये पूर्णानुभावोदयात् ॥
गायन्तं स्वयमेव साऽऽत्मनिरतं सन्त्रायतेऽभ्यर्थिनं
गायत्री प्रभवेदलम्मतिकृते "वाग् ब्रह्मसञ्चोदनी" ॥५॥

५१८ गायत्री परदेवता मनुमयी श्रीर्वेदमातोर्जिता
सर्वज्ञानसुशान्ति शक्तिरसदा सर्वादिमात्रोदिता ॥
सर्वानुद्धरतीह पारयति सा सर्वापदस्तारिणी
साक्षाद् ब्रह्मपरायणा विजयते "वाग् ब्रह्मसञ्चोदनी" ॥६॥

५१९ गर्भे सन् हृदि वामदेवमुनिराड् लीनः शयानोऽन्तरे
भर्गात्मा भगवत्स्वरूप उदगान्निर्वेदसत्त्वे परे ॥
देवानां सकलानि दिव्यतपसा जन्मान्यवेदं स्वयं
वाचैवं समुवाच मन्त्रवचसा "वाग् ब्रह्मसञ्चोदनी" ॥७॥

५२० सर्वात्मानममुं समाहितहृदा साक्षात्कृतेर्योगतः
पश्यन् पूर्णसमाधिसद्रसनिधौ लीनो विदा सन्दृशा ॥
सोऽहम्प्रत्ययसानुभाववचनां प्रज्ञानहृद्योगिनीं
वाचं स्वां समुवाच मन्त्रवदना "वाग् ब्रह्मसञ्चोदनी" ॥८॥

५२१ स्वाविर्भूतनिजस्वरूपकहृदा सत्सन्दृशा संविदा
साहम्प्रत्ययचेतनास्फुरणतः सत्स्वानुभावान्मुदा ॥
छन्दोगीतिमयी सतीयमुदगात् पूर्णात्मसद्दर्शनात्
सैवात्मस्तुतिरात्ममन्त्रवचना "वाग् ब्रह्मसञ्चोदनी" ॥९॥

५२२ आद्यो मानवजातिमूलपुरुषः स्वायम्भुवो यो मनुः
सृष्ट्यादावुदगादयोनिजतनूस्तेजोऽववन्यात्मकः ॥
तज्जीवात्मन एव दिव्यतपसा ब्रह्मात्मतायोगिनी
तत्साक्षात्कृतिसत्यमन्त्रवचना "वाग् ब्रह्मसञ्चोदिनी ॥१०॥

५२३ सूर्योऽसौ दिवि सत्पतिस्त्रिजगतां ज्योतिर्मयः पूरुषः
सन्नात्मा भुवि जङ्गमस्य जगत श्चाचेतसस्तस्थुषः ॥
हृद्योगादभवत् तदन्तरमृतैर्दिव्यैः सरस्वान् स्वयं
स्वक्तिस्तस्य सरस्वती रसवती "वाग् ब्रह्मसञ्चोदनी" ॥११॥

## ॥ अहम्पद-प्रत्ययात्मिका वाक् ॥

५२४ अग्रे ब्रह्म परं तदास सकलं पूर्णात्मकं केवलं
स्वात्मानं स्वयमन्ववेदविकलं ब्रह्माहमस्मीत्यलम् ॥
तस्मादत्र तदेव सर्वमभवद् ब्रह्मात्मह्द्वेदिनी
तद्ब्रह्माद्यनुभावसत्त्ववदना "वाग् ब्रह्मसञ्चोदनी" ॥१२॥

५२५ तद्वद् यः प्रतिबोधचित्यनुगतं ब्रह्मैव वेदास्तिकः
तज्ज्ञानात् स्वयमेव तत् प्रति भवेत् तादात्म्ययोगास्तिकः ॥
तत्त्वाच्छास्त्रदशाऽनुभाववचनात् सत्यैकवाग्वादिनी
तथ्या सा भुवि वामदेववदनाद् "वाग् ब्रह्मसञ्चोदनी" ॥१३॥

५२६ प्रज्ञात्मा परमः पुराणपुरुषः प्राणोऽस्मि पूर्णात्मकः ।
पूर्णायुः परमामृतं हिततमं तत् पारमैश्वर्यकम् ॥
एवं सेन्द्रकृता प्रतर्दनकृते तत्त्वार्थसम्बोधिनी
साऽहम्प्रत्यययोगिनी विजयते "वाग् ब्रह्मसञ्चोदनी" ॥१४॥

## ॥ सर्ववर्णात्मिका अहम्पदस्वरूपा वाक् ॥

५२७ रुद्रादभ्युदिते परेऽक्षरसमाम्नाये तदाद्यान्त्ययोः
सामर्थ्याद् "अहकारयोः" सहितयोः पूर्णेन्दुबिन्द्वासयोः ॥
साऽऽद्याऽहम्पदसर्ववर्णवदना सर्वार्थसंवादिनी
सर्वत्रात्मसु संहितेयमहमा "वाग् ब्रह्मसञ्चोदनी" ॥१५॥

५२८ साऽहम्प्रत्ययचित्कृतिप्रणयना स्वाहङ्कृते योगिनी
साक्षात्कारपरायणाऽखिलगुणा सर्वाग्रगण्यायनी ॥
सर्वार्थेषु समर्थसर्वकरणै योगेन वागाम्भृणी
सर्वैर्देवगणैः सह प्रणिहिता "वाग् ब्रह्मसञ्चोदनी" ॥१६॥

## ॥ इन्द्राणी वाक् ॥

५२९ नारीष्विन्द्रसती गुणेन परमा सत्या समग्रादिमा
सा विश्वप्रसवार्थिका च सुभगा विश्वादिमातोत्तमा ॥
तस्या न म्रियते पतिर्हि जरया नान्या नृणां शासनी
सेन्द्राणी सकलप्रशासनपरा "वाग् ब्रह्मसञ्चोदनी" ॥१७॥

५३० संसिध्यै भुवि योगिनो नियमतः शुद्धाजिनं रोमशं
ह्ठयोगेन निषेदुषोऽचलधिया सन्निष्ठयैवानिशम् ॥
सक्थ्नो रन्तरिता कपृत् स्वसुखकृद् या ब्रह्मसंस्पर्शिनी
मूलाधारपदे स्थितेन्द्रवदना "वाग् ब्रह्मसञ्चोदनी ॥१८॥

५३१ यस्याधोवदनेन वागिह कपृद् दौर्बल्यतो लम्बते
नेष्टे स प्रतिपक्षिकेन्द्रियजये ह्म्देदिनां मर्दने ॥
ईष्टे तत्र स एव योगबलतश्चिच्छक्तितः शासनाद्
अन्तर्यस्य विजृम्भतेऽसुतपसा "वाग् ब्रह्मसञ्चोदनी" ॥१९॥

५३२ यस्मिँस्तद्विपरीतयोगकरणी मुद्रा सुभद्राऽर्जिता
सर्वार्थेन्द्रियवृत्तिकाऽऽत्मनिपरा वाक् संयमान्निर्जिता ॥
स्वायत्ता प्रतिसन्धृताऽऽत्मबलतः सर्वस्वतन्त्रोर्जिता
सेन्द्राणी भुवि सर्वथा विजयते "वाग् ब्रह्मसञ्चोदनी" ॥२०॥

५३३ सा वाग् यस्य विजृम्भते स्वनियता विक्षेपशक्त्योद्धृता
नेष्टेऽसौ परतन्त्रशक्तिरबलः सन् त्सर्वथा दुर्बलः ॥
ईष्टे सोऽत्र, समाधिसौम्यहृदया पूर्णा समर्थार्थिनी
शान्त्या यस्य हि लम्बतेऽन्तरमृता "वाग् ब्रह्मसञ्चोदनी" ॥२१॥

॥ शचीपतिः इन्द्रः वाचस्पतिः ॥

५३४ सर्वेषां हृदि मूर्ध्नि वै दिवि परे सम्राजते शक्तिमान्
सन्निन्द्रः सकलाधिपः स भगवान् सन् पारमैश्वर्यभृत् ॥
विश्वस्मादुदितः स उत्तर इति प्रत्याययन्तीश्वनी
सेन्द्राणी परमात्मशक्तिरमृता "वाग् ब्रह्मसञ्चोदनी" ॥२२॥

५३५ वाग् वै साऽत्र पराङ्मुखोत्तरपदा स्याद् वैखरी सस्वरा
स्वार्थं प्रत्यनुगच्छति प्रतिपदं सार्थानुवादाक्षरा ॥
सा प्रत्यङ्मुखमात्मनि प्रणिहिता स्वान्तःप्रतीची परा
प्रज्ञानामृतसद्रसप्रणयनाद् "वाग् ब्रह्मसञ्चोदनी" ॥२३॥

५३६ स्वाधीनां प्रतिसङ्गृहाण तपसा वाचं प्रतीचीं तथा
स्वान्तःस्थापय सन्मनोरशनया स्वायत्तयाऽश्वं यथा ॥
स्वायत्तेन्द्रियवर्ग आत्मनि परं प्राप्नोति लक्ष्यं पदं
सा सर्वेन्द्रियमूलशक्तिरदगाद् "वाग् ब्रह्मसञ्चोदनी" ॥२४॥

५३७ अर्वाक्सद्बिलमूर्ध्वबुध्नमुदितं सञ्चेतनस्यात्मनः
सम्भोगायतनं शरीरमुचितं तस्मिन् त्समस्तं यशः ॥
प्राणास्तत्र वसन्ति सप्त ऋषयो वागाष्टमी ब्रह्मणा
संवित्ते प्रतिवेदयत्यपि परं "वाग् ब्रह्मसञ्चोदनी" ॥२५॥

५३८ सर्वेष्वेव हि जन्तुषु प्रतिहिता जीवेषु देवेषु वै
पूर्णे ब्रह्मणिचेश्वरेऽपि वितता पूर्णा समानाऽऽत्मना ॥
सत्यैकायतना च सप्तभिरपि प्राणैर्निजैरष्टमी
संवित्तेऽननुषङ्गयोगपरमा "वाग् ब्रह्मसञ्चोदनी" ॥२६॥

५३९ स्वान्तर्ब्रह्माणि सा प्रचेतनपरा शक्तिस्तु सत्याऽक्षरा
सा सप्तेन्द्रियवर्गके सममनुस्यूताऽऽत्मसत्तापरा ॥
विज्ञानग्रहणे समस्तकरणान्येकैव तद्वादिनी
प्रज्ञानप्रतिदानशक्तिवदना "वाग् ब्रह्मसञ्चोदनी" ॥२७॥

५४० ज्ञानाप्त्यै ह्यौ श्रवणं त्वगक्षिरसना घ्राणं मनोधीरिति
स्वान्तर्धीन्द्रियसप्तकं प्रतिहितं ज्ञानप्रदैवाष्टमी ॥
शब्दादौ विषये प्रवृत्तिवदना सर्वार्थसंवादिनी
वागेकैव पराऽखिलान्तरतमा "वाग् ब्रह्मसञ्चोदनी" ॥२८॥

५४१ इन्द्रस्यात्मन आन्तरस्य बृहतो वाचः परायाः परः
प्राणानां च धियां च संयमनतो योगो भवेदान्तरः ॥
शान्त्यै शक्तिकृते नरः प्रभवति प्रत्यक्पराक्सत्त्वना
धीयोगेन सतां प्रसादकरणाद् "वाग् ब्रह्मसञ्चोदनी" ॥२९॥

५४२ सर्वाण्येव हि धीन्द्रियाणि यमयन् प्राणान् हृदा सन्नयन्
सर्वैस्तैः सह वाचमान्तरतमां प्रत्यङ्मुखां योजयन् ॥
भूयस्तां सममन्तरात्मनि चितां वाचं प्रतीचीं परां
भूमात्मन्युपसादयन् त्सुनमयेत् "वाग् ब्रह्मसञ्चोदनी" ॥३०॥

५४३ निर्वेदेन च मौनसत्त्वतपसा सा वाक् पराऽन्तस्तना
मूलाधारगता प्रचेतनपरा संवित्परा शन्तमा ॥
चिद्योगेन सुषुम्णया सुसुखया भर्गात्मह्द्योगिनी
पूर्णानन्दरसात्मना विरमते "वाग् ब्रह्मसञ्चोदनी ॥३१॥

५४४ प्राणैश्चाखिलधीन्द्रियैः समुदितां वाचं निजां वैखरीं
प्राज्ञः स्वान्तरनुस्वरन्, रसनया मन्त्रं समैकाक्षरम् ॥
प्रत्यञ्च्यात्मनि संविदा विरमतां पूर्णात्मसत्त्वाञ्चनात्
प्रत्यक्षं स्वरसं प्रसादयति सा "वाग् ब्रह्मसञ्चोदनी" ॥३२॥

॥ इति सप्तदशी कला सम्पूर्णा ॥

ब्रह्मसंविदाऽऽत्मसत्त्वयोगचित्समावृता
ब्रह्मविद्रसापिका चिदात्मना समादृता
ब्रह्मयोगिनीन्द्रवैद्युतात्मचित्प्रभापूता
ब्रह्मचोदनीह दैवरातवाक्सुधाप्लुता ॥१७॥

## ॥ अष्टादशी कला ॥

### ॥ सत्यमेव जयते ॥

### ॥ औपनिषदः श्लोकः ॥

सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ॥
येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥
( मुं० उ० ३ । १ । ६ )

### ॥ वाक्सुधा ॥

५४५ विश्वस्मिन्निह भूतले त्रिभुवने ब्रह्माण्डभूमण्डले
विश्वस्मात् परमं हि सत्यभुवनं विश्वाद्यधिष्ठानकम् ॥
तद् ब्रह्मात्मपरं प्रचेतनपदं सत्यं भवेन्नानृतं
सर्वत्रापि च "सत्यमेव जयते" सत्यात्मिका सूनृता ॥ १ ॥

५४६ सत्येनैव हि देवयान उदितः पन्थाः स दिव्याततो
येनोच्चं पदमाक्रमन्ति ऋषयः सम्प्राप्तकामाः समे ॥
तत् सत्यस्य परं निधानमधिकं यत्रास्ति पूर्णं पदं
सर्वत्रापि च "सत्यमेव जयते" सत्यात्मिका वाक् परा ॥ २ ॥

### ॥ औपनिषदः श्लोकः ॥

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम् ॥
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥
( मुं० उ० ३ । १ । ५ )

५४७ सत्येनैव हि लभ्यते सुतपसा सत्यः स आत्मा परः
सम्यग्ज्ञानमुखेन युक्तमनसा सद्ब्रह्मचर्यव्रतैः ॥
सत्यासत्यविमर्शनाप्तमहसा सत्यैकसत्त्वोदयात्
सर्वार्थेष्वपि "सत्यमेव जयते" सत्यैव सा वाक् त्रयी ॥ ३ ॥

॥ सत्यमेव परमं ब्रह्म ॥

॥ औपनिषदी ऋक् ॥

सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् ॥
सो ऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चिता ॥

( वैश्वदेवकाण्डे ( तै ) ब्रह्मोपनिषत् १ । १ )

॥ पदपाठः ॥

सत्यम् । ज्ञानम् । अनन्तम् । ब्रह्म ।
यः । वेद । निहितमिति नि हितम् । गुहायाम् । परमे । व्योमन् ॥
सः । अश्नुते । सर्वान् । कामान् । सह ।
ब्रह्मणा । विपश्चितेति विपः चिता ॥

५४८ सत्यं ज्ञानमनन्तमादिरहितं ब्रह्मैव तद् व्यापकं
यो वेदात्मनि हृद्गुहान्तरहितं गुह्यं परे व्योमनि ॥
सर्वेष्टान् स विपश्चिता ऽनु भवति प्रज्ञानतो ब्रह्मणा
सर्वस्मादिह "सत्यमेव जयते" सत्यात्मवाग्वर्मणा ॥ ४ ॥

॥ सत्यस्वरूपा वाक् ब्रह्मात्मिका ॥

॥ ऋक्पादः ॥

॥ यावद् ब्रह्म विष्ठितं तावती वाक् ॥

( ऋ० मं० १० । ११४ । ८ )

५४९ सत्यं ब्रह्म सहस्रधा सुविततं सद् विश्वरूपात्मकं
श्रेष्ठं पञ्चदशात्मसत्त्वलसितं द्यावापृथिव्योः समम् ॥
यावद् ब्रह्म ततं हि सत्यकलया ब्रह्मात्मवाक् तावती
सर्वार्थेष्वपि "सत्यमेव जयते" सत्यैव वाक् तत्सती ॥ ६ ॥

॥ सत्यः परमात्मा इन्द्रः ॥

॥ ऋङ्मन्त्रः ॥

सत्यमिद् वा उ तं वयमिन्द्रं स्तवाम नानृतम् ॥

(ऋ० मं० ८ । ६२ । १२)

॥ पदपाठः ॥

सत्यम् । इत् । वै । ऊम् इति । तम् । वयम् । इन्द्रम् । स्तवाम । न । अनृतम् ॥

५५० सर्वस्मादपि सत्यमेव परमं पूर्णं तमिन्द्रं विदुः
सत्यं ते परमिन्द्रमेव ऋषयः सर्वात्मना तुष्टुवुः ॥
तस्मात् तद्विपरीतमाहुरनृतं सत्यं वदेन्नानृतं
तत् साक्षादिह "सत्यमेव जयते" सत्यैव वाक् सूनृता ॥ ६ ॥

॥ पारमैश्वर्यपूर्णः इन्द्रः विश्वरूपः ॥

॥ ऋङ्मन्त्रः ॥

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रति चक्षणाय ॥
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥

(ऋ० मं० ६ । ४६ । १७)

॥ पदपाठः ॥

रूपंरूपमिति रूपम्ऽरूपम् । प्रतिऽरूपः । बभूव ।
तत् । अस्य । रूपम् । प्रतिऽचक्षणाय ॥
इन्द्रः । मायाभिः । पुरुऽरूपः । ईयते ।
युक्ताः । हि । अस्य । हरयः । शता । दश ॥

॥ तस्येदं औपनिषदं ब्राह्मणानुवचनम् ॥

"युक्ताह्यस्य हरयः शता दशेति" अयं वै हरयोऽयं वै दश च शतानि च सहस्राणि च बहूनि चानन्तानि च तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम् अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥

( बृ० उ० २।५।१९ )

५५१ इन्द्रो विश्वविभूतिपूर्णपुरुषः सत्यैकतत्त्वात् स्वयं
रूपं रूपमनुप्रविष्ट उदगात् तद् विश्वरूपान्वयम् ॥
तद्रूपं परवस्तुसत्त्वकमिदं सत्यात्मवस्त्वापकं
सर्वार्थेष्वपि "सत्यमेव जयते" वागिन्द्रसत्त्वात्मिका ॥ ७ ॥

॥ सत्य एव इन्द्रः, इन्द्र एव सत्यः ॥

॥ ऋङ्मन्त्रः ॥

प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति ॥
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभिष्टवाम ॥

( ऋ० मं० ८।१००।३ )

॥ पदपाठः ॥

प्र । सु । स्तोमम् । भरत । वाजयन्तः ।
इन्द्राय । सत्यम् । यदि । सत्यम् । अस्ति ॥
न । इन्द्रः । अस्ति । इति । नेमे । ऊँ इति । त्वः । आह ।
कः । ईम् । ददर्श । कम् । अभि । स्तवाम ॥

५५२ सत्यं संस्तवनं समर्प्य यजतामिन्द्राय सत्यात्मने
लोकेऽस्मिन् यदि सत्यमस्ति परमं तन्नित्यसिध्दं स्वयम् ॥
सत्ये वाचकवाच्यसत्त्वनिचयं सैकात्मकं चोभयं
तत्त्वैक्यादिह "सत्यमेव जयते" वाग्-वस्तुसत्त्वान्वयम् ॥ ८ ॥

॥ इन्द्रोनास्तीति कस्यचिन्मतम् ॥

५५३ नेन्द्रोऽस्तीति तु बाह्यभौतिकदृशः प्राहुश्च नेमे जनाः
कश्चित् प्राह क ईं ददर्श तमतः कं वा स्तवामेति च ॥
वाचैवास्ति तथा परं प्रतिवदन् सत्यं तदावेदयन्
वाच्यार्थेष्वपि "सत्यमेव जयते" तद्वाचका वागियम् ॥ ९ ॥

## ॥ ऋङ्मन्त्रः ॥

यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ॥
सो अर्यः पुष्टीर्विज इवामिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥

(ऋ० मं० २।१२।५)

## ॥ पदपाठः ॥

यम् । स्म । पृच्छन्ति । कुह । सः । इति । घोरम् ।
उत । ईम् । आहुः । न । एषः । अस्ति । इति । एनम् ॥
स । अर्यः । पुष्टीः । विजः ऽ इव । आ । मिनाति ।
श्रत् । अस्मै । धत्त । सः । जनासः । इन्द्रः ॥

५५४ पृच्छन्ति स्म यमुत्तमं स तु कुतो घोरं हि दुर्दर्शनं
प्राहुस्तं परमं परोक्षमपरे नास्तीति केचिद् विदुः ॥
सोऽर्यः सर्वजगत्प्रभुः प्रभवति श्रद्धत्त सत्यं वचः
सर्वार्थेष्वपि "सत्यमेव जयते" सत्यात्मिका वाक् परा ॥१०॥

॥ श्रद्धयैव सत्यवस्तुप्राप्तिः ॥

## ॥ ऋङ्मन्त्रः ॥

श्रद्धां देवा यजमाना वायुगोपा उपासते ॥
श्रद्धां हृदय्य या ऽऽकूत्या श्रद्धया विन्दते वसु ॥

(ऋ० मं० १०। ।४)

॥ पद पाठः ॥

श्रद्धाम् । देवाः । यजमानाः । वायुऽगोपाः । उप । आसते ॥
श्रद्धाम् । हृदय्यया । आकूत्या । श्रद्धया । विन्दते । वसु ॥

"व्रतेन दीक्षामाप्नोति दीक्षया दक्षिणामाप्नोति दक्षिणया
श्रद्धां श्रद्धया सत्यमाप्यते ॥"

( शुक्लयजुः )

५५५ श्रद्धा निश्चयसंविदेव परमा सत्या मसम्प्राप्तये
सत्यं वस्तु परं तथा वसु हृदा सच्छ्रद्धयैवाप्यते ॥
आकूत्यैव हृदय्ययाऽऽत्मनि विदा श्रद्धाऽऽत्मना लभ्यते
श्रद्धाप्तं भुवि "सत्यमेव जयते" श्रद्धा मयी वाक् सती ॥११॥

॥ सदसद्विमर्शनेन सत्यवस्तुज्ञानम् ॥

॥ ऋङ्मन्त्रः ॥

सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ॥
तयोर्यत् सत्यं यतरदृजीयस्तदित् सोमो ऽवति हन्त्यासत् ॥

( ऋ० मं० ७ । १०४ । १२ )

॥ पदपाठः ॥

सु ऽ विज्ञानम् । चिकितुषे । जनाय ।
सत् । च । असत् । च । वचसी इति । पस्पृधाते इति ॥
तयोः । यत् । सत्यम् । यतरत् । ऋजीयः ।
तत् । इत् । सोमः । अवति । हन्ति । आ । असत् ॥

५५६ विज्ञानाय विचारतः प्रथततामग्रे विमर्शास्पदे
सच्चासच्च सवस्तुनी च वचसी ते पस्पृधाते मिथः ॥
हृद्योगेन तयोर्हि सत्यमुचितं सोमोऽवति स्वान्वयं
सर्वार्थेष्वपि "सत्यमेव जयते" योगेन वाग्वस्तुनोः ॥१२॥

५५७ सत्यं ब्रह्म हि विश्वरूपविततं विश्वं च सत्यं जगत्
सत्यं वस्तु चिदात्मकं समहितं सद् विश्वरूपान्वितम् ॥
सत्येनैवमचेतनं जगदिदं सच्चेतनं सद् बभौ
सर्वत्रापिच "सत्यमेव जयते" योगेन वागात्मनोः ॥१३॥

५५८ सत्यं सद् वचनं च वस्तु विषयः सत्यः पदार्थः परः
सत्यं स्यादिह धर्म एव परमो धर्मः स सत्यात्मकः ॥
सत्यं ब्रह्म परं सदैव विततं ब्रह्मैव सत्यं विदुः
सत्यैकात्मनि "सत्यमेव जयते" योगेन वाग्ब्रह्मणोः ॥१४॥

५५९ लोकेस्मिँस्तु परोक्षवस्तुवचनं स्यात् संविशास्पदं
नास्त्यस्तीति विमर्शनेन सुधियः सत्यं परं लेभिरे ॥
सत्येनाप्यनुभावसत्त्ववचसा श्रद्धाऽनुसन्धायिनी
श्रद्धयाऽऽत्मनि "सत्यमेव जयते" वाक् सत्यकामायनी ॥१५॥

५६० सत्येनैव हि गम्यते जगदिदं जातं त्वसद् भौतिकं
सर्वं सत्यमिहानमन्ति परमं भूयो वदन्त्युत्तमम् ॥
सत्यं सर्वमिदं प्रतिष्ठितमलं सत्याय तस्मै नमः
सर्वत्रापि च "सत्यमेव जयते" सत्यात्मवाचे नमः ॥१६॥

॥ ऋत-सत्य तत्त्वविमर्शनम् ॥

## ॥ ऋङ्मन्त्रः ॥

ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत ॥ १ ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ॥ ३ ॥
( ऋ० मं० १० । १९० । १-३ )

॥ पद्पाठः ॥

ऋतम् । च । सत्यम् । च । अभि ऽ इद्धात् । तपसः । अधि । अजायत ।
सूर्याचन्द्रमसौ । धाता । यथाऽपूर्वम् । अकल्पयत ॥

५६१ प्राक् सृष्टेस्तदृतं च सत्यमुदगात् प्राज्ञात् तपस्तेजसः
प्रत्यङ् मानसिकं भवेदृतमिदं सत्यं पराग् वाचिकम् ॥
युक्तं तेन ऋतेन सत्यमितरत् सत्येन भूयादृतं
ह्येयोगादिह "सत्यमेव जयते" योगान्मनोवाकूचितोः ॥१७॥

॥ सोमारुद्रसत्त्वकं ऋतसत्यतत्त्वम् ॥

५६२ सोमेनैव रसात्मना सुमनसा गुप्ता प्रतीची ऋता
व्यक्ता साऽग्निमुखेन रुद्रमहसा सत्या पराचीरिता ॥
सोमारुद्रसुसत्त्वकं रसचितोर्योगेन सत्यं धृतं
द्वेधार्थेन च "सत्यमेव जयते" सत्येन वाक् सन्धृता ॥१८॥

सत्यं प्रपद्ये ऋतं प्रपद्ये ॥
(तै० ब्रा० ३ । २ । १)

५६३ साऽऽग्नेयीह पराङ्मुखा सुमहसा सत्यैव वाग् वैखरी
सौम्यान्तर्यमनःसुसत्त्वरसतः साऽन्तः परा स्यादृता ॥
साग्नीषोममयी सुसत्यवदना ज्योतीरसैकायना
सैकात्म्येन हि "सत्यमेव जयते" वागेकसत्यानना ॥१९॥

५६४ सर्वान्तः स्फुरणेन चेतनपरा स्यादष्टमी वागृता
सा प्राणैः सह सप्तभिः समुदिता सत्या परागूवर्तिता ॥
एवं सा ऋत-सत्यनामललिता सान्तर्बहिर्वृत्तिका
साम्यार्थेन हि "सत्यमेव जयते" वाक् सत्यसामर्थ्यतः ॥२०॥

५६५ सत्यामान्तरसप्तधीन्द्रियमुखद्वाराऽवकीर्णां निजां
वाचं तामनृतां कदाऽपि न वदेदात्मक्षये हेतुकाम् ॥
सत्या सा मनसा समं समुदिता सत्यैकसत्त्वैषिणी
सर्वार्थेष्वपि "सत्यमेव जयते" वाक् सत्यसन्तोषिणी ॥२१॥

५६६ सत्यं चानृतमत्र सत्यमभवत् सर्वं हि सत्यात्मकं
सत्यं ब्रह्म हि विश्वरूपमुदितं सत्यं च विश्वात्मकम् ॥
सत्यायैव समर्प्यतां च सकलं सत्यं परं तर्प्यतां
सर्वार्थेन च "सत्यमेव जयते" सत्यैव वाक् सार्थका ॥२२॥

॥ महाव्रतं सत्यं ॥

५६७ तत् सत्यं हि महाव्रतं भुवि भवे निःश्रेयसे श्रेयसे
मर्त्यानामपि दिव्यभावफलदं पूर्णामृतत्त्वापकम् ॥ *
सत्यं तद् वचसा सहैव सनसा स्वाऽन्तः सुहृद्यौगिकं
सर्वेष्वात्मसु "सत्यमेव जयते" सत्या च वाग्यौगिकी ॥२३॥

५६८ सत्येनात्मसुसंयमेन तपसा मर्त्यत्वमत्रानृतं
त्यक्त्वाऽऽप्नोति सुसत्यभावमहसा देवत्वमेवामृतम् ॥
तेनैवार्हति सोऽत्र देवयजने धर्मार्थकामामृते
सर्वत्रापि च "सत्यमेव जयते" सत्यैव वाग् धर्मिणी ॥२४॥

॥ औपनिषदः शान्तिमन्त्रः ॥

वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम्
आविरावीर्म एधि वेदस्य म आणी स्थः, श्रुतं मे मा
प्रहासीः, अनेनाधीतेन अहोरात्रान् सन्दधामि,
ऋतं वदिष्यामि, सत्यं वदिष्यामि, तन्मामवतु,
तद् वक्तारमवतु, अवतुमामवतु वक्तारमवतु वक्तारम् ॥
( मानव श्रौतसूत्रम् १ । ४ । ४ । ८ )

॥ वाङ्मनसयोर्योगेन सत्यत्वम् ॥

५६९ वाङ्मे सा मनसि स्थिताऽऽत्मनिहिता सत्यात्मिका स्याद्दते
तस्यां वाचि मनः प्रतितिष्ठितमिदं सत्येऽन्वितं स्याद्दतम् ॥
अन्योऽन्यं प्रतिनिष्ठया समुदितं सत्यैकतत्त्वोर्जितं
सर्वात्मन्यपि "सत्यमेव जयते" सा वाक् सुसत्योर्जिता ॥२५॥

॥ यज्ञीयं सत्यव्रतम् ॥

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ॥
इदमहमनृतात् सत्यमुपैमि ॥
(शु० य० सं० १।५।१)

अनृतात् सत्यमुपैमि । मानुषाद् दैव्यमुपैमि ॥
दैवीं वाचं यच्छामि ॥
(तै० ब्रा० १।२।१।१५)

५७० यज्ञे तत् परमं व्रतं सुविहितं सत्यं हि यज्ञार्थकं
देवानां यजनेऽधिकारकरणं देवत्वसम्पादकम् ॥
मर्त्यत्वस्य निवारणाधिकरणं तद् दिव्ययज्ञात्मकं
सर्वत्रापि च "सत्यमेव जयते" सत्यैव वाग् यज्ञनीः ॥२६॥

५७१ देवा स्ते दिवि सत्यसंहिततया तेजोमयाः पूरुषाः
मर्त्यास्तेऽनृतसंहितास्तनुभृतो मर्त्यं शरीरं त्विदम् ॥
सत्येनैव हि मानवा भुवि परं दिव्यामृतत्वं ययुः
सर्वार्थेष्वपि "सत्यमेव जयते" सत्यामृता वाक् स्वयम् ॥२७॥

॥ चक्षुर्वै सत्यम् ॥

५७२ चक्षुर्वै दिवि सत्यमेतदुदितं सत्यात्मदृक्सत्त्वकं
दृष्टं यद् भुवि चक्षुषा समदृशा तत् सत्यमाचक्षते ॥
साक्षाद्दर्शनतोऽभ्यनूदितमिदं सत्यं वचः संश्रुतं
सर्वार्थेष्वपि "सत्यमेव जयते" वागेव सत्याऽऽश्रुता ॥२८॥

॥ सत्यमेव परमो धर्मो यज्ञमयः ॥

५७३ सत्यं दिव्यमहाव्रतं हि परमं धर्मात्मकं चाक्षियं
यज्ञीयं परयज्ञसाधनमिदं यज्ञात्मनः सम्प्रियम् ॥
"यज्ञेनान्वयजन्त यज्ञमितिवत्" सत्येन सत्यं यजेत्
सर्वार्थेष्वपि "सत्यमेव जयते" वाक् सत्यधर्मात्मिका ॥२९॥

॥ सत्यसञ्ज्ञकः प्रथमो युगः ॥

५७४ सत्यः स प्रथमो युगः परतमो दिव्यः स कालात्मकः
सर्वे तत्र हि सत्यधर्मनिरता सत्यात्मयोगोदिताः ॥
सत्यात् तत्परमार्थतः प्रतिययुः पूर्णामृतत्वं पदं
सर्वत्रापिच "सत्यमेव जयते" सत्यात्मवागास्पदम् ॥३०॥

५७५ आत्माऽयं हृदि सत्यसत्त्वकचिता स्वाहञ्चितेः स्फूर्तिमान्
सत्यात्मा सविता जगत्प्रसविता स्वज्योतिषा मूर्तिमान् ॥
सर्वेषामपि मूर्ध्नि दिव्यमहसा तत्सोमरस्यान्वयात्
सर्वत्रापि च "सत्यमेव जयते" सत्यात्मवाक्प्रत्ययात् ॥३१॥

॥ सत्यमेव सप्तमं भुवनम् ॥

५७६ सत्यं वै दिवि सप्तमं हि भुवनं वाग् व्याहृतिः सप्तमी
दिव्यं धाम परात्मनोऽपि परमं पूर्णं विरामास्पदम् ॥
"तद् विष्णोः परमं पदं" विजयते सर्वस्वभूतिप्रदं
सर्वार्थेऽष्वपि "सत्यमेव जयते" सत्यात्मवाचः पदम् ॥३२॥

॥ इति अष्टादशी कला सम्पूर्णा ॥

सत्यमेव सञ्जयत्यनन्तचेतनात्मकं
सत्यवस्तु विश्वरूपसद्विभूतिसत्त्वकम् ॥
सत्यमिन्द्रदेवतात्मचिच्चिसत्तयाऽऽपूर्तं
सत्यमेव दैवरातवाक्सुधारसामृतम् ॥१८॥

# ॥ एकोनविंशी कला ॥

## ॥ स्मरणी ॥

५७७ ब्रह्मात्मस्मरणी स्वरानुकरणात् सञ्चेतनात्मेरिणी
ब्रह्मानुस्वरणात् स्वरानुसरणात् सत्संविदाकारिणी ॥
प्राक् सृष्टेः स्फुरणाच्चिताऽनुचरणात् सा संविदां सम्प्रणीः
वाक् सृष्टा "स्मरणी" परा त्रिकरणाद् आस्ते समग्राग्रणीः ॥१॥

५७८ पूर्णब्रह्मपराक्षरानुवचनात् सद्ब्रह्मसंस्मारिणी
प्रज्ञानाद् स्वरसद्रसासरसना सा संविदुच्चारिणी ॥
सर्वज्ञानकलासुधासुवदना सर्वार्थसञ्चारिणी
सर्वज्ञा "स्मरणी" सतां प्रणयना सर्वप्रजोत्तारिणी ॥ २ ॥

५७९ तारा संस्मरणात् स्वयं सुतरणी सर्वस्वसन्तारिणी
सारासारजगत्सु सत्त्वनयना सर्वार्थसंस्कारिणी ॥
सर्वाधारतमा सतामुदयना सा वाग्रसाधायिनी
सर्वार्थे "स्मरणी" सदा विलसति स्वात्मानुसन्धायिनी ॥ ३ ॥

५८० सर्वान्तर्यतमा परात् परतमा प्रज्ञा प्रतीची समा
सर्वार्थेष्वपि सत्तमा रसतमा वाचा पराची प्रमा ॥
नित्यं जागृतिसत्त्वका सुनयना संवित्सुधा सत्तमा
सत्यात्मा "स्मरणी" परान् रसयति स्वानन्दरस्योत्तमा ॥ ४ ॥

५८१ सृष्टेः प्राक् स्फुरतः परात्ममनसो रेतः स कामोऽग्रिमः
हृत्संविन्मननेक्षणात्मतपसो बीजैकसत्त्वोत्तमः ॥
भर्गात्मासुमनोन्मनी सुयमिनी ब्रह्माऽत्र कामायनी
रुद्राणी "स्मरणी" रता स्मरहरे साऽन्तर्हिता कामिनी ॥ ५ ॥

५८२ सत्या स्यादृत-सत्यतत्त्वकमनोवाग्ब्रह्मसंस्पर्शिनी
सत्यासत्यविमर्शनात्मकदृशा सत्यैकसम्मर्शिनी ॥
सौम्या सन्मनसा स्वसत्त्वगुणतः सत्यात्मसञ्चोदनी
सत्याप्ता "स्मरणी" सतां स्मरणदा सद्वस्तुसञ्चेतनी ॥ ६ ॥

५८३ इन्द्रो विश्वविभूतिपूर्णपुरुषः सन् पारमैश्वर्यभाग्
इन्द्रं तं विदुरन्तरात्मकमिमं वाचस्पतिं स्वं विदम् ॥
सर्वान्तः स्फुरति प्रचेतनपरा साऽहञ्चितोदेति वाक्
सेन्द्राप्ता "स्मरणी" न्द्रशक्तिरुदिता साऽहम्मतीर्णा पराक् ॥ ७ ॥

५८४ हंसोऽसौ दिवि तेजसा सममपां सख्ये चरन् विद्युता
सेन्द्रोऽयं हृदि चेतसाऽस्त्युपहितः सञ्चेतनात्मोद्यतः ॥
प्राणापानगतेश्चरत्यनुपदं हंसीव बाह्यान्तरा
साऽहञ्चित् "स्मरणी" स्वरेयमजपा गायत्रिनाम्नी परा ॥ ८ ॥

५८५ सर्वान्तः स्फुरणे स्थिताऽऽत्मनिधृता दिव्या ध्रुवा संस्मृतिः
सर्वेषाममृतत्त्वसिद्धिसुहिता सिद्धा प्रतीची धृतिः ॥
सर्वार्थानपि चेतनात्मकचितेराकर्षयत्यन्तरे
प्रत्यञ्चि "स्मरणी" समाधिकरणा सद्ब्रह्मणि स्वे परे ॥ ९ ॥

५८६ सा नामस्मरणेऽर्थिता हृदि हिता मन्त्रात्मिका वाचिका
सद्वस्तुप्रतिवोधभावविधृता वाच्यार्थसद्वाचका ॥
नित्यानुस्मरणात् सतां प्रणयनी स्वं वाच्यमर्थं प्रति
स्वार्थानां "स्मरणी" समर्थनपरा सञ्चच्छतेऽर्थे सति ॥१०॥

**॥ प्रथमा दशसङ्ख्याङ्कमाला ॥**

५८७ प्राक् सृष्टेरिह सर्ववस्तुगणने पूर्णेन्दुबिन्दोर्मुखात्
सङ्ख्याः पूर्णविरामतः समुदिताः पूर्णात्मनो वाङ्मुखात् ॥
एकद्वित्रिचतुष्कपञ्चपदभृत् षट् सप्त चाष्टौ नव
प्रत्यक्षा "स्मरणी" समग्रगणिनी सा बिन्दुना स्याद्दश ॥११॥

## ॥ ऋङ्मन्त्रः ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥
ऋ० मं० १० । ९० । १)

## ॥ पदपाठः ॥

सहस्रऽशीर्षा । पुरुषः । सहस्रऽअक्षः । सहस्रऽपात् ॥
सः । भूमिं । विश्वतः । वृत्वा । अति । अतिष्ठत् । दशऽअङ्गुलम् ॥

५८८ पूर्णात्मा स सहस्रशीर्षकलया भूमिं स्वसङ्ख्यावृतां
वृत्वा तां नवखण्डकां स्वमहसा पृत्वाऽन्ततो विश्वतः ॥
पश्चात् तच्च दशाङ्गुलं निजपदं चित्त्याऽत्यतिष्ठत् स्वयं
सङ्ख्यासा 'स्मरणी" समेति गुणतः सङ्ख्येयवस्त्वन्वयम् ॥१२॥

५८९ सङ्ख्याशास्त्रमिदं तदङ्कगणितं सर्वं दशाङ्कैः श्रितं
सङ्ख्येयं प्रथितं दशाङ्गुलमदः प्रायो दशाङ्गैः श्रुतम् ॥
मुद्रा सा च दशाङ्गुलीविरचिता सिध्येन्नमस्कारिणी
नम्रात्मा "स्मरणी" नमस्कृतिपरा स्यात् सर्वसन्नामिनी ॥१३॥

५९० ज्ञेया सा करमालिकाऽनुकरणी पञ्चाङ्गुलीयोगतः
गण्या पर्वभिरन्वितैश्च दशभिः साऽनामिकामध्यतः ॥
गुण्या सेयमगण्यगुण्यगणनाद् यज्ञादिकानां प्रणीः
गण्यासा "स्मरणी" समग्रगुणतः सर्वाग्रगण्याऽग्रणीः ॥१४॥

५९१ मन्त्राणां प्रजपाङ्गकेऽपि च करन्यासे समुद्रात्मिकः
सूर्यस्यापि च दर्शने करयुगात् स्याद् धेनुमुद्रामुखा ॥
देवादे र्नमने तु तन्त्रविहिता सा योनिमुद्रात्मिका
मुद्रासा "स्मरणी" समुद्ररसनायोगेन रुद्रात्मिका ॥१५॥

५९२ रुद्राः प्राणपराश्च धीन्द्रियपराः सिद्धा दशाङ्गोत्तमाः
भद्रैस्तैर्दशभिः सुदिव्यमणिभिः सन्मेरुणैकात्मना ॥
स्यादेकादशरुद्रसत्त्वकलया सा हस्तमालाऽऽदिमा
सङ्ख्याप्ता "स्मरणी" दशाङ्गुलपदं वृत्वाऽधितिष्ठेत् समा ॥१६॥

॥ द्वितीया षोडशकलात्मिका जपमालिका ॥

५९३ वर्णादिस्तदकारतोऽत्र गणनादाद्या विसर्गान्तगाः
वर्णाः षोडशसुस्वरार्णमणयः पूर्णाङ्कसङ्ख्यानुगाः ॥
इन्दोः पूर्णकलात्मकाद् गुणमयाद् बिन्दोरुदीर्णाः समाः
पूर्णात्मा "स्मरणी" जपानुगणने पूर्णात्मना सोत्तमा ॥१७॥

५९४ पूर्णा षोडशचित्कलात्ममणिभिः स्यात् पूर्णया सङ्ख्यया
पूर्णेन्दोरमृतादिभिश्च गुणिभिः प्राणादिभिश्चिद्गुणैः ॥
सञ्ज्ञानादिभिरात्मचित्तिकरणै ब्रह्मात्मसत्त्वैः परा
ज्ञानात्मा "स्मरणी" समैः स्वकरणैः सिद्धा हृदय्याऽऽन्तरा ॥१८॥

५९५ सञ्ज्ञानप्रभृतीनि षोडशमणिप्रज्ञाननामानि वै
ज्ञानानां गणने गुणादिगुणने सत्साधनान्येव हि ॥
प्राणानां परतः स्थिताऽऽन्तरतमा संवित्तमा चेतना
प्रज्ञानात् "स्मरणी" स्फुरत्यनुपदं वाक्संविदानाऽऽत्मना ॥१९॥

५९६ स्वान्तर्नित्यमजस्रसंस्मरणतो वृत्या धियाऽऽवर्तनात्
साऽहम्चित्स्फुरणात्मिका त्रिकरणैर्वाक्प्राणचित्तैः समम् ॥
स्वाहम्प्रत्ययचेतनानुसरणी श्रद्धानुसन्धायिनी
संस्फूर्तिः "स्मरणी" परात्मकलया चिन्मात्रयाऽऽप्यायिनी ॥२०॥

५९७ इन्दोः षोडशभिः कलाभिरुदगादाप्यायमानादिभिः
सेन्द्रोदीर्णविभूतिभिश्च चितिभिः सत्त्वेन पूर्णा बभौ ॥
शान्त्याद्या सितचन्द्ररस्यकलया सा पूर्णमासी चिता
पूर्णात्मा "स्मरणी" सुसौम्यहृदया तत्सामरस्याश्रिता ॥२१॥

॥ अकारादिक्षकारान्ता रुद्राक्षमाला ॥

५९८ रुद्रादभ्युदिता पराक्षरमयी रुद्राक्षमालामयी
भद्रा भर्गपराऽप्रिया स्वरमयी संवित्परा वाङ्मयी ॥
आदि-क्षान्ततताऽखिलार्थपरतायोगेन विद्युन्मयी
रुद्राणी "स्मरणी" स्वरे रसघरे प्रभ्राजते चिन्मयी ॥२२॥

॥ पञ्चाशद्वर्णमाला ॥

५९९ पञ्चाशद्वरवस्तुवर्णरचिता सा वर्णमालाऽऽत्मना
पञ्चास्योर्जितमातृकामनुचिता सिद्धा शिरोबिन्दुना ॥
प्राचां वैदिकरुद्रियाक्षरसमाम्नायार्चिता वाक् सतां
प्राणाप्ता "स्मरणी" स्थिरेण मनसा वाचा सदा जप्यताम् ॥२३॥

॥ अष्टोत्तरशतक्लृप्ता जपमालिका ॥

६०० प्राचीनाऽक्षरमालिकैव हि पुनः पञ्चाशदर्णात्मिका
प्रायो लोमविलोमतः सुगणिता भूयो द्विरावर्तिता ॥
वर्णैः सा ऽ कचटैः परैस्तपयशैः साष्टोत्तरं स्याच्छतं
वर्णाप्ता "स्मरणी" चिदात्मनि हृदा हस्तेन गण्या जपे ॥२४॥

॥ चतुः षष्टिकलान्विता वर्णमाला ॥

६०१ भव्या वैदिकवर्णसत्त्वकलया सिद्धा चतुःषष्टिका
प्राज्ञानां हृदि मूर्ध्नि चित्तविधृता सा पूर्णसङ्ख्यात्मिका ॥
सा सर्वाक्षरमूलिका समुदिता स्यात् सर्वभाषात्मिका
पूर्णार्णा "स्मरणी" स्वपूर्णकलया सम्राजते मालिका ॥२५॥

॥ सहस्राक्षरा वाङ्मयी मालिका चतुर्विंशत्युत्तराच ॥

६०२ गौरी वाक् समिमाय पङ्क्तिरखिलं सिद्धा सहस्राक्षरा
सैका द्वे च चतुष्कमष्ट नव चेत्याप्ता चतुर्विंशतिः ॥
गुर्वी सा जपमालिकाऽक्षरपरा स्यात् पूर्णसङ्ख्यापरा
साहस्री "स्मरणी" सहस्रशिरसा पुंसा स्वशीर्षाश्रिता ॥२६॥

॥ रुद्रात्मिका सहस्राक्षु मणिमाला ॥

६०३ विद्युज्ज्यौतिषचित्पराणुमणयस्तीक्ष्णा अणीयः कलाः
रुद्रा एव सहस्रशो गुणमया ब्रह्माण्डभूमण्डले ॥
रुद्रायैव नमो नमो भगवते प्रभ्राजमानाय ते
रुद्राप्ता "स्मरणी" सहस्रकिरणा रुद्राक्षमालायते ॥२७॥

६०४ गौरी माध्यमिकाऽऽत्मविद्युदुदिता सा वाक् सहस्राक्षरा
गुर्वीन्द्रात्मसहस्ररश्मिनयना पूर्णा चतुर्विंशतेः ॥
रुद्रस्यापि सहस्रधाकृतिपरा बाह्वोर्बलौजश्श्रितेः
भर्गाप्ता "स्मरणी" शिखाग्रसदना शीर्षे सहस्रारगा ॥२८॥

॥ यावद् ब्रह्म विष्ठितं तावती वाक् ॥

६०५ उक्थानीह सहस्रधा सुविततान्यात्मस्वरूपाण्यणोः
श्रेष्ठानि प्रथितानि पञ्चदशकानीन्द्रात्मनो ब्रह्मणः ॥
यावद् ब्रह्म परं गुणेन विततं वाक् तावती सन्तता
वाक्सत्त्वा "स्मरणी" रसेन रमते ब्रह्मात्मसत्त्वान्विता ॥२९॥

६०६ सूर्योऽसौ दिवि तेजसा प्रतपति ज्योतिस्तदेकं स्वहं
प्राणात्मा दशधाऽऽततः स शतधाऽप्यावर्तमानोऽन्वहम् ॥
ज्योतिष्मान् स सहस्ररश्मिरुदितः सन् विश्वरूपः स्वयं
सूर्याप्ता "स्मरणी" सहस्रकिरणैरास्ते चिदात्मान्वयम् ॥३०॥

॥ औपनिषदो यजुर्मन्त्रवर्णाः ॥

सहस्रपरमा देवी दशमूला शताङ्कुरा ॥
सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी ॥

( तै० ना० उ० वैश्वदेवकाण्डम् )

६०७ मूलासा दशमूलिका प्रथमजा सङ्ख्याङ्कका मालिका
मध्यासा च शताङ्कुरा दशगुणाद् वृध्याऽभ्युदीर्णालिका ॥
दुः स्वप्नादिविनाशिनी सुतपसा पापादिसंहारिणी
सानन्त्या "स्मरणी" सहस्रपरमा दूर्वाङ्कुराकारिणी ॥३१॥

६०८ वाचा तत्र सहस्रशः प्रजपनं मन्त्राक्षरोच्चारणाच्-
छ्वासोच्छ्वासनिरीक्षणेन शतशः प्राणस्य सत्संयमात् ॥
श्रेष्ठो मानसिकः सहस्रगुणभाग् स स्याद्दशाङ्काग्रणीः
सङ्ख्यासा "स्मरणी" जपानुकरणी ब्रह्मात्मसंस्मारिणी ॥३२॥

॥ इति एकोनविंशी कला सम्पूर्णा ॥

अक्षमालिका जपोचिता स्मरण्युपार्जिता
साक्षिचित्कलात्मिकाङ्कसङ्ख्यया गुणोर्जिता ॥
अक्षरैः सवाक्स्वरात्मकाङ्ककैः समर्चिता
साक्षिनीतदैवरातवाक्सुधासमर्पिता ॥१९॥

## ॥ विंशी कला ॥

### ॥ दिग् व्योमादिदेशगुणात्मिका वाक् ॥

६०९ दिग्देशात्मकदिव्यधामनिलया सर्वस्वभूताश्रया
दिव्या विश्वविभूतियोगकलया सर्वात्मशक्त्योच्चया ॥
दिग्व्योमादितिबिन्दुसत्त्वनिचया शब्दैकसन्मात्रया
दिश्या ब्रह्म शरीरपादहृदया वाग्विश्वदेशाश्रया ॥१॥

६१० भूतानां भवनाश्रया त्रिभुवनाऽऽधारात्मिका भौवना
भावाभावसमस्तभावनपदा योगेन भूमात्मना ॥
सप्ताङ्गत्रिचतुर्दशादिसदना ज्योतीरसैकायना
सत्यब्रह्मपदामृतेन्दुपरमा वाक् पूर्णबिन्द्वात्मना ॥२॥

### ॥ भुवनत्रययौगिका वाग् व्याहृतिरूपा ॥

६११ ब्रह्माण्डे भुवनत्रयं प्रतिपदं तद् भूर्भुवः स्वः पदं
तिस्रो व्याहृतयो यजुर्मनुपदा वाचस्त्रयी बीजकाः ॥
लोका मानवदेवतादिसदनास्तेऽग्नीन्द्रसूर्यास्थिताः
दिग्देशात्मतया धरेयमधरा स्यान्मध्यमोर्ध्वा परा ॥३॥

६१२ पृथ्वीळा, भुवि संस्थिताऽग्निवदना वागेव सेळाऽवमा
वैद्युत्यैन्द्रचिताऽन्तरिक्षसदना सा भारती मध्यमा ॥
व्योमस्थैव सरस्वतीह परमा सूर्यः सरस्वाँस्तया
सैकैव त्रिविधा सती विजयते दिग्देशशक्त्या स्वया ॥४॥

॥ आध्यात्म कण्ठादिस्थानयौगिकी वाक् ॥

६१३ स्थानानीह नृणां शरीरसदने संवित्क्रियाकारणे
सर्वेषामुपसंस्थितानि वदने वाचः समुच्चारणे ॥
तत्स्थानानुगुणादियोगमुखतो मूलादिमूर्धान्तगा
वाक् कण्ठ्यादिगुणस्वरार्णमुखतः स्थानीयनामानुगा ॥ ५ ॥

६१४ उच्चैर्मूर्धनि नादतः समुदितः स स्यादुदात्तः स्वरः
नीचैरन्तरितो हृदि प्रतिहितो वेद्योऽनुदात्तोऽपरः ॥
तद्योगात् स्वरितः स उत्तमगतेः सिद्धः समाहारतः
स्थानैः कालकलादिसत्त्वमुदिता वागेव सा त्रिस्वरा ॥ ६ ॥

६१५ मूलाधारपदेऽन्तरात्मनि रता मूला परा चेतना
मध्येऽन्तर्हृदये स्वराऽसुनिहिता सा हार्दिकी मध्यमा ॥
मुख्यप्राणचिदिन्द्रवन्हिवदना मुख्याऽऽत्महंसाहता
मूर्धन्यो परमेन्दुबिन्दुसदना वागुत्तमाऽनाहता ॥ ७ ॥

॥ देशादिमर्यादारहिता पूर्णाबिन्दुरूपा वाक् ॥

६१६ अग्रे विश्वविसृष्टितोऽग्रिमपदे वाग् विश्वभूतास्पदे
सत्ये वस्तुनि देशकालपरमे ब्रह्मात्मनि स्वे पदे ॥
अग्र्यं तत् परमं पदं निरुपमं पूर्णात्मबिन्द्वात्मकं
साऽनुस्वारपदं स्वराक्षरपदं पुर्णेन्दुसत्त्वात्मकम् ॥ ८ ॥

॥ कालात्मिका वाक् ॥

६१७ सर्वाधारतमः समश्च विषमो भूतो भवन् भावुकः
सर्गाद्योऽपि पुरातनः स परमः सृष्ट्यादिकल्पान्तकः ॥
सर्वत्रास्ति सदातनः ससवनः कालः स वाक्सत्त्वकः
सर्वस्वं कलयत्यनन्तकलया वागेव कालात्मिका ॥ ९ ॥

## ॥ सवनात्मिका वाक् ॥

६१८ वाक् सत्त्वात् सवनान्विता समरसाद् योगेन कालात्मना
सा नित्यात् सवनस्वरेण निहिता त्रेधा विभिन्नाऽऽत्मना ॥
शक्त्या कालविभाजकेन रविणा दिव्योषसा तेजसा
शान्त्या चन्द्रमसा रसात्मकलया पूर्णा समात्मौजसा ॥१०॥

## ॥ प्रथमे प्रातः सवने मन्द्रात्मिका वाक् ॥

६१९ वाक् प्रातः सवने सुसौम्यवचना सूक्ष्मस्वरा हार्दिकी
प्रातः कालकलौषसाग्निवदना षड्जर्षभाद्यात्मिकी ॥
भूपाली कलमन्द्रसन्मृदुरवा सा माधुरी मञ्जुला
ब्राह्मीनाममुहूर्तरागललिता सौम्या समाऽऽद्या स्वरा ॥११॥

## ॥ द्वितीये माध्यन्दिने सवने मध्यमा वाक् ॥

६२० वाग् वै सैव पुनर्द्वितीयसवने मध्यन्दिने मण्डले
व्योमारूढसुतीक्ष्णरश्मिसदने या प्रौढसूर्योज्ज्वले ॥
मध्यस्थानसमाननामकरणा सा मध्यमा भैरवी
गम्भीराऽऽत्मनि कण्ठगा गुरुगुणा भद्रा सदुग्रोद्रवा ॥१२॥

## ॥ तृतीये सायं-सवने तारस्वरा वाक् ॥

६२१ सायाह्ने परमा तृतीयसवने तत्रापराण्हान्तगा
वागुच्चस्वरनादसत्स्वनदना तारा निषादान्तगा ॥
कल्याणीन्दुरसात्मवारुणरवा मूर्धन्यनादानुगा
साल्हादादिविवृद्धिसद्रसगुणा सोदीर्णभावोर्ध्वगा ॥१३॥

॥ लवादिमात्रात्मिका वाक् ॥

६२२ सैकद्वित्रिलवादिकालकल्या सन्मात्रया सम्भृता
सा वाग् वर्णगुणस्वरादिपरया ह्रस्वा च दीर्घा प्लुता ॥
संवृत्ता परनामरूपपरया स्वस्वार्थसत्त्वान्वयात्
सर्वस्मिन् त्समतालयादिनिलया सत्त्वात्मनैकालयात् ॥१४॥

॥ ऋङ्मन्त्रः ॥

॥ प्राणात्मगतिमात्रादियौगिकी आध्यात्मिकी वाक् ॥

अन्तश्चरति रोचनाऽस्य प्राणादपानती ॥
व्यख्यन् महिषो दिवम् ॥

( ऋ० मं० १० । १८९ । २ )

॥ पदपाठः ॥

अन्तः । चरति । रोचना । अस्य । प्राणात् । अपानती ॥
विऽअख्यन् । महिषः । दिवम् ॥

६२३ ब्रघ्नोऽसौ रविरम्बरे परि तपन् नित्यं समुद्यन् दिशा
बाह्यः प्राण इहाखिलं प्रति नयन् त्साक्षात् सुदृष्टो दृशा ॥
सर्वान्तर्हृदि संस्थितश्चिति लसन् त्सोऽन्तर्बहिश्चाप्यतन्
प्राणापानगतेश्चरत्यनुलवं प्राणञ्श्वसन् उच्छ्वसन् ॥१५॥

॥ ऋङ्मन्त्रः ॥

॥ प्राणगतिसङ्क्रमणधामगणना ॥

त्रिंशद् धाम विराजति वाक् पतङ्गाय धीयते ॥
प्रति वस्तोरह द्युभिः ॥ (३)

॥ पदपाठः ॥

त्रिंशत् । धाम॑ । वि । राजति । वाक् । पतङ्गाय॑ । धीयते ॥
प्रति॑ । वस्तोः । अह॑ । द्युऽभिः ॥

६२४ एकस्मिन् दिवसे प्रजापतिरसौ संवत्सरात्मा रविः
लोकेऽस्मिन् प्रतिबोधयन् निजगतेः प्राणात्मचित्यन्वयम् ॥
त्रिंशद्धामसु राजते प्रगतितस्तावत्पदैः सङ्क्रमात्
तद्योगात् प्रतिधीयतेऽसुनियमात् सा वाक् पतङ्गात्मने ॥१६॥

॥ प्राणगत्या सह आत्मनि वाचः सन्धारणम् ॥

॥ ऋङ्मन्त्रः ॥

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ॥
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ॥

( ऋ० मं० १० । १ )

॥ पदपाठः ॥

पतङ्गः । वाच॑म् । मन॑सा । बिभर्ति । ताम् । गन्धर्वः । अवदत् । गर्भे॑ । अन्तरिति॑ ॥
ताम् । द्योत॑मानाम् । स्वर्य॑म् । मनीषाम् । ऋतस्य॑ । पदे । कवयः । नि । पान्ति ॥

६२५ प्रत्यङ् सोऽयमिहान्तरेव मनसा वाचं बिभर्ति स्वयं
प्राणो गायति देहगर्भहृदये गन्धर्वरूपोऽन्वहम् ॥
प्रत्यञ्च्यात्मनि तां परेण तपसा वाचं प्रतीचीं परां
प्रत्यक्षादपरोक्षतश्च कवयो रक्षन्ति सत्ये पदे ॥१७॥

## ॥ भगवन्मते: संख्यामात्रादिगणितम् ॥

### ॥ ब्राह्मणौपनिषदः श्लोकः ॥

अमादन्यत्र परिवर्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि ।
अहोरात्राभ्यां पुरुषः समेन कतिकृत्वः प्राणिति चापचाणिति ॥

शतं शतानि पुरुषः समेन अष्टौ शता यन्मितं तद् वदन्ति ।
अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति चापचाणिति ॥

( शतपथ ब्रा० १२।३।२।७-८ )

### ॥ तद्गणितप्रक्रिया ॥

शतं शतानि, १०० × १००

दश सहस्रम्, १००००

अष्टौशतानि ८००

अष्ट शतोत्तरं १०८००

दश सहस्रम् अष्टशतोत्तरम्

अहोरात्राभ्यां १०८००×२

द्वाभ्यां समेन २१६००

गुणितेन षट् शतोत्तराणि एक विंशति सहस्राणि भवन्ति,

एकस्मिन मुहूर्ते ७२० विंशत्युत्तराणि सप्तशतानि, प्राणगतिरूपाणि पदानि भवन्ति ॥

त्रिंशद्घामसु मुहूर्तेषु ७२०×३०

२१६००

एकस्मिन्दिने प्राणापानगतयः

अत्रायं विशिष्टो विषय :- एकस्मिन संवत्सरे यावन्ति अहोरात्राणि ७२० तावन्त्येव एकस्मिन् मुहूर्ते ४५ मिनिट् समये प्राणापानगतिरूपाणि पदानि सम्पद्यन्ते इति ।

६२६ यावन्तीह रवेर्भवन्ति तदहोरात्राणि संवत्सरे
तावन्त्येकमुहूर्तकेऽसुगतितः पादानि चान्तर्बहिः ॥
योगात् सप्त शतानि विंशतिरपि, त्रिंशन्मुहूर्तान्तरे
साहस्राण्यपि चैकविंशतिरिति स्युः षट् शतानि स्वरे ॥१८॥

॥ प्राणात्मयौगिका हंसाक्षरस्वरात्मिका वाक् ॥

॥ ऋङ्मन्त्रः ॥

बीभत्सूनां सयुजं हंसमाहु-
रपां दिव्यानां सख्ये चरन्तम् ॥
अनुष्टुभमनु चर्चूर्यमाण-
मिन्द्रं निचिक्युः कवयो मनीषा ॥

॥ पदपाठः ॥

बीभत्सूनाम् । सऽयुजम् । हसम् । आहुः । अपाम् । दिव्यानाम् । सख्ये । चरन्तम् ॥
अनुऽस्तुभम् । अनु । चर्चूर्यमाणम् । इन्द्रम् । निचिक्युः । कवयः । मनीषा ॥

६२७ हंसोऽसौ रविरिन्द्र एव भगवान् प्राणस्तथाऽऽत्माऽऽन्तरः
सोऽहञ्चित्स्वरथा स्फुरत्यनु भवान् वाचाऽन्वितः सन् परः ॥
सा हंसीह भवेत् परेयमजपा गायत्रिनामाञ्चिता
सर्वान्तः परचेतनात्मनि रता वाक् प्राणचित्तान्विता ॥१९॥

॥ सा माध्यमिका वागेव गौरी विद्युदात्मिका ॥

६२८ साऽध्यात्मं परमोर्ध्वमूर्धनि रता व्योम्नः पराऽऽत्मस्वरा
चित्संवित्परभावनाकृतिहिता पूर्णा सहस्राक्षरा ॥
गौरी वाक् प्रति सङ्गताऽऽत्मनि चतुर्विंशत्युपात्तोत्तरा
गुर्वीन्द्रात्मनि राजते रसमयी सा वैद्युती चित्परा ॥२०॥

॥ वसन्तर्तुवरिष्ठा वाक् ॥

६२९ वासन्तादिऋतुप्रसादकलया माधुर्यरस्यस्वना
वास्तव्यान्मधुमाधवैकनिलया चित्राविशाखेन्दुना ॥
काम्या कामकलात्मना ललितया मेषाद् वृषात् सूर्यतः
वाक् सौम्या कलिका वसन्ततिलका नाम्नाऽनुरूपार्थतः ॥२१॥

६३० स्वीयर्तौ प्रथमे वसन्तसमये योगाद् युगाद्येन्दुना
सूर्येणाप्यरुणात्मना ऋतुमती रात्रौ सिता बिन्दुना ॥
सौम्या पुष्पवती सती फलवती सा सुस्वरा मञ्जुला
सस्यै गन्धवती रसै मधुमती वाक् कोमला कोकिला ॥२२॥

६३१ लोकेऽस्मिन्त्सकले प्रपञ्चरसदा वाक् सुस्वराऽभ्यस्यतां
विश्वस्मिन् व्यवहारसिद्धिसुखदा शक्तिः समाशास्यताम् ॥
विद्याज्ञानसुधीसुयोगधृतिदा सौम्यैः स्वरैः शस्यतां
वेद्यानन्दपरात्मशान्तिफलदा वाग् देवतोपास्यताम् ॥२३॥

॥ ग्रीष्मर्तुतेजोगरिष्ठा वाक् ॥

६३२ ग्रीष्मर्तौ तपसा सुतीक्ष्णरविणा दिव्यात्मना तेजसा
गीर्णा शुक्रशुचिप्रदीप्तकिरणा प्राज्ञात्मना स्वोजसा ॥
जेष्ठाषाढयुतेन्दुना सुकरणा कालात्मना स्वार्चिषा
श्रेष्ठा सा मिथुनाप्तकर्कचरणा वाग् भ्राजते ज्योतिषा ॥२४॥

॥ वर्षर्तुनिष्ठा संविदादिरसवर्षिष्ठा वाक् ॥ (३)

६३३ वर्षर्तौ जलवर्षणात् स्वगुणतः प्राणान् त्सदा जीवयन्
वृष्ट्याऽसौ तु नभोनमस्यरसतो विश्वं हृदा तर्पयन् ॥
शस्ता श्रावणभाद्रपादगुणभागिन्द्रोऽर्चिषा वैद्युतः
शच्या वाग्रसवर्षणाद् विजयते वाक् सिंहकन्याधुला ॥२५॥

॥ शारदर्तुप्रदा शान्तिदा वाक् शारदा ॥ (४)

६३४ शान्त्या संशितशारदर्तुमहसा चेषस्तथोर्जश्च सन्
शक्त्याऽसौ रविरंशुमान् त्सुतपसा साकं तुलावृश्चिकौ ॥
शान्तेन्दोः कल्याऽश्विवह्निसहसा स्यादश्विनीकृत्तिका-
शस्ता पूर्णकलाससौम्यमनसा वाक् संविदा शारदा ॥२६॥

॥ हेमन्तर्तुरता हैमवती वाक् ॥ (५)

६३५ हेमन्तर्तुरता सती हिमवता स्वेन्द्रेण सेन्द्रैर्हिमैः
हैमात्मा च सहःसहस्यसहिता शीता प्रशान्ता समैः ॥
धाम्नि स्वे धनुषि स्थितेन मकरे सूर्येण दृग्ज्योतिषा
सोमाप्ता मृगशीर्षपुष्यमुदिता वाग्घैमवत्यर्चिषा ॥२७॥

॥ शैशिरर्तुसंशिता श्रेष्ठा वाक् ॥ (६)

६३६ शीर्षण्या शुभशैशिरर्तुनदिता श्रीसत्त्वशोभावहा
श्रेयस्याऽत्र तपस्तपस्यमुदिता सन्तापदुःखापहा ॥
सर्वार्थेषु च कुम्भमीननयना श्रेयः समान्तानना
सत्त्वेन्दूदितमाघफाल्गुणगुणा वाक् सोत्तराशायना ॥२८॥

॥ सप्तमोऽध्यर्ध ऋतुः, तदर्धमात्रात्मिका वाक् ॥ (७)

६३७ अन्त्योऽध्यर्ध ऋतुः स सप्तम इह स्यादेकमासात्मकः
साधिक्यान्मलमास इत्यभिकृतो देवेन वै विष्णुना ॥
तद्योगात् प्रश्रितेयमान्तरतमा वागर्धमात्रात्मिका
तद्वर्षत्रितयान्तरे समुदियाद् भूयो विवृद्धात्मिका ॥२९॥

॥ कालात्मना मानवशासनात्मिका वाक् ॥

६३८ कालात्मन्युपसंहिता चितिमती ज्योतिष्मती वैद्युती
कालेनाकलयत्यसौ गतिमती संविल्क्रियेच्छोद्यती ॥
शास्त्रात् संयमयत्यपि श्रुतिमती सा शासयित्री सती
सत्या मानवशासनी विजयते वाग् ब्रह्मणा शंसती ॥३०॥

६३९ स्वाधिष्ठानपदे गुणेन परमे व्योम्न्यन्तरेऽन्तर्हिता
सर्वाधारतमाऽक्षरेण परमा कालात्मना संहिता ॥
पूर्णेन्दुप्रतिमाऽसुसुस्वरतमा सर्वात्मना स्वार्जिता
पूर्णा बिन्दुपदा स्वराद् रसतमा वाक् सर्वसत्त्वोर्जिता ॥३१॥

॥ देशकालाद्यतीता ब्रह्मेन्द्रात्मिका परा वाक् ॥

६४० वाह्यान्तर्यमतीत्य सन्ततमिदं दिग्देशकालादिकं
ब्रह्मात्मेन्द्रपरः प्रधानपुरुषः पूर्णे पदे राजते ॥
ब्रह्माणी तमनुव्रता परचिता वाक् संविदाना सती
ब्राह्मी पूर्णकलात्मना विरमते मौनव्रताऽऽत्मन्वती ॥३२॥

॥ इति विंशी कला सम्पूर्णा ॥

देशकालभागिनीह वाक् परा विराजते
दैवतेन्द्रभामिनी पराक् स्वरा विकासते ॥
वेदतत्त्वभोगिनीशवाक्सुवित्सुधायते
दैवरातयोगिनीन्द्रवाक्सुधा रसायते ॥२०॥

---

## ॥ एक विंशी कला ॥

### ॥ शारदा ॥

### ॥ तन्त्र-पुराणादि प्रसिद्धा वाग् देवता ॥

६४१ श्रीभिः षोडशभिः कलाभिरमलः पूर्णः शरच्चन्द्रमाः
श्रीशात्माञ्चित शान्ति शीतलकला श्रीः शारदीपूर्णिमा ॥
पूर्णात्माञ्चितसोमसद्रसकलासंवित्सुधासारदा
पूर्णानन्दरसात्मना विरमते वाक् सर्वदा शारदा ॥ १ ॥

६४२ सत्यज्ञानमहःसुधारसनिधिः सच्छान्तिशक्तिप्रदा
साक्षाद् ब्रह्म सरस्वती गुणनिधिः सर्वार्थसंवित्पदा ॥
वीणापुस्तकमालिकाभयकरा विद्यादिसौभाग्यदा
विश्वस्मिन्निह वाक्सुधावितरणात् सम्राजते शारदा ॥ २ ॥

### ॥ वीणादीनां तात्त्विकस्वरूपोपवर्णनम् ॥

६४३ वीणा नादगुणा स्वसामरसदा तन्त्रीमुखा वादिनी
पूर्णा पुस्तकवर्णशब्दवदना सर्वार्थसंवेदिनी ॥
माला मौलिकसत्त्ववस्तुगणनात् सर्वार्थमूलाक्षरा
सर्वज्ञानफलोदयादभयदा श्रीशारदाऽऽत्मस्वरा ॥ ३ ॥

### ॥ शक्तिचतुष्टयतत्त्वं चतुर्भुजायुधसत्त्वम् ॥

६४४ स्वान्तः शक्तिचतुष्ट्वसत्त्वभुजभृत् तत्तत्क्रियाभिर्गुणैः
सर्वेषां पुरुषार्थसिद्धिसुलकृत् सर्वार्थविद्यागणैः ॥
सिद्धा ब्रह्मणि वेदसत्त्ववदनैः शक्त्यायुधाप्तैः करैः
स्वैः पादैश्च चतुर्भिरन्वितसन्वाक् शारदाऽऽत्मस्वरैः ॥ ४ ॥

६४५ वीणानादगुणान्वितैस्त्रिकरणैः स्वान्तश्चिदात्मस्वरैः
बाह्यान्तर्यरसस्वरैः समरसाद् गायन्ति ये संविदा ॥
ते गायन्ति परं सदन्वयमुखात् स्वात्मानमन्तर्हृदा
नादब्रह्मपरा परे विरमते साम्नाऽऽत्मना शारदा ॥ ५ ॥

६४६ वीणातालमृदङ्गसंश्रुतिमुखात् साहित्यसत्वान्वयाद्
विद्याभ्यासपरायणः कृतिमुखान्नित्यानुरक्तः स्वयम् ॥
सानुस्वारमुखादनुश्रुतिमुखाद् गायन् तु शृण्वन् मुदा
स्वात्मानन्दरसे नरो विरमते साऽन्वेति तं शारदा ॥ ६ ॥

॥ वेद-ब्रह्मात्मिका शारदा ॥

६४७ वेदात्मेयमनाद्यनन्ततया छन्दश्चिता संहिता
दिग्व्योमाखिलदेशकालपरया मर्यादयाऽत्योहिता ॥
नित्या (ऽ) सर्वसमानयाऽऽत्मकलया पूर्णा विरात्मात्मना
सत्यात्मा भुवि शारदा विजयते सद्ब्रह्मणा स्वात्मना ॥ ७ ॥

६४८ छन्दोदर्शनसत्यमन्त्रवदना छन्दस्वती सस्वरा
छन्दः पूरुषसत्त्वहृत्सुनयना छन्दोमुखा सा परा ॥
छन्दोगैः प्रतिगीयते श्रुतिपदै श्छन्दोमुखैः सर्वदा
छन्दाँसि प्रति गायति प्रतिपदं संविद्वती शारदा ॥ ८ ॥

६४९ श्रीः शक्तिः शशिबिन्दुपूर्णकलया ब्रह्मात्मचिद्धारया
शं रातीह शरत्प्रभाविशदया संवित्सुधाधारया ॥
शान्त्या शीतलसोमसत्त्वपरया विश्वाद्ययाऽऽधारया
शक्त्या ब्रह्मणि शारदा विकसिताऽऽसक्त्यऽखिलोद्धारया ॥ ९ ॥

६५० कालात्मेह शरद्वती ऋतुमती चान्द्री कला भास्वती
तद्योगादुदिता समा शरदसौ संवत्सरात्मा सती ॥
तत्संवत्सरकल्पको दिवि तपन् त्सूर्यः सरस्वान् स्वतः
शक्तिस्तस्य सरस्वती स्वरवती सा शारदा भास्वतः ॥१०॥

६५१ सूर्याचन्द्रमसोस्तयोः सुमनसोर्ज्योतीरसैकात्मनोः
साहोरात्रगुणात्मकालकल्योर्दिव्याश्विनीसत्त्वनोः ॥
तद्योगात् सरसा स्वरेण महसा कालात्मना शर्मदा
वागेका शरदात्मना विलसति श्रीशारदा सर्वदा ॥११॥

६५२ पिण्डेऽन्तर्हृदि चेतनोऽत्र मनसा प्राणोऽन्तरे मूर्धनि
ब्रह्माण्डे बहिरप्युदेति तपसा सूर्यः परे व्योमनि ॥
प्राणापानसमन्वयात् प्रगतितो वाक् संहिता स्वात्मना
बाह्यान्तर्यचितोऽभ्यतत्यनुपदं सा शारदाऽसुस्वना ॥१२॥

६५३ त्रिंशद्धामसु राजते प्रतिदिनं सूर्येन्दुकालक्रमात्
तद्रश्मेः प्रहराष्टके निशि दिवा तन्मात्रया सङ्क्रमात् ॥
प्राक्प्रत्यङ्मुखमेकविंशतिसहस्रं चोत्तरं षट्शतं
प्राणापरनगतेश्च वागतति सा प्रश्वासतः श्वासतः ॥१३॥

६५४ यत् तस्मिन् प्रतिधामनि प्रतिहितं सवत्सरान्तर्गतं
विंशत्युत्तरमेव सप्तशतकं विद्यादहोरात्रकम् ॥
त्रिंशद्धामसु सन्तताऽसुगतितो दैनन्दिने सर्वदा
वागेका शरदात्मना निशिदिनं सम्राजते शरदा ॥१४॥

६५५ या आपो दिवि मेघसत्त्ववितता बीभत्सवो विद्युता
ताभिः संयुजमाहुरिन्द्रममृतं हंसं परं वैद्युतं ॥
आत्मानं स्वमनुष्टभं स्वरवतीं वाचं स्तुवन्तीं परां
योगेनानुचरन्तमिन्द्रमृषयः स्वान्तर्निचिक्युर्धिया ॥१५॥

६५६ प्राणापानसुवृत्तिका स्वरपरा सा हंसमन्त्राक्षरा
प्राक्प्रत्यग्गमनोदितेयमजपागायत्रिसञ्ज्ञा परा ॥
प्रज्ञानाद् बहिरन्तरात्मकलया तत्कालमात्रात्मना
प्राज्ञात्माऽवति शारदा सुमनसा मार्गैः शारदात्मना ॥१६॥

६५७ मासे त्रिंशदहस्सु कालकलया सम्भ्राजमाना परा
चान्द्रीभिः सहिताऽत्र पञ्चदशभिः शक्त्या कलाभिः स्वरा ॥
आक्रान्त्या क्षयवृद्धियोगपरयाऽप्येकैकया ध्रौवया
पूर्णा षोडशभिः समा समुदिता वाक् पूर्णिमा शारदा ॥१७॥

६५८ मासे मासकृतो दिनेषु सवितुस्त्रिंशत्सु रश्म्युन्मितं
विंशत्युत्तरमेव सप्तशतकं वृत्तं कलाकान्वितम् ॥
साहोरात्रसमं च हायनसमं तद्योगतः सर्वदा
वाक् सिद्धा शरदात्मना समतति स्वर्ज्योतिषा शारदा ॥१८॥

६५९ आदित्यस्य सरस्वतः स्वरवतो ज्योतिः पतङ्गात्मनः
सर्वेषां परिवर्तकस्य भवतः संवत्सरैकात्मनः ॥
शक्तिस्तस्य सरस्वती स्वरवती सिद्धा शरत् सारदा
कालात्मेयमनाद्यनन्तकलया वाग् देवता शारदा ॥१९॥

६६० हंसो हंस इति द्वयं स्वरपदं सूक्ष्मं जपन्ती परा
सानुस्वारविसर्गबिन्दुनयना विश्वादिमात्रानना ॥
सर्वत्रापि च सम्प्रवृत्तिवदना भूयो निवृत्या मुदा
वाक् सृष्टिप्रतिसंहृतिप्रणयना सम्भ्राजते शारदा ॥२०॥

६६१ हंसोऽसौ दिवि तेजसा समुदगात् सूर्योऽखिलात्मा स्वयं
प्रत्यक्षः सहसा सदा परितपँस्तेजोरसैकान्वयम् ॥
विद्युन्मेघनिनादतः प्रमुदिता सञ्जीवनीयं रसं
वक् छक्तिः परिवर्षयत्यनुपदं योगेन संविद्रसम् ॥२१॥

६७२ सर्वेषां हृदि चेतनः प्रतिलसन् हंसो द्विपादाक्षरः
प्राणापानगतेः पदद्वयमतन् अन्तर्बहिर्विन्यसन् ॥
हंसात्मा रसनाग्रगा[illegible] सदा हंसस्वरा संविदा
सोऽह[illegible]हंसवाहमरता [illegible] शारदा ॥२२॥

६६३ कैलासे दिवि मानसे च सरसि प्रत्यक् स्फुरन्ती परा
सा हंसात्मनि संहिता चितिकला स्वाऽहम्मतिप्रत्यया ॥
हंसात्मेह सरस्वती सुमनसा हंसानुनादात् सदा
पूर्णानन्दरसेन नृत्यति विदा श्रीशारदा सत्त्वदा ॥२३॥

६६४ सर्वेषामपि मूर्धनीह परमे खेऽन्तः सहस्रारगा
सत्ये मानससोमसद्रसतमे सिद्धा सहस्राक्षरा ॥
सा सोमामृतसामरस्यकलया पूर्णेन्दुबिन्द्वङ्किता
हंसाख्येयमनाहताऽसुनिनदा श्रीशारदा सञ्चिता ॥२४॥

६६५ पूर्णः सन् परमात्मसत्त्वमहसोदीर्णो महान् पूरुषः
हंसोऽसौ तमसः परः स्वतपसोत्तीर्णः सुपर्णोऽरुषः ॥
साक्षात् तस्य सतोऽत्र वेदवदना माता सुवाक् संविदा
ब्रह्मात्मोच्छ्वसनात् स्वरैः समुदिता छन्दस्वती शारदा ॥२५॥

६६६ पूर्णो बिन्दुरमात्रकः स्वयमनुस्वारः स्वरः केवलः
पूर्णात्मामृतचित्कलोदितशरच्चन्द्रः परो निर्मलः ॥
पूर्णब्रह्मरसप्रसादवदना पूर्णामृतत्वप्रदा
पूर्णानन्दसुधार्णवा विरमते पूर्णात्मना शारदा ॥

६६७ सम्पूर्णा शरदः शतं सुवितता सा ऽ नन्तकालात्मना
सिद्धा पञ्चशरद्युगा (ऽ) न्तरहिता संवत्सरैकात्मना ॥
विंशत्याद्यनिरुक्तसङ्ख्यपरया तत्कालमर्यादया
सङ्ख्यातात्मकपूर्णतत्त्वकलया सम्राजते शारदा ॥२७॥

६६८ स्वान्तः संविदुषोरसोर्मिपरमानन्दोन्मनश्चित्कला
सत्प्रेमस्मितनन्दितेन्द्रहृदया श्रीः शारदेन्दूत्पला ॥
हृत्सौम्यामृतसामरस्यविलसच्छन्दःसुधासारदा
वेदात्मोदितवाक्सुधारसनिधिः सम्राजते शारदा ॥२८॥

६६९ पूर्णा षोडशचित्कलाभिरुचिरा पूर्णेन्दुबिम्बाधरा
सौम्या सामरसस्वरा सुमधुरा संवित्सुधासागरा ॥
मोहाज्ञानतमोभयाद्यपहरा सन्तापपापापहा
शान्त्याऽऽनन्दितशारदेन्दुवदना सा शर्मदा शारदा ॥२९॥

६७० स्वीयतौं तु शृणाति सा शशिकलाकालाभ्रमाखण्डला
स्वीयास्येन वियद् भवेत् सुविमला रात्रौ नभोमण्डला ॥
सोमास्यैव शरद् विभाति सकला श्रीव्यासभूमण्डला
सौम्या पूर्णकला स्वराद्यविकला श्रीशारदा मञ्जुला ॥३०॥

६७१ अज्ञानं दुरितं तमो मृतिभयं दोषं च हिंसास्थितं
स्वज्ञानोद्धतदुष्टधीधृतिमयं तापं स्वगर्वोत्थितम् ॥
चिद्योगेन विशीर्य दोषनिचयं भ्रान्त्याद्यविद्योदितं
दद्याज्ज्ञानगुणादिसत्त्वमभयं श्रीशारदाऽऽत्मोर्जितम् ॥३१॥

६७२ पूर्णात्मप्रतिबोधसत्त्वनिचयात् पूर्णामृतत्त्वोच्चयात्
पूर्णानन्दरसामृतात् सदभयात् पूर्णानुभावोदयात् ॥
प्रज्ञाशारदया सदैव निवसंस्तादात्म्ययोगाल्लसन्
प्राज्ञः शारदपूर्णिमेन्दुरिवसन् सम्राजतेऽसौ हसन् ॥३२॥

॥ इति एकविंशी कला सम्पूर्णा ॥

श्रमती सरस्वती प्रचेतना विशारदा
श्रमदिन्दुहृत्कलाप्रसादसद्विचारदा
दैवतेन्द्रपूर्णतत्त्वसंविदाऽऽत्मसत्त्वदा
दैवरातवाक्सुधारसात्मचित्सुखप्रदा ॥२१॥

# ॥ द्वाविंशी कला ॥

## ॥ तन्त्रपुराण प्रसिद्धा महासरस्वती ॥

### परा शक्तिः दुर्गा

६७३ पूर्णात्मनः केवलसत्त्वमूर्तिर्दुर्गा परा शक्ति रनन्तकीर्तिः ॥
सा संविदिच्छाकृतिचित् त्रिशक्तिः स्त्रीपुंस्वरूपा प्रथिता त्रिमूर्तिः ॥ १ ॥

### ॥ महासरस्वती ॥

६७४ संविद् विधीष्टाऽत्र महासरस्वती लक्ष्मीस्तदिच्छा महती हरेः सती ॥
काली क्रिया शक्तिरियं हरप्रिया त्रिमूर्तिसक्ताः प्रथितास्त्रिशक्तयः ॥ २ ॥

६७५ सरस्वतीयं महतीह वाक् परा संवित्परा ब्रह्मसती पराऽपरा ॥
पूर्णात्मचिद्वृत्तिमुखाऽखिलान्तरा प्रज्ञा चतुर्विंशतितत्त्वसञ्चरा ॥ ३ ॥

### ॥ प्रथमा ( १ ) विष्णुमाया ॥

६७६ या सर्वभूतेषु ततेति शब्दिता व्योमाधिमात्रा परशब्दशक्तिका ॥
या विष्णुमायेति पुराणकीर्तिता तस्यै नमो विष्णुपदात्मनेऽर्पितम् ॥ ४ ॥

### ॥ द्वितीया ( २ ) चेतना ॥

६७७ या सर्वभूतेऽन्तरिता सुचेतना सर्वात्मसत्त्वाद्यभिधा निकेतना ॥
तद्वाग्विभूत्यै सकलात्मवृत्तये तस्यै नमस्तेऽस्तु परात्मशक्तये ॥ ५ ॥

### ॥ तृतीया ( ३ ) बुद्धिरूपा ॥

६७८ बुद्धिस्वरूपाऽखिलभूतसन्तता बोधात्मिका साऽऽत्मनि नित्यसंहिता ॥
या बोधयित्री भवती भवायते तस्यै नमस्ते परबुद्धिदेवते ॥ ६ ॥

## ॥ चतुर्थी ( ४ ) निद्रारूपा ॥

६७९ निद्रास्वरूपा भगवती विनिद्रा विश्रान्तिसन्क्लान्तिनिरामसुद्रा ॥
निर्वेदचिद् वाक् परमौनमुद्रा नित्यात्मलीनाऽऽन्तरचित्समुद्रा ॥ ७ ॥

## ॥ पञ्चमी ( ५ ) क्षुधारूपा ॥

६८० या क्षुत्पिपासात्मकवृत्तिरूपतः सर्वेषु भूतेषु सदाऽस्ति सर्वतः ॥
भोक्तृस्वरूपाऽभ्युदिताऽन्तरात्मने भोज्यान्नदानेन नमः क्षुधात्मने ॥ ८ ॥

## ॥ षष्ठी ( ६ ) छायारूपा ॥

६८१ छायात्मिका या सकलप्रतीका सद्वस्तुनो योगगुणाधनीका ॥
सर्वैः समानाकृतिसुप्रतीका सा विश्वरूपाऽखिलचित्समीका ॥ ९ ॥

## ॥ सप्तमी ( ७ ) शक्तिरूपा ॥

६८२ शक्तिस्वरूपा परशक्तिराद्या सत्तात्मिका चेतनसंविदाद्या ॥
शक्ताऽऽत्ममूलप्रकृतिः समाद्या शस्ता समस्तैर्मनसाऽभिवाद्या ॥१०॥

## ॥ अष्टमी ( ८ ) तृष्णास्वरूपा ॥

६८३ तृष्णामयीच्छाप्रकृतिर्वितृष्णा सा सर्वतोऽस्मात् परमाऽतितृष्णा ॥
अनाद्यनन्तात्मचितेरभीक्ष्णा नमस्कृति स्तेऽस्तु सदा सुतृष्णा ॥११॥

## ॥ नवमी ( ९ ) क्षान्तिरूपा ॥

६८४ क्षान्तिः क्षमात्मा क्षितिवत् समात्मा सर्वापराधान् क्षमतेऽक्षयात्मा ॥
दुष्टप्रतीकारकृते समर्था दुष्टात्मकृत्यं सहते सदर्था ॥१२॥

## ॥ दशमी (१०) जातिरूपा ॥

६८५ जातिःस्थिता व्यक्तिषु जन्मसिद्धा सैका समस्तासु समा समृद्धा ॥
सर्वत्र सामान्यसधर्मबद्धा तस्यै नमोऽस्तु स्तुतिरात्मशुद्धा ॥१३॥

## ॥ एकादशी (११) लज्जारूपा ॥

६८६ लज्जामयी स्त्रीप्रकृतिप्रसिद्धा सर्वेन्द्रियावृत्तिनिवृत्तिशुद्धा ॥
प्रत्यङ्मुखा स्वात्मसु धीतरङ्गा प्रत्यक्षतः सङ्कुचितान्तरङ्गा ॥१४॥

## ॥ द्वादशी (१२) शान्तिरूपा ॥

६८७ शान्तिः सुखानन्दरसस्वरूपा स्वान्तः सुविश्रान्तिसमाधिरूपा ॥
शमात्मिका श्रीः शशिसत्त्वरूपा श्रेयःसुनिः श्रेयसतत्त्वरूपा ॥१५॥

## ॥ त्रयोदशी (१३) श्रद्धारूपा ॥

६८८ श्रद्धात्मिका सा पुरुषस्य पत्नी सर्वान्तरस्था सकलात्मपत्नी ॥
यज्ञात्मनः साऽखिलयज्ञपत्नी श्रद्धेयपूर्णात्मचिदिन्द्रपत्नी ॥१६॥

## ॥ चतुर्दशी (१४) कान्तिरूपा ॥

६८९ कान्तिः कलात्मा कमनीयहृत्कला सूर्येन्द्रविद्युत्स्तनयित्नुचित्कला ॥
सुवर्णवर्णा स्फटिकप्रभास्वरा वीणा सुकामा कमलालया स्वरा ॥१७॥

## ॥ पञ्चदशी (१५) लक्ष्मीरूपा ॥

६९० लक्ष्मीः परैश्वर्यकलादिलक्षणा लक्ष्यैकवस्तुप्रतिबोधशिक्षणा ॥
लक्ष्यात्मनः सा प्रथमा प्रतीक्षणा लक्ष्यात्मनिष्ठा परमा समेक्षणा ॥१८॥

## ॥ षोडशी (१६) वृत्तिरूपा ॥

६९१ वृत्तिश्चिदात्मप्रकृतिः प्रधाना सर्वेन्द्रियान्तः प्रतिवर्तमाना ॥
बाह्या प्रवृत्तिर्हृदि सा निवृत्तिः निष्ठाऽऽत्मनि प्रत्ययगाऽऽत्मचित्तिः ॥१९॥

## ॥ सप्तदशी (१७) स्मृतिरूपा ॥

६९२ स्मृतिर्हृदास्तिर्विदिताप्रमोषः चिदात्मनः स्वस्य सतोऽप्रमादः ॥
चेतः परायै स्मरणीस्मरायै भ्रुवात्मिकायै प्रणतिः परायै ॥२०॥

॥ अष्टादशी (१८) दयास्वरूपा ॥

६९३ दया सुदीनेषु समुद्रवन्ती सर्वान्तरात्मस्वनुमुद्रयन्ती ॥
दृष्ट्यात्मिकाऽन्तः सममुद्रयाप्ता नमस्कृतेरार्द्रमनोरसाप्ता ॥२१॥

॥ एकोनविंशी (१९) तुष्टिरूपा ॥

६९४ तुष्टिः समस्तात्मसु सर्वतोषिणी सञ्जीवनी प्राणभृतां सुपोषिणी ॥
सा वाग्रसात्मा जगतां हितैषिणी तुष्टिप्रदानेन परात्मतोषिणी ॥२२॥

॥ विंशी (२०) मातृस्वरूपा ॥

६९५ मातृस्वरूपा जगदादिमाता मेयात्मवस्तुप्रतिमाऽऽदिमात्रा ॥
प्रमाणभूता प्रतिमात्रमात्रा प्रज्ञानभूः स्त्रीगुणशक्तिगात्रा ॥२३॥

॥ एकविंशी (२१) भ्रान्तिरूपा ॥

६९६ भ्रान्तिस्वरूपा भ्रमते समन्तात् सर्वत्र चिच्छक्तिमुखादनन्तात् ॥
सम्भ्रामयन्तीह जगज्जनाँस्तान् सा निर्भ्रमा सम्भ्रमभागिहास्ताम् ॥२४॥

॥ द्वाविंशी (२२) इन्द्रियाधिष्ठात्री ॥

६९७ संवित्क्रियेच्छाद्यसुधीन्द्रियाणां चिद्दैवतानां तदधिष्ठितानाम् ॥
सत्त्वादधिष्ठात्र्युदिताऽऽन्तराणां सत्यात्मिका वाग् विदिता पराणाम् ॥२५॥

॥ त्रयोविंशी (२३) व्याप्तिरूपा ॥

६९८ व्याप्तिर्वियद्वत् परमात्मवस्तुवच्चिच्छक्तिवद् या गुणधर्मवृत्तिवत् ॥
व्याप्तेयमन्तर्बहिरात्मशक्तिवत् तस्यै नमस्वद् वचनं मनस्वत् ॥२६॥

॥ चतुर्विंशी (२४) चितिरूपा ॥

६९९ या चेतनात्माऽखिलशक्तिकाऽग्रा चितिस्वरूपेण जगत् समग्रम् ॥
व्याप्य स्थिता सा परमाऽत्युदग्रा तस्यै नमोवाक् करणत्रयाग्रा ॥२७॥

७०० सत्त्वैश्चतुर्विंशतिकैः सुहृद्वती [illegible] स्वरभुव् सरिद्वती ॥

सर्वात्मसंवित् परमा महस्वती सर्वान्तरस्याऽत्र महासरस्वती ॥२८॥

७०१ सर्वत्र [illegible]त्वयोः [illegible] समप्रतिष्ठा ययोः ॥

तस्मादनिर्वाच्यतयाऽऽस्थिता श्रुता तादात्म्ययोगाल्लसिताऽऽत्मनि श्रिता ॥२९॥

७०२ वाग् वस्तुतः साऽत्र भवत्यमात्रा पूर्णात्मिका बिन्दुसमाऽऽत्मसत्त्वा ॥

नीरूपिणी पूर्णविरामभूमा सा निर्विशेषाऽऽत्मनि पूर्णकामा ॥३०॥

७०३ वाग् विश्वरूपा वितताऽप्यरूपा वाच्यात्मनि ब्रह्मणि चित्स्वरूपा ॥

वेदात्मिका वेद्यपरात्मरूपा वेद्यात्मना सामरसैकरूपा ॥३१॥

७०४ वाग् देवता सैव महासरस्वती वेद्या पुरा सप्तशती स्तुता सती ॥

साऽध्यात्मतत्त्वप्रचुरा महीयसी सा ध्यायतां सर्वगुणैर्गरीयसी ॥३२॥

॥ इति द्वात्रिंशी कला सम्पूर्णा ॥

श्रीमती महासरस्वती श्रुतेरुपास्यतां

श्रीयतां सुधीभिरन्तरात्मना समाप्यताम् ॥

वेदगीतवाग्रसाप्लुतैः स्वरैः प्रगीयतां

दैवरातवाक्सुधारसः सुरैः प्रपीयताम् ॥२२॥

## ॥ त्रयोविंशी कला ॥

### ॥ भगवती तारा वाग् देवता ॥

### ॥ दशमहाविद्यायां द्वितीया ॥

७०५ श्रीतारा तारिणी सा त्रिभुवनजननी सर्वभूतादियोनिः
प्रत्यक्षब्रह्मरूपा विलसति भवती सर्वशक्त्यादिभूमिः ॥
तारो रुद्रः परात्मा प्रभवति भगवान् सर्वभूताधिपत्ये
श्रीमत्ताराधिराज्ञी जयति भगवती तारहृत्सामरस्ये ॥ १ ॥

७०६ सत्यं ब्रह्म प्रपूर्णं परिचिततमं यावदेवात्मभूत्या
तारा तद्वाचकात्मा स्वरसरसतमा तावती पूर्णशक्त्या ॥
एकात्मानौ स्वरूपैः सहरसदभिधैर्वाच्य-तद्वाचकत्वात्
तारात्मानौ समानौ समरसकलया सर्वसन्तारकौ स्ताम् ॥ २ ॥

७०७ तारः सर्वान्तरात्मा जयति पशुपतिः प्राणिनां सत् पिता नः
तारा देवी सती सा जगति भगवती चेतना विश्वमाता ॥
तादात्म्यात् संहितौ तौ त्रिभुवनपितरौ दम्पतीकल्पपूर्णौ
तारा-तारौ स्वसत्त्वाज्जगदिदमवतां प्राणसन्त्राणनाणौ ॥ ३ ॥

७०८ ब्रह्माण्डे सर्वतोऽन्तः स्फुरदमृतकला व्योम्नि दिक्षु स्वरात्मा
शब्दार्थप्रत्ययाभा स्वररसकलिता छन्दसोताऽक्षरात्मा ॥
आत्मन्यन्तः स्फुरन्ती श्रुतिनयनमनः प्राणचित्यादिमेया
तारा श्रीवाक् परात्मा सुनियतकरणैः संविदोपासनीया ॥ ४ ॥

॥ अधिभूतम् ॥

७०९ प्रत्यक्षं भूततत्त्वं निखिलभुवनभृन्मूलभूतं सशब्दं
सर्वाधाराऽऽदिशक्तिर्दिगिह समुदिता देवमाताऽऽदितिः सा ॥
सर्वाद्या शब्दशक्तिः सुविततपरमव्योमतन्मात्रखण्डा
तारा साकारसत्याक्षरपरमरसब्रह्मचिद् वागखण्डा ॥ ५ ॥

॥ अधिदैवतम् ॥

७१० सत्यं तद् वै परोक्षं सदमृतमचलं ब्रह्मनाम्नाऽधिदैवं
दिव्यं ज्योतिर्मयं तत् परमरसमयं सर्वभूतिप्रपूर्णम् ॥
साक्षात्सत्यप्रमात्मा सकलहिततमा ब्रह्महृच्छासनात्मा
तारेन्द्राग्निप्रमुख्याऽऽगमनिगममुखा वाक् परा देवतात्मा ॥६॥

७११ पूर्णे प्रापञ्चिकेऽस्मिन् त्सकलविधसुखे पारमार्थे परस्मिन्
त्सर्वार्थानां प्रदात्री शुभविजयकरी पूर्णसौभाग्यमूर्तिः ॥ ७ ॥
सर्वाङ्गैः यम्प्रपूर्णा प्रणतभयहरी ऋग्यजुः साममूर्तिः
तारा श्रीवेदमाता जयति भगवती भारती सम्प्रमात्री ॥ ७ ॥

॥ अध्यात्मम् ॥

७१२ सर्वेषामात्मनोऽन्तः समरसलसिता चेतना संस्फुरन्ती
मूलाधारे सुगुप्ता स्वररसकलिता ब्रह्मणस्पत्युदीर्णा ॥
पश्यन्ती मध्यमाख्या हृदि सह परया वैखरी वाग्विभूतिः
तारा संवित्प्रकाशाज्जगति विजयते वाक् चतुष्पादपूर्णा ॥ ८ ॥

७१३ तेजोऽब्नैः ससत्त्वैर्विबुधबुधजनैर्धर्मविद्यातपोभिः
सम्पन्ना सर्वरत्नैर्वसुभिरपि गुणैर्भूतिभिः सन्महोभिः ॥
गेहे मातेव सत्त्वैः सकलसुखकृते भद्रदा भाग्यलक्ष्मीः
तारा सर्वस्वशक्त्या परमरसमयी शान्तये शक्तये श्रीः ॥ ९ ॥

७१४ रुद्रान्तर्यामिणी सा परमगुणनिधि श्चेतना भूतिशक्तिः
रौद्री विद्युत्सुगुप्ता घनरसनिनदा रोरवीति प्रभोग्रा ॥
ताराह्वयोऽन्तरात्मा सकलहिततमो भद्रकृद् रुद्रमूर्तिः
भक्त्यै भुक्त्यै विमुक्त्यै प्रभवतु भवती सर्वशक्त्यै च तारा ॥१०॥

७१५ एकं द्वौ त्रीं श्च पादा जगति सुनिदधे सत्त्वपूर्णं तुरीयं
गायत्री सैव गौरी परमपदरता वाक् चतुष्पात् सुपूर्णा ॥
षट्काऽष्टात्मा च बिन्दोर्विषमपदमयी पञ्च सप्ताङ्कसंस्था
तारा सा चक्ररूपा भवति नवपदी सा सहस्राक्षरात्मा ॥११॥

७१६ बिन्दुः षट्कोणचक्रं वसुदलकमलं भूपुरं सत्रिरेखं
यन्त्रं ताराप्रतीकं भगवदुपमितं सत्रिकोणं समन्त्रम् ॥
बिन्द्वात्मा ब्रह्मरूपाऽऽकृतिगुणरचिता सिद्धिदिग् भूतिसिद्धा
तारा यन्त्रात्मिका वाक् प्रभवति जगतां सन्नियन्त्री समृद्धा ॥१२॥

॥ तान्त्रिकः तारामन्त्रः पञ्चबीजात्मकः ॥

॥ प्रथमं ओं बीजम् ॥

७१७ ओमित्येकाक्षरात्मप्रणवपरतरब्रह्मसन्मात्रभूता
साक्षाद् ब्रह्मात्ममूर्तिः परमपुरुषहृद् ब्रह्मसद्वाचकात्मा ॥
सत्यज्ञानामृतात्मा स्वररसकलिता विश्वरूपाऽऽत्मशक्त्या
तारा सन्तारयेद् वः परमसमरसैः पालयेत् पूर्णशान्त्या ॥१३॥

७१८ तारो ज्योतिस्त्रयीयुक् करणभुवनभृद् व्याहृतीष्टत्रिमात्रः
तद्वाच्यार्थात्मने ते भवतु मम नमो रुद्र ताराय नित्यम्
तारा तद्वाचकात्मा प्रणवमनुतनुः शब्दशक्तिस्वरूपा
तारायै ते मनो मे प्रथितसकलहृद्देवतामन्त्रमय्यै ॥१४॥

॥ द्वितीयं ह्रीं बीजम् ॥

७१९ ह्रीमित्येतत्पराणप्रतिविततततनूर्व्योमरूपाऽऽदिशक्तिः
मायाबीजाक्षरैकप्रमितपुरुषहृच्चिन्मयी मन्त्रमूर्तिः ॥
मायाशक्त्या स्वविश्वं विश्वति निजमिते राहरत्नीह तारा
विज्ञानानन्दविद्यासुरसवितरणप्रेयसी वागपारा ॥१५॥

॥ तृतीयं स्त्रीं बीजम् ॥

७२० सत्या चिच्छक्तिरूपा परमपुरुषहृत्कामवामार्धदेहा
सर्वस्त्रीरूपयोगाज्जगति समुदिता सा स्वयं दिव्यगेहा ॥
स्त्रीष्वप्यन्तर्हिता सा मधुररसकला सुस्वरा वाक् प्रमात्री
तारा स्त्रीं बीजमन्त्राप्लुतमररसदा सर्वसिद्धिप्रदात्री ॥१६॥

॥ स्त्रीं बीजस्य विशिष्टं सत्त्वम् ॥

७२१ शक्तिः साक्षात्परोक्षाद्यमृतपुरुषभूर्वद्यताग्निप्रदीप्ता
शान्त्या सोमेन सक्ता परमशिववधूः सर्वशक्तिप्रभाप्ता ॥
सम्पूर्णाभीष्टयोगात् परमसुरसदा स्त्रीव शक्ता प्रपञ्चे
तारा सर्वार्थसिध्यै प्रभवतु सुखदा शान्तये पारमार्थे ॥१७॥

॥ चतुर्थं हूं बीजम् ॥

७२२ मन्योः प्रज्ञानशक्तिः सकलगुणमयी संविदाऽऽर्तेः प्रहर्त्री
माता विश्वोपसंहृत्यधिकरणमयी सर्वसंवित्सवित्री ॥
उमा चिज्ज्योतिरग्र्या प्रभवति भवती विश्वसंहारशक्तिः
तारा हूङ्कारवल्लसा जयति जनमनोमन्युहृद्बीजशक्तिः ॥१८॥

॥ पञ्चमं फट् बीजम् ॥

७२३ अस्त्रं सन्मन्त्रबीजं परमशुभकरं विघ्नसंहारशस्त्रं
भूताद्युत्सारशक्तं सकलभयहरं सूचकं स्वेष्टसिद्धेः ॥
फट्कारास्त्रप्रयुक्ता सकलविजयकृत् सर्वशस्त्रास्वरूपा
श्रीतारा तारयेद् वः सततमभयदा सर्वसिद्धिप्रदानात् ॥१९॥

### ॥ मध्यबीजत्रयसिद्धः नीलसरस्वतीमन्त्रः ॥

### ॥ सद्योजातस्य शिशोर्जिह्वायां तन्मन्त्रलेखनम् ॥

७२४ "ह्रीं स्त्रीं हूं" बीजमन्त्राक्षरपरवदना सा त्रिशक्तिप्रपन्ना
तारा नीला सरस्वत्युपहितवचना सा मुनीन्द्रानुविन्ना ॥
सद्योजातस्य जिह्वामधुरसपटले जातकर्मान्तरेष्टा
सन्मन्त्रोल्लेखनाप्तः प्रभवति मनुजः सर्वविद्यासु वाग्मी ॥२०॥

### ॥ ऋषिच्छन्दोदेवताः ॥

७२५ अक्षोभ्यार्षेयमन्त्रः परमगुणमयः पञ्चबीजात्मकोऽयं
पङ्क्तिश्छन्दोऽस्य क्लृप्तं प्रकृतिगुणमयं तन्त्रशास्त्रेप्रसिद्धम् ॥
श्रीतारा देवतात्मा प्रभवति जगतां सर्वविद्याधिमन्त्रा
सर्वज्ञत्वप्रदात्री जगति विजयतां सर्वतन्त्रस्वतन्त्रा ॥

### ॥ सर्वेषां छन्दसां इन्द्रः परमर्षिः ॥

७२६ "इन्द्रो ब्रह्मेन्द्र" इष्टः परम ऋषिरसौ छन्दसां वर्षकः सन्
छन्दोवाचोऽभ्युदीर्णः स्वरदसुसुरसो ब्रह्मणस्पत्युपाह्वः ॥
इन्द्राणी ब्रह्मसत्त्वाऽऽत्मनि हृदि रमते ब्रह्मणस्पत्युदीर्णा
तारा सेन्द्रात्मशक्तिः समरसनयना पारमैश्वर्यपूर्णा ॥२२॥

### ॥ तारायास्तात्त्विकं स्वरूपम् ॥

२२७ रुद्रस्तारः परात्मा त्रिभुवनसदने त्र्यम्बको बोभवीति
भद्रो भर्गश्चिदात्मा स्वररसमहसा छन्दसा रोरवीति ॥
रुद्राणी शब्दशक्तिः प्रणवसुतपसा संविदा तारयन्ती
तारा विद्याधिराज्ञी प्रभवति सहसा प्रज्ञयाऽनुस्वरन्ती ॥२३॥

७२८ मन्द्रा मध्या च तारा स्वरसवनगुणैर्वाक् त्रिधाऽऽत्माभिगीर्णा
साक्षादेवाप्यरोक्षात् स्थितिगतिकृतिभिः सा परोक्षा प्रपूर्णा ॥
सारासारप्रपञ्चे परमरसमये पारमार्थादिभूमा
तारा तारात्मनि स्वे लसति परशिवे सर्वदा सार्वभौमा ॥२४॥

७२९ रुद्रः सर्वान्तरात्मा विलसति हृदये मूर्ध्नि गुप्तः शिखायां
जिह्वायां वागरसाप्तः स्वरचितिनिलये स प्रसुप्तो गुहायाम् ॥
गौर्या शक्त्या स्ववाचा स्वपिति सरसया गङ्गया प्राणशक्त्या
तारा रुद्रानुषक्ता रहसि रसनया चेतते ज्ञानशक्त्या ॥२५॥

॥ तान्त्रिकं ताराध्यानस्वरूपतत्त्वम् ॥

७३० प्राज्ञात् सर्वात्मयज्ञात् स्वरचितिरुदिता ब्रह्मणो वाक् स्वसत्त्वैः
प्रत्यक्षा तत्समाना चितिकृतिकरणैश्चिद्गुणैः शक्तितत्त्वैः ॥
नाम्नो रूपाच्च हीनं परममतिततं पूरुषं ब्रह्मसत्त्वं
तारा स्वान्तर्यमर्वाग् जगति सगुणतो निश्चकर्ष स्वशक्त्या ॥२६॥

७३१ तारं रुद्रं परेशं परमपदरतं निर्गुणं पूर्णमेकं
तारा द्वेधा विभेदात् प्रपद्युगतले स्वापयामास शम्भुम् ॥
ताराधीशः परेशः प्रियहृदयवशः प्रेमपाशोपनद्धः
ताराराज्ञीवशोऽभूत् तदनुकृतिपरस्तन्मनीषाप्रसादे ॥२७॥

७३२ पञ्चाशन्मातृकाक्षैः प्रतिविहितमहामुण्डरुद्राक्षमालां
प्रत्यक्षां वैजयन्तीं सकलविजयदां भद्रभूषां दधाना ॥
प्रत्नां ज्योतिः कलाभिः परिविततचतुः षष्टिचिद्योगिनीभिः
पू णीं सद्वर्णमालां शिरसि धृतवती सञ्जयत्युग्रतारा ॥२८॥

## ॥ आयुधचतुष्टयस्य तात्त्विकं स्वरूपम् ॥

७३३ कर्त्री दुर्वागसत्यद्विहृदयरसनोत्कर्तिनी दुष्टहन्त्री
खड्गो दुष्टात्ममेदोद्धतदुरसुरहृत्खण्डनास्यो ह्यखण्डः ॥
पद्मं लक्ष्मीकलाप्तं सकलरसमयं कर्परं सद्रसाप्तं
तारां शक्त्यायुधैस्तैः परिलषितभुजां सम्प्रपद्ये शरण्याम् ॥२९॥

## ॥ ताराप्रसादप्रार्थना ॥

७३४ मातस्तारे त्वमन्तः प्ररमपुरुषहृत्प्रेमचिद्योगपूर्णा
सत्यं तत् स्वानुभूतं परममृतरसं स्वात्मसत्त्वप्रसादम् ॥
मह्यं देहि प्रसन्ना परमसुखरसं स्वात्मसंविप्रकाशात्
प्रज्ञानानन्दयोगे हृदि निजरसदे स्वात्मनः सम्प्रशान्त्यै ॥३०॥

७३५ मातर्मां धापय स्वं निजममृतरसं ब्रह्मयोगानुभूतं
हृद्यं तत्त्वं प्रगाय स्वयमभयकरं मत्प्रहर्षाय गीतम् ॥
गायन्ती गायय स्वं स्वनुकरणपरं प्रेमभावात् सुतं ते
तारे मां पालयास्मिञ्जगति निजपदे लीलया लालयाऽन्तः ॥३१॥

## ॥ अन्तिमा अभ्यर्थना ॥

७३६ श्रीतारा तन्त्रशास्त्रे भवति दशमहाविद्यया सा द्वितीया
तादात्म्याद् ब्रह्मयोगात् समरसकलया सा भवेदद्वितीया ॥
वेदैर्वेद्या निवेद्या सकलगुणनिधिः सर्वभावाद् वरेण्या
संसेव्या दैवरातप्रमुदितकवितास्रग्धरास्रग्धरेयम् ॥३२॥

॥ इति त्रयोविंशी कला सम्पूर्णा ॥

छन्दसां स्वराप्तयाऽसुनीतया सुतारया
छन्दसा सुगीतया सुपूर्णयेन्दुतारया
दैवतेन्द्रशक्तिराप्यते धियाऽसिधारया
दैवरातवाक्सुधारसप्रवाहधारया ॥२३॥

## ॥ वेदाङ्गनिघण्टुपठितानि ॥

## ॥ सप्तपञ्चाशद् वाङ्नामानि ॥

| | | | | | |
|---|---|---|---|---|---|
| १ | श्लोकः । | २० | मेना । | ३९ | धेना । |
| २ | धारा । | २१ | सूर्या । | ४० | ग्नाः । |
| ३ | इळा । | २२ | सरस्वती । | ४१ | विपा । |
| ४ | गौः । | २३ | निवित् । | ४२ | नना । |
| ५ | गौरी । | २४ | स्वाहा । | ४३ | कशा । |
| ६ | गान्धर्वी । | २५ | वग्नुः । | ४४ | धिषणा |
| ७ | गभीरा । | २६ | उपब्दिः । | ४५ | नौः । |
| ८ | गम्भीरा । | २७ | मायुः । | ४६ | अक्षरम् । |
| ९ | मन्द्रा । | २८ | काकुत् । | ४७ | मही । |
| १० | मन्द्राजनी । | २९ | जिह्वा । | ४८ | अदितिः । |
| ११ | वाशी । | ३० | घोषः । | ४९ | शची । |
| १२ | वाणी । | ३१ | स्वरः । | ५० | वाक् । |
| १३ | वाणीची । | ३२ | शब्दः । | ५१ | अनुष्टुप् । |
| १४ | वाणः । | ३३ | स्वनः । | ५२ | धेनुः । |
| १५ | पविः । | ३४ | ऋक् । | ५३ | वल्गुः । |
| १६ | भारती । | ३५ | होत्रा । | ५४ | गल्दा । |
| १७ | धमनिः । | ३६ | गीः । | ५५ | सरः । |
| १८ | नाळी । | ३७ | गाथा । | ५६ | सुपर्णी । |
| १९ | मेळिः । | ३८ | गणः । | ५७ | बेकुः । |

## ॥ चतुर्विंशी कला ॥

### ॥ वेदाङ्गनिघण्टु-निरुक्तभाष्याणि ॥

### ॥ सप्तपञ्चाशद् (५७) वाङ्नामानि ॥

७३७ वेदानां परमार्थसंविदुदये प्रायेण मन्त्राक्षरे
तत्त्वार्थादिसमर्थनादिसमये शब्दप्रयोगादरे ॥
स्पष्टार्थेष्वनिवार्यताऽधिकमता प्रायो न दोषायते
स्वीकार्या पुनरुक्तिराञ्जसहृदा सा पण्डितैः क्षम्यते ॥ १ ॥

७३८ वेदाङ्गे श्रवणेन्द्रियार्थपरके नैरुक्तनैघण्टुके
वाङ्नामानि समाख्यया सुपठितान्यार्षाणि सङ्केतके ॥
श्लोकादीनि च वेकुरन्तविततान्याहुश्चतुर्वेदतः
मन्त्र-ब्राह्मणसङ्गतानि बहुशः स्युः सप्तपञ्चाशता ॥ २ ॥

### ॥ ऋङ्मन्त्रः ॥

अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद् यक्षभृद्विचेताः ॥
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिंमायां अभिद्यून् ॥
(ऋ० म० १ । १९० । ४)

### ॥ पद पाठः ॥

अस्य । श्लोकः । दिवि । ईयते । पृथिव्याम् ।
अत्यः । न । यंसत् । यक्षऽभृद् । विऽचेताः ॥
मृगाणाम् । न । हेतयः । यन्ति । च । इमाः ।
बृहस्पतेः । अहिंऽमायान् । अभि । द्यून् ॥

## ॥ श्लोकः ॥ प्रथमं वाङ्नाम ॥

७३९ "श्लोकः" स प्रथमो निघण्टुपठितो वाङ्नामसु प्रस्तुतः
श्लाघ्यः पद्यमयः पदादिवचसां सङ्घाततः श्लोक्यते ॥
श्लाघाख्यः सुयशः स्वरूप उदितः सन्नामतः श्लाघ्यते
श्लोकाख्या परकीर्तिसत्त्वमहसा वाग् रूपतो लोक्यते ॥ ३ ॥

७४० श्लोको लोकवियद्-दिगन्तविततः सद्वाक्स्वरः श्लाघितः
लोकेऽस्मिन् कृतकृत्यतापदभृतां सन् पूरुषार्थोऽर्थितः ॥
प्राज्ञानां सुकृतात्मनां सुमनसां नृणां मृतानामपि
प्रत्यक्षादजरामरत्वगमकः स्यान्नामशेषात्मकः ॥ ४ ॥

७४१ सुश्लोकः प्रथितः सुकीर्तिरिति सा सत्त्वात्मिका वाक् परा
सत्कीर्तिः परमा प्रभा सुमहसा सद्भावनाप्ताऽक्षरा ॥
पुण्यश्लोक इति प्रथा सुकृतिनां धर्मादिसत्कर्मणां
पुण्यात्मा परमार्थतो विजयते सत्यादिसद्धर्मणाम् ॥ ५ ॥

७४२ श्लोकोऽयं पदपद्यरूपकविता छन्दोऽनुवृत्ताहिता
श्लाघार्हार्थकशब्दचित्रललिता वाणी कलाबृंहिता ॥
लोकेऽस्मिन् विविधार्थभावलसिता ध्वन्यादिनाऽलङ्कृता
श्लोकाख्या कविवाक् परा प्रभवति प्रज्ञानरस्याञ्चिता ॥ ६ ॥

७४३ वेदाङ्गोदितदिव्यपादकमला छन्दः सुवाङ् निर्मला
वेद्या विश्वसुवन्दिता कविकला सम्दावसत्त्वाऽचला ॥
विद्या व्याकरणादिशुद्धवचना पूर्णेन्दुबिम्बानना
वर्णापूर्णमहः सुशान्तिनयना वीणा स्वरात्माऽङ्गना ॥ ७ ॥

७४४ लोके श्लोककृदेव सन् कविवरो मान्यो वदान्यो विदां
श्लाघार्होऽखिलसत्सभासुचतुरः प्राकाशकः संविदाम् ॥
श्लोकैः स्वैः स तु लौकिकेष्वचतुरः स्तब्धोऽपि संश्लाघ्यते
लोकैस्तैः सकलैः स पण्डितवरः श्रेष्ठः सदाऽऽलोक्यते ॥ ८ ॥

७४५ वेदे श्लोक इति प्रथां प्रतिगतश्छन्दोमयः संश्रुतः
वेद्यो ब्रह्ममयः स मन्त्रवचनः पूर्वर्षिभिः संश्रितः ॥
द्रष्टा मन्त्रकृदेव सन् ऋषिरसौ सन् मन्त्रदृक् छन्दसा
देवो मन्त्रकृदित्यपि श्रुतिनुतः प्रत्यङ्मतिश्छान्दसः ॥ ९ ॥

॥ सवितुर्मुखेन श्लोकेन विश्वेषां प्रसवः ॥

॥ तत्प्रजातानां तेषां आश्रावः ॥

॥ ऋङ्मन्त्रः ॥

य इमा विश्वा जातान्याश्रावयति श्लोकेन ।
प्र च सुवाति सविता ॥

( ऋ० मं० ५ । ८२ । ९ )

॥ पदपाठः ॥

यः । इमा । विश्वा । जातानि । आऽश्रवयति । श्लोकेन ।
प्र । च । सुवाति । सविता ॥

७४६ यः श्लोकेन समस्वरेण सविता विश्वानि सूते चिता
जातानि प्रतिनामरूपसहितान्याश्रावत्यार्चितः ॥
तस्मै श्लोकमतः समर्पयत तं गायत्रसच्छन्दसं
यस्येदं सकलं वशे सुनिहितं स्वेन्द्रात्मने सद्रसम् ॥१०॥

७४७ ब्रह्मा वेदविदेव सन् त्वनिरतः सर्वात्मचित्संविदा
सत्सामस्वरतः स्वसामरसतो ब्रह्मैव गायन् हृदा ॥
सोऽहं श्लोककृदित्यनन्यहृदयो नित्यं समास्ते मुदा
श्लोकस्यैव परं महात्म्यमुदितं संश्रूयते सर्वदा ॥११॥

७४८ सिद्धः श्लोककृदेव सर्वविदुषां श्रेष्ठः कवीनां कविः
सुश्लोको भुवि राजते मुनिरयं दिव्यो यथाऽसौ रविः ॥
श्लोकैः सद्भिमलैः सुपद्यकमलैः सन्मालिकाऽलङ्कृतिः
लोके वैदिकदिव्यकीर्तिरमला भूयात् सतां सत्कृतिः ॥१२॥

७४९ वेदे ब्राह्मणवाङ्मयेऽप्युपनिषद्वेदान्ततत्त्वार्थके
प्राधान्येन समर्थितार्थविषये प्रामाण्यभूमार्थके ॥
स श्लोको भवतीति शब्दमुखतो मन्त्रास्तथोदाहृताः
सिद्धास्ते तु ऋगादयः श्रुतिमुखाद् ब्रह्मर्षिभिर्व्याहृताः ॥१३॥

७५० श्लोकैरेव परात्मनो भगवतो भक्तिः स्तुतिः प्रार्थना
शास्त्रीया सदुपासना यजनतः सिध्येत् समाराधना ॥
ब्रह्मोपेन्द्रमहेन्द्ररुद्रपरमाः सिद्धाः परा देवताः
ब्रह्मात्मार्पणभावनाप्रणिहितास्तृप्यन्ति सद्भाविता ॥१४॥

७५१ लोकेऽपीह महात्मनां सुविदुषां सन्मानपत्रादिकं
श्लोकैरेव वितीर्यते कविवरैः सत्कारसत्त्वाधिकम् ॥
श्लोको गद्यमयोऽपि सन् स्तुतिमयः सत्त्वप्रशंसार्थकः
लोकानां सकलोऽपि शब्दचनः स्याद् वाङ्मयः सार्थकः ॥१५॥

॥ भगवते इन्द्राय सर्वश्लोकसमर्पणोपदेशः ॥

## ॥ ऋङ्मन्त्रः ॥

प्रैते वदन्तु प्र वयं वदामो ग्रावभ्यो वाचं वदता वदद्भ्यः ॥
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ॥

(ऋ० म० १० । ९४ । १)

## ॥ पदपाठः ॥

प्र। एते। वदन्तु। प्र। वयम्। वदामः। ग्रावऽभ्यः। वाचम् वदत। वदत्ऽभ्यः।
यत्। अद्रयः। पर्वताः। साकम्। आशवः। श्लोकम्। घोषम्। भरथ। इन्द्राय। सोमिनः ॥

७५२ इन्द्राद् विश्वविभूतिपूर्णपुरुषात् स्वच्छन्दसां वर्षकात्-
श्लोकास्ते सकलास्तपः समुदिताश्छन्दोमया आर्षकाः ॥
श्लोकैस्तैः स्वरसद्रसैः स भगवान् सत्संविदा धीयतां
छन्दोवाग्रससेवनाद् विरमतां स्वान्तः समाधीयताम् ॥१६॥

## ॥ धारा ॥ द्वितीयं (२) वाङ्नाम ॥

७५३ "धारा" सा विधृता निघण्टुवचने वाचो द्वितीयाऽभिधा
धार्यन्ते धुरि ताः सुधीरपुरुषैर्गत्या विदाऽनेकधा ॥
धार्या साऽऽत्मनि मूर्धनि स्वहृदये चैतन्यधारामयी
साऽऽधारादिह मूलतश्चिदुदये वागेव संविन्मयी ॥१७॥

७५४ "धारा" सद्रस-सस्वराऽम्बरचरा दिग्-व्योममात्राधरा
साऽऽधारात्मकपूर्णबिन्दुनिकरा वेदात्मविद्याधरा ॥
सत्यैकाक्षरचेतनागतिपराऽविच्छिन्नधाराधरा
सन्मूलाग्रसमग्रसस्वरपरा वाग् ब्रह्मसत्त्वाधरा ॥१८॥

७५५ प्राक् सृष्टेर्निजपूर्णबिन्दुपरया सच्चेतनाधारया
वाक्सृष्टेरिह विश्वभूमिचरया चित्संविदाऽपारया ॥
प्रत्यक्सिद्धपरात्मचित्तिकलया सर्वस्वधीधारया
प्रत्यक्षा प्रवहत्यजस्रवलया सा वाक्सुधा धारया ॥१९॥

७५६ सूत्रात्मा परचेतनाधृतिपरा धाराऽसुसंवित्परा
सर्वात्मानुगताऽनिलानलपरा पूर्णात्मपारावरा ॥
धीरा धीन्द्रियसञ्चराश्च मरुतो धारावराः सुस्वराः
धीरेन्द्रात्मकला शचीचितिपरा वागेव धारावरा ॥२०॥

७५७ मुख्यप्राणधरः प्रचेतनपरो मर्त्येषु गुप्तान्तरः
विश्वाधारपरोऽखिलान्तरचरः सन् वाक्सुधीसुस्वरः ॥
सर्वात्मान्तरलिङ्गदैहिकधरः सप्राणवाक्कन्धरः
स्वं ज्ञानं वितरन् महाबलपरो रुद्रः स धारेश्वरः ॥२१॥

७५८ धारा सोमसुधारसाम्बुधिपरा वाग् ज्ञानरत्नाकरा
दिव्या सामरसस्वरामृतपरा स्वानन्दसत्त्वाकरा ॥
मेया मानधुरा सुरासुमधुरा मेयात्ममानाक्षरा
ज्ञेया ज्ञानधुरन्धरा ध्वनिधरा संवित्सुधाराधरा ॥२२॥

७५९ धारा सा क्षुरधारयेव शितया शक्त्या जगच्छासनात्
तीव्रा शास्त्रविधेर्निषेधवचनात् तीक्ष्णोग्रवज्राननात् ॥
विश्वाग्रा स्वसमग्रदिव्यनयना वाग् ज्योतिरग्रानना
विश्वैरत्र दुरत्यया (ऽ) सुहृदया धारैव विश्वायना ॥२३॥

७६० सूर्यात्मेह सरस्वती स्वरवती तेजस्वती भास्वती
स्वर्गङ्गेव वसुन्धरां रसवतीं सन्तर्पयन्ती सती ॥
धाराऽऽदित्यरसाऽधरा प्रवहति प्राणात्मनां चिद्व्रती
धाराधारतयाऽऽत्मवाक् प्रभवति प्रज्ञानधारावती ॥२४॥

७६१ धारा व्योमनि विन्दुना प्रवहति स्वेन्दुप्रभात्माऽधरा
धृत्वा तां चितिशीर्षकेशकिरणैः संश्लिष्टगङ्गधरा ॥
सानुस्वारसुपूर्णबिन्दुकरणा प्रत्येति संवित् स्वरा
सानुस्वाररसस्वरा सुरसना वाग् वैखरी स्वाक्षरा ॥२५॥

७६२ विद्युज्ज्योतिषचित्स्वरा रसपरा व्योम्नोऽवतीर्णाऽधरा
धारा स्वीवसुन्धरामसुधरां सन्तर्पयत्युत्तरा ॥
भूमेः सन्ततमुद्यती चिदनलज्वालोर्ध्वधारोत्तरा
मूलान्तां रसधारया दिवममूं सम्पूरयत्युत्तराम् ॥२६॥

७६३ मर्त्यानाममृतेन्दुबिन्दुरसतो मूर्ध्नोऽवतीर्णा सुधा-
धारा सारतराऽधराऽऽत्मरसधा वाङ् मानसात्मा सुधा ॥
मूलाधारपदात् परा समुदिता वगूर्ध्वधाराऽभिधा
मूर्धन्यन्तरनाहता रसनया स्वात्मस्वरा साऽसुधा ॥२७॥

७६४ धारा वागिह कामधेनुरुदगाद् दुग्धं दुहानाऽशनं
दोग्ध्री दुग्धसुधारया प्रकुरुताद् विश्वस्य सञ्जीवनम् ॥
अश्विभ्यां रविसोमसत्त्वमुखतो ज्योतीरसाभ्यां सदा
शश्वत् सत्पुरुषार्थवेदमुखतः स्तन्यैः स्तनैः स्यान्मुदा ॥२८॥

## ॥ विशिष्टं अध्यात्मतत्त्वम् ॥

## ॥ ऋङ्मन्त्रः ॥

"य ईं चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य ॥

(ऋ० मं० १ । ६७ । ७) द्विपदा विराट् ॥

## ॥ पदपाठः ॥

"यः। ईम्। चिकेत। गुहा। भवन्तम्। आ। यः। ससाद। धाराम्। ऋतस्य।

७६५ ईमित्यक्षरचित्परात्मपरमां संवित्स्वरां सत्तमां
यो वेदात्मनि हृद्गुहान्तरतमां नित्यं भवन्तीं समाम् ॥
यश्चान्तः स्वयमाससाद भवतीं धारामृतस्यात्मनः
वाचं तां समनुस्वरन् त्स रमते वैश्वानरोऽग्निस्वनः ॥२९॥

७६६ ईशानेन्द्रपरात्महृद्रसमयी चैतन्यधारामयी
श्रीशक्तिः परवाचका गुणमयी गुर्वी तनूर्वाङ्मयी ॥
ईङ्कारानुकृतिस्वराक्षरमयी ब्रह्मात्मसंविन्मयी
सा गुप्तप्रणवात्मिका विजयते धाराभिधा सन्मयी ॥३०॥

७६७ वाचाऽन्तर्हृदि धारयाऽऽत्मधृतया सामूलमध्याग्रया
वाच्यं स्वं परमिन्द्रमात्मरसदं सुश्लोकमन्त्राग्रियम् ॥
स्वात्मन्यन्तरुदीर्णया समधिया साजस्रचिद्धारया
सद्योगादनुसन्दधीत परमं धीयोगसन्धारया ॥३१॥

७६८ सत्याप्त्या मधुविद्ययाऽऽत्मरसया सत्सौमनस्याप्तया
सानन्दामृतधारया मधुरया सत्सामरस्याप्तया ॥
सर्वस्वं स्वनुरूपसत्त्वपरया पूर्णं समाधारया
स्वेन्द्रात्मानमिहात्मनि स्वयमियाद् वाचां धियां धारया ॥३२॥

॥ इति चतुर्विंशी कला सम्पूर्णा ॥

श्लोक एव वाचि सिद्धनामधेयमादिमं
धारया द्वितीयसञ्ज्ञया सुमानितं समम् ॥
वेदवाङ्मुखोदितानुवादतो निवेदितं
दैवरातवाक्सुधाप्रसादतो नवोदितम् ॥२४॥

## ॥ पञ्चविंशी कला ॥

### ॥ "इळा" तृतीयं ( ३ ) वाङ्नाम ॥

७६९ वाग् वेद्येयम् "इळा" निघण्टुवचने नाम्ना तृतीयोच्यते
वाग्रूपादिलतीति दिव्यवचसा स्वान्तदृशा प्रेक्षते ॥
उत्प्रेक्षादिवचोमुखेन मनसा तेजोमुखा प्रेक्ष्यते
सैवेडेति समीड्यते सुहविषा मन्त्रैरुपाहूयते ॥ १ ॥

॥ तिस्रो वाचः । तिस्रो देव्यः ॥

॥ सरस्वती-इळा-भारत्यः ॥

### ॥ ऋङ्मन्त्रः ॥

"इळा" सरस्वती मही तिस्रो देवीर्मयोभुवः ॥
बर्हिः सीदन्त्वस्रिधः ॥

( ऋ० मं० १ । १३ । ९ ) ( ५ । ५ ८ )

### ॥ पदपाठः ॥

इळा । सरस्वती । मही । तिस्रः । देवीः । मयःऽभुवः ॥
बर्हिः । सीदन्तु । अस्रिधः ॥

भारतीळे सरस्वति या वः सर्वा उप ब्रुवे ॥
तानश्चोदयत श्रिये ॥

( ऋ० मं० १ । १८८ । ८ )

भारति । इळे । सरस्वति । याः । वः । सर्वाः । उप । ब्रुवे ॥
ताः । नः । चोदयत । श्रिये ॥

७७० तिस्रो वाच इति श्रुतास्त्रिभुवने ता ज्योतिरग्राः स्थिताः
तिस्रो देव्य इति स्तुता श्च यजने सूक्ते तदाप्रीमुखे ॥
तिस्रस्तास्तु सरस्वती पुनरिळा सा भारती शक्तयः
तिस्रोऽपि प्रथिताश्च मन्त्रमुखतो वेदेषु वाङ्मूर्तयः ॥ २ ॥

॥ इळा–भौमाग्निदैवत्या वाक् ॥

७७१ आग्नेयीयमिळाऽवमाऽवनिपदे भौमाग्नितेजोमयी
साऽग्नायी प्रथमा महीह महती भूर्देवता वाङ्मयी ॥
वाङ्मूर्तिर्भवती सती त्वियमिळा भूरग्निगर्भेरिता
गूढात्मेव तथाऽरणीव महसा वागाग्निगर्भेडिता ॥ ३ ॥

॥ इडा–देवहूः ॥

७७२ दिव्या सेयमिडाऽग्निदैवतपरा वागेव सा देवहूः
साऽऽहूताऽखिलसद्धविर्हवनकृत् सा देवताह्वानभूः ॥
मन्त्रात्माऽत्र सुधावती मधुमती सा यज्ञनीः श्रूयतां
सुश्राव्या सकलाश्रया सुयशसां सा वाक् समाश्राव्यताम् ॥ ४ ॥

॥ इळा मानवशासनी वाक् ॥

॥ ऋङ्मन्त्रः ॥

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन् नहुषस्य विश्पतिम् ॥
इळामकृण्वन् मनुषस्य शासनीं पितुर्यत् पुत्रो ममकस्य जायते ॥
(ऋ० मं० १।३१।११)

॥ पदपाठः ॥

त्वाम्। अग्ने। प्रथमम्। आयुम्। आयवे। देवाः। अकृण्वन्। नहुषस्य। विश्पतिम्॥
इळाम्। अकृण्वन्। मनुषस्य। शासनीम्। पितुः। यत्। पुत्रः। ममकस्य। जायते।

७७३ सा वाङ् मानवशासनी श्रुतिपरा छन्दस्वती स्वाक्षरा
संशास्तीन्द्रमुखेव मन्त्रवचनादैन्द्राग्नसत्त्वोच्चरा ॥
सर्वांनीलयतीह सन्नियमनाल्लेलायमानानिला
संवित्कामकृतिप्रचेतनकलाऽलीला निमीलानला ॥ ५ ॥

॥ इळा-यज्ञीयहविः सादनी ॥

७७४ यज्ञे सेयमिडा सुपात्रवचना वाक् स्यादिडाभक्षणे
दर्शादीष्टिषु तद्धविःसुहवनात् पश्चादिडाह्वानके ॥
भूयो भक्षणकर्मणेऽर्हणकृते मन्त्रैरिडामन्त्रणात्
पौरोडाशहविःसुसादनपदां तामाह्वयन्तीडिताम् ॥ ६ ॥

७७५ यज्ञे तद्यजमानयोगमुदिता स्वस्मिन्निडाह्वानके
चत्वारोऽपि च ऋत्विजः सुमिलितास्तद्वेदिकास्थानके ॥
होत्रा संविधृतां स्वहोतृसदने हव्यां हविःपूरितां
तत्रेडां समुपाह्वयन्ति मनसा पूतां स्वमन्त्रैरिताम् ॥ ७ ॥

७७६ वाचाऽसुस्वरसत्त्वया स्वरसया सैन्द्राग्नसत्त्वास्यया
स्वेनैवेडितयाऽऽत्मचित्तिपरया ब्रह्मात्मभूनीडया ॥
वाच्यं स्वं परमिन्द्रमग्निवदनं तं वैखरीवाच्यया
वागीशं परसत्त्ववेदवदनं स्वान्तस्तुवीतार्चया ॥ ८ ॥

॥ इडा-वामनाडी-प्राणनीडा ॥

७७७ सर्वेषामिह वामभागनिहिता वामे नसि प्रस्थिता
सोमेन स्वरति स्वशान्तिसुहिता सा सौम्यनाडी स्तुता ॥
सा वामेऽक्षिणि दृश्यतेऽर्चिरुदिता दृक्छक्तिरूपा विराट्
सेन्द्रस्येन्धगुणाभिधस्य नदिता पत्नी पराग् वाक् स्वराट् ॥ ९ ॥

७७८ ईमित्याश्रुतमातृकामनुरनुस्वाराप्लुताऽऽम्रेडिता
सेन्थेन्द्रात्मचितिः सुवामनयना शक्तिर्विराडीडिता ॥
सौम्या शान्तिकलाभिधानिलयना नाडी परा वागिला
काम्या कामकलासुधाभ्युदयना वामाक्षिनीडाऽनिला ॥१०॥

७७९ या मैत्रावरुणी वियत्सुलसिता तेजोरसात्माप्लुता
या मात्रा क्रतुदक्षसत्त्ववलिता संविक्रियासम्भृता ॥
ब्रह्मक्षत्रसशान्तिशक्तिललिता चक्षुर्मनःसत्त्वधा
या वीरप्रसवादिसत्त्ववसुधा वागेव सेलाभिधा ॥११॥

॥ इळोऽग्निः इळेन्यः पवयानः ॥

७८० आप्रीसूक्तमुखादिळोऽग्निरुदित श्छन्दोमुखादीडितः
तत्रेडासहितः स सोमसवने यज्ञादिळात्माऽऽश्रितः ॥
ईळेन्यः पवमान इन्दुरमृतः सोमीह सा वाग् भवेद्
ईड्या सोमसुधात्मसद्रसकला शक्तिश्च साऽग्नेरिला ॥१२॥

॥ इळावान् अग्निः ॥

७८१ वाक्सत्त्वादुदगादिळोऽग्निखनौ गोऽश्वाविमुख्यखनः
सेळावानसुरोऽसुमान् वसुवनिर्वैश्वानरो यज्ञनीः ॥
सेळानां नृतमः स्वधारसभृतां बेताऽऽत्मवाचां सुभूः
सेळा धेनुमती सती वसुमती वागेव विश्वप्रसूः ॥१३॥

७८२ छन्दोवाग्मिरिळाभिरीशकृतिभिर्वेदेडिताभिः स्वयं
छन्दोवर्षकमिन्द्रमार्षनुतिभिर्वेद्यं च वागुच्चयम् ॥
छन्दोगीतिससामरस्यमतिभिः सौम्यस्वराद्यन्वयं
छन्दोदर्शनसत्यमन्त्रकृतिभिर्देवं तमीडेऽग्नियम् ॥१४॥

७८३ शस्ता व्योम्नि सरस्वतो दिनमनणेः सूर्यस्य दिव्यात्मनः
शक्तिस्तस्य सरस्वती रसवती मेघात्मिका स्यादिरा ॥
भौमाग्नेः परशब्दशक्तिसलिला सौम्या कला भूरिला
सेन्द्रात्मा चितिवाग्रसस्वरकलासद्भूतिपूर्णाकरा ॥१५॥

७८४ आग्नेयीं परदिव्यसत्त्वविरलां तेजस्वतीं तामिलाम्-
अग्नायीं भुवि पावमानविमलां संवित्कलामुज्ज्वलाम् ॥
वेदेड्यां विविधस्वरूपसरलां शक्तिं स्वशान्त्योज्ज्वलां
वाग्देवीं वसुदेवतेडितकलामीडे स्ववाचाऽनलाम् ॥१६॥

॥ गौः, (४) चतुर्थं वाङ्नाम ॥

७८५ "गौ" रित्येव चतुर्थमत्र पठितं वाङ्नाम नैघण्टुके
वाग् वै गौरभिधीयते श्रुतिमती सा गौरवैकार्थके ॥
सा गौर्गच्छति चित्स्वराद् गुरति सा सर्वार्थसद्वाचने
सर्वैरप्यधिगम्यते सुमनसा बोधे तदर्थार्जने ॥१७॥

॥ धेनुस्वरूपा गौः वाङ्माता ॥

## ॥ ऋङ्मन्त्रः ॥

माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः ॥
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥

( ऋ० मं० ८ । १०१ । १५ )

## ॥ पदपाठः ॥

माता । रुद्राणाम् । दुहिता । वसूनाम् । स्वसा । आदित्यानाम् । अमृतस्य । नाभिः
प्र । नु । वोचम् । चिकितुषे । जनाय । मा । गाम् । अनागाम् । अदितिम् । वधिष्ट ॥

॥ माता रुद्राणाम् ॥

७८६ रुद्राणां परचिद्रुत - स्वरकृतां चिद्विद्युदेकात्मनां
रौद्राणां मरुतां जगत् - तनुभृतां प्राणात्मचित्सत्त्वनाम् ॥
माता तत्प्रतिमानसत्त्ववितता धात्री सवित्री स्वरा
मात्री शक्तिचिता मिमाति सकलं गौरेव सा वाक्परा ॥१८॥

॥ दुहिता वसूनाम् ॥

७८७ सर्वेषां सुविभूतिसद्रसभृतां दोग्ध्री सुधात्री हिता
सर्वासा दुहिता सती तनुभृतां सत्त्वाद् वसूनां सुता ॥
सत्यं तत् परसंविदादिसुरसं सन्धापयन्ती सुतान्
साऽऽम्नेयी भुवि साष्टभूतितनुभृद् वागेव सा गौः स्तुता ॥१९॥

स्वसा आदित्यानाम् ॥

७८८ दिव्यानाममृतात्मनां सुमनसां तेजस्तनूनां स्वसाऽऽ-
दित्यानां भगिनी समानकरणा ज्योतीरसं संसृता ॥
ज्ञानानन्दसुशान्तिसत्त्वसुरसं दिव्यं सरन्ती स्वरा
ज्ञेयं तत् परिसारयत्यनुपदं वागेव सा गौः परा ॥२०॥

॥ अमृतस्य नाभिः ॥

७८९ माता गौरमृतस्य नाभिरमृतैः सर्वात्मशक्तिप्रदा
मात्री मानपरा प्रमाणमुखतः शान्तिप्रदा संविदा ॥
संवित्कामकृतिप्रचेतनसुधा वेदामृतात्माऽक्षरा
सर्वेष्टार्थ - परार्थ - सत्त्वरसधा गौरेव सा वाक् परा ॥२१॥

( प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट )

७९० विश्वस्यैव हिताय वच्मि भवते ज्ञानं सुजिज्ञासवे
यस्यां विश्वमिदं प्रतिष्ठितमहो ! ज्ञेयं समस्तास्पदम् ॥
अघ्न्यां नित्यमनागसं रसतमां गां मा वधिष्टेति तां
वेदाज्ञेयमखण्डनीयवचना वागेव सा गौर्मता ॥२२॥

॥ ऋङ्मन्त्रः ॥

वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम्
देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥
( ऋ० मं० ८ । १०३ । १६ )

॥ पदपाठः ॥

वचःऽविदम् । वाचम् । उत्ऽईरयन्तीम् । विश्वाभिः । धीभिः । उपऽतिष्ठमानाम् ॥
देवीम् । देवेभ्यः । परि । आऽईयुषीम् । गाम् । आ । मा । अवृक्त । मर्त्यः । दभ्रऽचेताः ॥

७९१ वाचं तां च वचोविदं श्रुतिवचस्तत्त्वं विदन्ती स्वयं
वाच्यां तां समुदीरयन्त्यनुवचः संवेदयन्ती परान् ॥
विश्वाभिः परधीभिरात्मचितिभिः संतिष्ठमाना प्रभा
विश्वार्थैरुपतिष्ठते परहिते वागेव सा गौः समा ॥२३॥

७९२ देवी सा परदेवताचितिमयी श्रीः सर्वदैवत्यभूः
देवेभ्यः प्रतिदेवतार्थकृतये सर्वात्मनैवेष्यते ॥
मर्त्याः क्षुल्लकबुद्धयोऽल्पमतय स्तां गामभीष्टार्थदां
हिंसन्तीह धनादिलोभनिहता गौरेव वाक् साऽर्थदा ॥२४ ॥

॥ वाग्रूपगोहिंसास्वरूपम् ॥

७९३ शास्त्रैः सद्धितशासनं सुविहितं तद्विनिषिद्धार्थकं
श्रद्धाहीनतया प्रमत्तहृदयात् उल्लङ्घ्य सत्यार्थकम् ॥

स्वेच्छाचारगतेः समस्तकृतिभिर्हिंसन्ति गां देवतां
सा हिंसा प्रतिहन्ति हिंसकममुं गौरेव सा वाङ् मता ॥२५॥

७९४ माता गौरिह कामधेनुरुदिता वागेव विश्वाश्रया
मान्या मानवजीवनी हिततमा सर्वार्थसत्प्रत्यया ॥
सद्भावेन सुरक्षिताऽभ्यवति सा घ्नन्तं निहन्ति स्वयं
साक्षाद् ब्रह्ममयी सदा विजयते वागेव गोः सान्वयम् ॥२६॥

७९५ वेदात्माऽखिलसंविदादिरसभूर्ज्ञाने च सञ्जीवने
वेदार्थेऽखिलसत्प्रपञ्चविषये सत्पारमार्थे समे ॥
सर्वेषां सुखशान्तिशक्तिरसदा निःश्रेयसे श्रेयसे
सर्वस्वात् समुपास्यतां भगवती वागेव गौ र्भूयसे ॥२७॥

॥ आदित्योऽपि गौरुच्यते ॥

॥ ऋङ्मन्त्रः ॥

उतादः परुषे गवि सूरश्चक्रं हिरण्ययम् ॥
न्यैरयद् रथीतमः ॥

( ऋ० म० ६ । ५६ । ३ )

॥ पदपाठः ॥

उत । अदः । परुषे । गवि । सूरः । चक्रम् । हिरण्ययम् ॥
नि । ऐरयत् । रथिऽतमः ॥

७९६ आदित्योऽपि सुतः श्रुतोऽयमदितेर्दिव्यः स गौरुच्यते
योऽमुष्मिन् गवि तैजसात्मपुरुषे ज्योतीरसाभ्याचिते ॥
चक्रं दिव्यहिरण्मयं चितिमयं स्वं विश्वभूताश्रयं
सेन्द्रः प्रैरयदात्मसात्करणतो विद्युद्रथः सन् रथी ॥ २८ ॥

॥ गोः वाकुछ्रक्रेः वत्सः सः सूर्यः श्रूयते ॥

॥ ऋङ्मन्त्रः ॥

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उं ॥
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥
(ऋ० मं० १।१६४।२८)

॥ पदपाठः ॥

गौः । अमीमेत् । अनु । वत्सम् । मिषन्तम् ।
मूर्धानम् । हिङ् । अकृणोत् । मातवै । ऊम् इति ॥
सृक्वाणम् । घर्मम् । अभि । वावशाना ।
मिमाति । मायुम् । पयते । पयःऽभिः ॥

७९७ गौर्माता स्वसुतं परं दिविषदं चित्त्योन्मिषन्तं दृशा
गन्तारं दिवि गोस्वरूपमपदं शक्त्याऽन्वमीमेद् दिशा ॥
तेजः सत्त्वरसं सृजन्तमपि तं सेच्छत्यमुं स्वान्वयं
वाक् सूर्यं सुमिमाति तत्र पयते दिव्यैः पयोभिः स्वयम् ॥२९॥

॥ गोसूर्ययोः तयोः वागात्मनोः मिथो योगः ॥

॥ ऋङ्मन्त्रः ॥

अयं स शिङ्क्ते येन गौरभीवृता
मिमाति मायुं ध्वसनावधि श्रिता ॥
सा चित्तिभि र्नि हि चकार मर्त्यं
विद्युद् भवन्ती प्रति वव्रिमौहत ॥
(ऋ० मं० १।१६४।२९)

## ॥ पद पाठः ॥

अयम् । सः । शिङ्क्ते । येन । गौः । अभिऽवृता ।
मिमाति । मायुं । ध्वऽसनौ । अधि । श्रिता ॥
सा । चित्तिऽभिः । नि । हि । चकार । मर्त्यम् ।
विऽद्युत् । भवन्ती । प्रति । वव्रिम् । औहत ॥

७९८ स्वान्तर्वागिह येन गौरभिवृता चैतन्य - संविद्रसा
स्वात्माऽयं निजवाक्स्वराचितिमयः शिङ्क्ते स्वरन्नुच्छ्वसन् ॥
सा गौरेव मिमाति तं स्वपुरुषं व्योम्न्यन्तरेऽधिश्रिता
सा दिव्या ध्वनिसत्पदेऽध्वरहिते वाङ् नादपूर्णाऽऽश्रुता ॥३०॥

७९९ वाक् सा चित्तिभिरात्मचित्प्रकृतिभिर्मर्त्यं चकराखिलं
वाच्यं विश्वमिदं चिता प्रसुषुवे सा संविदानाऽऽत्मना ॥
प्रज्ञानात् पुनरात्मसात्करणतो विद्युद् भवन्ती सती
पूर्णं स्वं पुरुषं परं तममृतं प्रत्यौहत मोघती ॥३१॥

८०० सा गौरेव हि वाक् परा प्रसितुता स्वेन्द्रान्विता वैद्युती
स्वात्मानं सुमिमाति सा स्वरसतत्तादात्म्ययोगोघती ॥
पूर्णो विश्वविभूतिभिः स पुरुषो यश्छन्दसां वर्षकः
सेन्द्रो गौः सहसा वृषा विजयते विश्वस्य राजर्षभः ॥३२॥

॥ इति पञ्चविंशी कला सम्पूर्णा ॥

वागिडा समीड्यते तृतीयया सुसञ्ज्ञया
विश्वशासनीज्यतेऽत्र पाकशासनाज्ञया ॥
वेदवाग् रसस्वरेण गौः प्रगीयते श्रिया
दैवरातवाक्सुधाऽऽत्मसत्त्वदोहनाभया ॥२५॥

# ॥ षड्विंशी कला ॥

## ॥ गौरी ॥ पञ्चमं ॥ (५) वाङ्नाम ॥

८०१ "गौरी" व्योमनि गूयते स्वरचिता वाङ्नामगा पञ्चमी
गुङ्गूरित्यभिगूर्यतेऽसुरचिता वाग् गौरवार्थोद्गमी ॥
गौरादित्यसुतेजसा स्वगुणतः सा गौरवर्णोत्तमा
गौर्यांश्चित्तिमुखोदितात् स्वरणतः सा वैद्युती मध्यमा ॥१॥

८०२ गौरी गौरसवर्णसत्त्वकमहातेजःशरीराऽम्बरा
गुर्वी चिद्गुरुभावभूतिकमहःशक्तिः स्वरात्माऽक्षरा ॥
गोप्त्री गौर्भुवि गौरिवात्मरसदा विश्वादिमाताऽङ्गना
गुप्ता सा दिवि देवता जगदिदं गोपायतीशात्मना ॥२॥

८०३ गौरी रुद्रमरुद्वाभिसरणाद् गूढाऽर्चिषा गूयते
गुङ्गूरिन्द्रसमीरवैद्युतरणाच्चिज्ज्योतिषाऽऽगूर्यते ॥
गौरादित्यगुणः स्वपुँस्त्वगुणतो गौरादितो ङीषते
गौर्वागग्निगुणात्मिका स्वगुणतस्तेजोमयी सेष्यते ॥३॥

## ॥ माध्यमिका वाग् गौरी रुद्रिया ॥

८०४ गौरी माध्यमिकाऽन्तरिक्षसदना वाक् सद्रसा सुस्वरा
रौद्री रुद्रियवैद्युताग्नितनुभृत् सेन्द्राग्निवक्त्रोच्चरा ॥
रुद्राणी दिवि रोरवीति तपता रुद्रात्मना चित्परा
रुद्रैः प्राणमुखैश्च विक्षु वितता सैकादशात्माऽऽन्तरा ॥४॥

॥ गौर्याः वस्तुसिद्धं तात्त्विकं स्वरूपम् ॥

॥ ऋङ्मन्त्रः ॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ॥
अष्टापदी नवपदी वभूवुषी सहस्राक्षरा परमे व्योमन् ॥

ऋ० म० १।१६४।

गौरिन्मिमाय सलिलानि तक्षती ०
( अथर्व० सं० )

८०५ गौरी वाक् सुमिमाय सत्त्वसलिलान्यन्तश्रिता तक्षती
गौरेव स्वरसात्मकानि सकलान्यात्मार्चिषा प्रोक्षती ॥
गोभिर्विश्वमिदं गुणैरविकलं सन्निर्मिमाना सती
गर्भेऽन्तर्निदधे स्ववाच्यमखिलं सा वाचकात्मोद्यती ॥५॥

८०६ सैकद्वित्रिचतुष्कपञ्चकपदा षट्सप्तकाष्टौनव-
स्वाङ्कात्मा सचतुष्कविंशतिपरा पूर्णा सहस्राक्षरा
सर्वार्थान् प्रतिपद्य सत्त्वपरया शक्त्याऽऽत्मनः संविदा
गौरी व्योमनि रोरवीति तपसा चिद्विद्युता सर्वदा ॥६॥

॥ त्रयी विद्यामयी वैष्णवी शब्दशक्तिः श्रीः ॥

८०७ सौहार्देन सरस्वती स्वरवती सत्त्वात्मना विष्णुना
सा स्वास्येन परात्मना प्रतिवृता गौरीगुणा जिष्णुना ॥
सूर्यादभ्युदिता त्रयीमनुतनुः सा श्रीर्नृणां श्रेयसे
संसेव्या सकलार्थसिद्धियशसे ज्ञानेन निःश्रेयसे ॥७॥

८०८ प्रत्ना वाचकशब्दशक्तिरुदिता ब्रह्मैव साक्षात् सती
प्राज्ञं ब्रह्म परोक्षमप्यनुगता वक्ते विदा शासती ॥
ब्राह्मी ब्रह्मसती चिदग्निवदना वेदाननेऽधिष्ठिता
ब्रह्मा सोऽग्निरयं स्ववेदिसदने यज्ञे हविर्भुक् स्थितः ॥८॥

८०९ गौरी वैद्युतचेतनात्मकमुखा सेन्द्राग्नितेजोमुखा
सोमो दिव्यरसात्मकः स मनसोऽधीशो विपश्चिन्मुखः ॥
सर्वेषामपि सत्पिता जनयिता सन् पूरुषात्माऽऽश्रुतः
स्वानन्देन स वाचमप्यनुचरीं गौरीं हृदाऽधिश्रितः ॥९॥

॥ गौरीमधिश्रितः सोमः ॥

## ॥ ऋङ्मन्त्रः ॥

मदच्युत् क्षेति सादने सिन्धोरूर्मा विपश्चित् ॥
सोमो गौरी अधिश्रितः ॥
( ऋ० मं० ९ । १२ । ३ )

## पदपाठ

मदऽच्युत् । क्षेति । सादने । सिन्धोः । ऊर्मा । विपःऽचित् ।
सोमः । गौरी इति । अधि । श्रितः ॥

॥ गौरी ब्रह्मवादिनी उमा-उमया सहितः सोमो रुद्रः ॥

८१० सा चोमोपनिषत्सुतत्त्वपरमा वाग् ब्रह्मवादिन्यसौ ।
तच्छक्त्या निजयोमयाऽग्निरुरगाद्विद्युच्चितैः स्वौजसैः ॥
ज्ञानानन्दरसादिना सुमुदिता रुद्रः स सोमोऽप्रियः
गौरी वागपि सोम ईश उदितौ वागात्मतत्त्वाश्रियौ ॥१०॥

## ॥ सोमारुद्रात्मकौ तौ उमा महेश्वरौ ॥

८११ सोमारुद्रसुनामरूपवपुषौ संविद्रसज्यौतिषौ
सोमीभर्गपरात्मचित्तिजनुषौ वागात्मसत्त्वत्विषौ ॥
सक्तौ शक्तिशिवात्मकौ सुमनसौ गौरीहरौ स्वार्चिषौ
तौ मातापितृसत्त्वकौ त्रिजगतां स्वस्त्यै प्रशस्ताशिषौ ॥११॥

८१२ गौर्येवात्मचितिस्वरा परतनूः संवित्प्रभावैभवा
गौरेवोत्तररीतिनीतिरसभूः सेन्द्रात्महृत्सम्भवा ॥
गीतेरूर्जति गौरिवीतिगतिभूः शक्तिप्रसूतेः सवाद्
गौरी रुद्रचिदात्मना विजयते संवित्प्रसादोत्सवात् ॥१२॥

८१३ गोप्त्री गुप्तरसात्मसोमवितता सत्यात्मयोगाश्रिता
गोप्तारं प्रति गोपयत्यनुपदं गुर्वीन्द्रसत्त्वोच्छ्रिता ॥
गौप्या सर्वसमर्थमर्थमखिलं वाचाऽर्पयत्याश्रुता
गौरी सुस्वरवाक्सुधासुरसिकान् त्सन्तर्पयत्याश्रितान् ॥१३॥

८१४ भूयस्तौ विपरीतयोगनिरतौ वागात्मरूपार्थकौ
स्वाग्नीषोमगुणान्वितौ प्रभवतो ज्योतीरसैकात्मकौ ॥
इन्द्रासोमपरौ मिथो विलसतः सोमीह वाग् हृद्रसा
रुद्रोऽसौ दिवि रोरवीति महसा सोमो रसात्माऽम्भसा ॥१४॥

८१५ वाच्योऽग्निर्दिवि विश्ववित् स्वरमयः सञ्ज्ञातवेदाश्रिता
वाच्याग्नेयचितेरितो रसमयः सोमो मनः सत्पतिः ॥
तस्मै विश्वविदेऽग्नये चितिमते दिव्याय रुद्रात्मने
सौम्यं सत्त्वमिहार्पयामि भवते सम्मानसं सद्रसम् ॥१५॥

८१६ गौर्यस्ताश्चरमेऽन्तरिक्षपरमे व्योम्न्यन्तरेऽन्तर्हिताः
ता इन्द्रेण सहात्मचित्यनुगताः सर्वैः सुरैरर्हिताः ॥
स्वादोः स्वादुतरं परं मधुरसं दिव्यं पिबन्ति स्वयं
सर्वेभ्यो वितरन्ति दिव्यमहसं प्राणात्मसत्त्वान्वयम् ॥१६॥

॥ गान्धर्वी (६) षष्ठं वाङ्नाम ॥

८१७ "गान्धर्वी" स्वरगीतिगन्धगतितः षष्ठीह वाङ्नामके
गन्धं साऽर्वति चित्स्वरप्रतिकृतेर्वाग् गन्ध्यते गायके ॥
गानाद् बोधयति स्वकं स्वररसं सा जानती गायिका
गन्धर्वान् रमयत्यलं निजरसे वाक् स्वस्य सद्गायकान् ॥ १७ ॥

८१८ गान्धर्वी स्वरदेवता श्रुतिरता व्योम्नि स्वचित्योद्यता
गान्धर्वाद्युपवेदगीतिनिरता नादायते विद्युता ॥
गान्धर्वीं स्वरसेन वाग्रसपरां वाचं परामक्षरां
गन्धर्वाः सकलाः समाः समरसाद् गीत्याऽनुयन्ति स्वराम् ॥१८॥

८१९ गन्धर्वा गणदेवता दिविषदस्ते देवयोन्यात्मकाः
गानात् सद्रसतत्पराः स्वरसदाः प्राणात्मका गायकाः ॥
गान्धर्वीति नुताऽनुगायति सदा सा वाक् परा गीयते
गायत्री निजगायकानसुभृतः प्राणान् त्स्वयं त्रायते ॥१९॥

८२० अङ्गं यस्तु पतत् सुचेतनमसौ प्राणः पतङ्गो रविः
साङ्गात्मा सकलान्तरः समुद्गादिन्द्रः स विद्युत्पविः ॥
गुर्वीं वाचमिमां बिभर्ति मनसा गर्भेऽन्तरङ्गे पदे
गन्धर्वः स्वरतीह तां चितिनुतां प्राणः प्रगायन् मुदे ॥२०॥

८२१ इन्द्रो व्योमनि मेघगर्भशयनो विद्युन्मयश्चेतनः
वाचं स्वां निजसोमसत्त्वरसनः स्वान्तर्बिभर्ति स्वनाम् ॥
इन्द्रस्यैव सखा बलेन पवनः सन् गन्धवाहोऽनिलः
गन्धर्वो हृदि गायतीन्द्रवदनः सोऽन्वेति तां सानलाम् ॥२१॥

८२२ षड्जादि स्वरतत्त्वसंविदुदयाद् गान्धर्ववेदाश्रयाद्
हृद्योगात् सवनत्रयादिकलया तत्कालमात्रान्वयात् ॥
गान्धर्वीं परदिव्यवाचममृतां यो गायति प्रत्ययाद्
गायन्तं रमयत्यमुं प्रतिपदं वागेव विश्वात्ययात् ॥२२॥

८२३ सोदात्तादिगुणस्वरेण सहितां वाचामृचामाश्रयात्
सोद्गीथादिगुणेन तत्त्वपिहितां स्वान्तः सुधीप्रश्रयात् ॥
ये गायन्ति रसेन सामरसतो गान्धर्वशास्त्रान्वयाद्
गान्धर्वी स्वरसात् प्रसादयति तान् वाग्देवताऽऽत्माश्रयात् ॥२३॥

८२४ गन्धर्वो गणदेवता गुणगणैर्देवाग्रगण्यायना
गन्धर्वाभिधदेवयोनिसदना गान्धारनामानना ॥
गान्धर्वाख्यगुणोपवेदवदना नाम्ना तृतीयस्वरा
गान्धारस्वरसामरस्यमधुना गान्धर्वविद्यायना ॥२४॥

॥ गन्धर्वशब्दः भाषावाचकः गायके सिद्धः ॥

## ॥ ऋङ्मन्त्रः ॥

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ॥
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो निपान्ति ॥

(ऋ० सं० १०।१७७।२)

## ॥ पदपाठः ॥

पतङ्गः । वाचम् । मनसा । बिभर्ति । ताम् । गन्धर्वः । अवदत् । गर्भे । अन्तरिति ॥
ताम् । द्योतमानाम् । स्वर्यम् । मनीषाम् । ऋतस्य । पदे । कवयः । ति । पान्ति ॥

८२५ सूर्योऽसौ दिवि तेजसा परितपन् सिद्धः पतङ्गात्मकः
सूरस्तत्र पतत्सदङ्गतनुभृच् चिज्ज्योतिरेकात्मकः ॥
स्वां वाचं मनसा विभर्ति सहसा सर्वार्थसद्वाचकां
तां गन्धर्व इहान्तरोऽनु वदति प्राणः स गर्भेऽन्तरे ॥२५॥

८२६ स्वर्यानां स्वरितां स्वरन्तरचितां तां द्योतमानां परां
सर्वान्तर्मनसः समीरणपरां वाचं मनीषान्तराम् ॥
सत्त्वाच्चेतनहृत्पदेऽन्तरपदे मूले ऋतस्यात्मनः
सत्यामात्मनि तां निपान्ति कवयो धीयोगशक्त्याऽऽत्मना ॥२६॥

८२७ गान्धर्वी प्रथिता ततः स्वरवती प्राणात्मना गायनाद्
गन्धर्वो दिवि गायने सुनिरतो गुह्यस्वरात्मायनात् ॥
गोप्ता सोऽन्तरितो गुहासुनिहितस्तन्नाम गुह्यार्थकं
गोप्त्री वाक् स्वपदे हृदन्तरुदिता गुप्तात्मशक्त्यात्मिका ॥२७॥

॥ गन्धर्वस्य पदे ज्ञानिनां तद्रसास्वादनम् ॥

## ॥ ऋङ्मन्त्रः ॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः
तयोरिद् घृतवत् पयो विप्रा रिहन्ति धीतिभिः । गन्धर्वस्य ध्रुवे पदे ॥

( ऋ० मं० १ । २२ । १४ )

## ॥ पदपाठः ॥

तयोः । इत । घृतऽवत् । पयः । विप्रा । रिहन्ति । धीतिऽभिः ।
गन्धर्वस्य । ध्रुवे । पदे ॥

८२८ गन्धर्वस्य पदे ध्रुवे दिविषदो विप्राः परे कोविदाः
रोदस्योर्घृतवत् पयः समरसात् तेजोऽन्वितं संविदा ॥
गन्धर्वाभिधसामसद्रसरताः स्वं सुस्वरं वाग्रसं
गान्धर्वीमनुसृत्य वाचममृतां धीभिर्लिहन्त्युद्रसम् ॥२८॥

## ॥ ऋङ्मन्त्रः ॥

ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद् विश्वा रूपा प्रति चक्षाणो अस्य ।
भानुः शुक्रेण शोचिषा व्यद्यौत् प्रारूरुचद् रोदसी मातरा शुचिः ॥

(ऋ० मं० ९ । ८५ । १२)

## ॥ पदपाठः ॥

ऊर्ध्वः । गन्धर्वः । अधि । नाके । अस्थात् । विश्वा । रूपा । प्रतिऽचक्षाणः । अस्य
भानुः । शुक्रेण । शोचिषा । वि । अद्यौत् । प्र । अरूरुचत् । रोदसी इति । मातरा । शुचिः ॥

८२९ ऊर्ध्वः सन्त्स्वरितः समस्तभुवनात् सन्नुत्तरो भास्वरः
गन्धर्वो रविरात्मसुस्वररसान् नाकेऽध्यतिष्ठत् परः ॥
भासा स्वात्मनि विश्वरूपमुदितं सन्वीक्षमाणः परं
भानुः शुक्रसुतेजसा समभरत् स्वे रोदसी मातरौ ॥२९॥

## ॥ ऋङ्मन्त्रः ॥

ऊर्ध्वो गन्धर्वो अधि नाके अस्थात
प्रत्यङ् चित्रा बिभ्रदस्यायुधानि ॥
वसानो अत्कं सुरभि दृशे कं
स्व १ र्ण नाम जनत प्रियाणि ॥

( ऋ० मं० १० । १२३ । ७ )

## ॥ पदपाठः ॥

ऊर्ध्वः । गन्धर्वः । अधि । नाके । अस्थात्
प्रत्यङ् । चित्रा । बिभ्रत् । अस्य । आयुधानि ॥
वसानः । अत्कम् । सुरभिम् । दृशे । कम् ।
स्व १ रिति स्वः । नः । नाम । जनत । प्रियाणि ॥

८३० ऊर्ध्वोऽसौ परतेजसा परितपन् नाकं चिताऽधिष्ठितः
प्रत्यङ् चित्रतराणि सर्वकरणान्यन्तः स विभ्रद् बभौ ॥
गन्धर्वः सकलान्तरे समुदितः सर्वप्रियाण्युच्चरन्
गान्धर्वीं निजवाचमात्मनिरतां नामानि गायत्यलम् ॥३०॥

८३१ गन्धर्वादिगणेषु सामरसतः प्राणस्वरेणाप्लुता
गान्धारस्वरनादसत्त्वकलिता सोच्चैः स्दात्ता प्लुता ॥
गन्धर्वोक्तसमाक्षरेषु च समा सैकश्रुतीष्टाऽऽश्रुता
गान्धर्वीति सुनामरूपलालता वाग् दिव्यनादाश्रता ॥३१॥

८३२ गन्धेनार्वति वायुना स्वरवता रौद्रेण विद्युद्वता
गन्धेन स्वरता सता रसवता प्राणेन चित्त्योद्यता ॥
गानेन स्वरसद्रसेन वहता सप्तस्वरैरीरिता
गान्धर्वी स्वगुणाभिधानविहिता वाक् सप्तधीधारिता ॥३२॥

॥ इति षड्विंशी कला सम्पूर्णा ॥

गौरियं स्वरेफतस्तुरीयसुस्वरेण गौ-
रीति रुद्रियाऽत्ररोरवीति वाक् स्वर्यते ॥
गन्धमर्वतीति सुस्वरेण सा प्रगीयते
गन्धनाय दैवरातवाक्सुधा प्रपीयते ॥२६॥

## ॥ सप्तविंशी कला ॥

### ॥ गभीरा – सप्तम (७) वाङ्नाम ॥

८३३ गाम्भीर्यात् परमा गुणानुवचनाद् वाग् वै "गभीरा" स्वतः
गम्याऽगाधगुणाऽभ्युदेति गगने सा सप्तमी नामतः ॥
गातुं प्रत्यधिगन्तुमेव गहना सर्वैर्गम्याऽर्थतः
गण्या सद्गुणतोऽखिलैर्गुणगणैः सर्वाग्रगण्यार्थतः ॥ १ ॥

८३४ साक्षाद् ब्रह्म हि वेदवाक् प्रतिचिता सर्वज्ञकल्पायते
साक्ष्यात्माऽखिलशक्तिभाक् समचिता योगेन लेलायते ॥
शक्त्या शान्तिगभीरयाऽऽत्मकलया तत्सञ्ज्ञया गीयते
शक्ताऽऽत्मेन्द्रचिता समस्तविजयात् सा वाग् गभीरायते ॥२॥

### ॥ ऋङ्मन्त्रः ॥

शतं ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ॥
बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥

### ॥ पदपाठः ॥

(ऋ० म० १।२४।९)

शतम् । ते । राजन् । भिषजः । सहस्रम् ।
उर्वी । गभीरा । सुऽमतिः । ते । अस्तु ॥
बाधस्व । दूरे । निःऽऋतिम् । पराचैः ।
कृतम् । चित् । एनः । प्र । मुमुग्धि । अस्मत् ॥

८३५ राज्ञो वै वरुणस्य तस्य भिषजो योर्वी गभीरा सती
राज्ञी सा सुमतिः सदैव विदुषां वागस्तु साऽभीप्सती ॥

राजन्तां शतशः सहस्रबाहुभी वाचो गभीराः समाः
बाधन्तां दुरितं दुरिष्टमभितो दुःखं च दूरे समम् ॥३॥

## ॥ ऋङ्मन्त्रः ॥

यस्यानूना गभीरा मदा उरवस्तरुत्राः ॥
हर्षुमन्तः शूरसातौ ॥

## ॥ पदपाठः ॥

(ऋ० मं० ८ । ३६ । ४)

यस्य । अनूनाः । गभीराः । मदाः । उरवः । तरुत्राः ॥
हर्षु ऽ मन्तः । शूरऽसातौ ॥

८३६ यस्येन्द्रस्य बलेन वाग् विजयतेऽनूना गभीरा परा
यस्मिन् विश्वविभूतिशक्तिचितिभिः पूर्णाऽक्षरा सा स्वरा ॥
वाचा यस्य गभीरया स्वरसया ते हर्षवन्तो मदाः
येषामान्तर इन्द्र एव हि सखा तेषां जयः सर्वदा ॥४॥

८३७ आदित्या बहवो भवन्ति महसोऽपारा गभीराः समाः
दिव्यात्माततत्तेजसाऽसुकिरणै गत्वा गभीरोत्तमाः ॥
दिव्याद्भिश्च सरस्वतीभिरुदिताः सूक्ष्मानुनादोत्तराः
आदित्येन सरस्वतीसमन्विता वाचो गभीराः स्वराः ॥५॥

८३८ पश्यन्त्यन्तरिमे समे दिविषदः सर्वान्तराक्षिस्थिताः
प्रत्यञ्चीह गभीरया समदृशा सर्वात्मभावोत्थिताः ॥
प्रत्यक्षेऽनुवदन्ति सत्यवचसा दृष्टं श्रुतं संविदा
प्राणात्मन्युपसङ्गताऽधिनिहिता सा वाग् गभीरा सदा ॥६॥

८३९ नियोगेन गभीरयाऽऽत्मपरया सम्मोदचिन्मुद्रया
हृद्योगादनुभावविभ्रमपुषा भर्गाश्रया भद्रया ॥
संसक्ताऽऽत्मनि संविदा विजयते सक्त्याऽऽत्मतेजोऽग्रया
सत्यात्मा परमात्मना विरमते सा वाग् गभीरोक्तया ॥७॥

८४० सर्वस्मादपि चोत्तरः स्वयमनुस्वारो गभीरः परः
सर्वज्ञानकलासुसत्त्वनिकरः पूर्णः स बिन्दुः स्वरः ॥
साऽनुस्वारमयी स्वरा कृतिमयी वाग् गीयतां चिन्मयी
सर्वात्मन्युपसङ्गताऽधिनिहिता सा वाग् गभीरा त्रयी ॥८॥

॥ गम्भीरा - अष्टमम् (८) वाङ्नाम ॥

८४१ "गम्भीरा"ऽम्बुधिवत् समा समरसा वागष्टमी नामगा
गूढार्थाऽपरबुद्धिबोधगहना लक्ष्यार्थसत्तोक्तगा ॥
गम्या साऽऽत्मरसस्वरानुगमना वाक् संविदाऽऽत्मार्थिनाऽ
गम्या गुप्ततराऽऽन्तरा निधिरिव स्याद् बाह्यवाग्वादिनाम् ॥९॥

॥ ऋङ्मन्त्रः ॥

( ऋ० सं० २।४५।३ )

गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गा इव ॥
प्रसुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥

## पदपाठ

गम्भीरान् । उदधीन्ऽइव । क्रतुम् । पुष्यसि । गाःऽइव ॥
प्रसुऽगोपाः । यवसम् । धेनवः । यथा । ह्रदम् । कुल्याःऽइव । आशत ॥

८४२ गम्भीरार्थमहोऽर्णवस्वररसा धेनुस्वरूपा यथा
गम्भीरानुदधीनिव स्वमहसा वाचश्च ता गा इव ॥
गुप्तागम्यगुणार्थका: क्रतुमयीस्ता: संविद: पोषका:
गोप्ता विश्वहितैषक: स भगवान् इन्द्र: स्वयं पुष्यति ॥१०॥

८४३ गम्भीराऽऽत्मसुधी: सुधारसनिधि र्ज्ञानादिरत्नाकरा
गम्भीराम्बुधिवत् समग्रवसुधा वाक् सर्वविद्याकरा ॥
गम्भीरस्वर - दिव्यनादरसया प्राणाप्तयाऽपारया
गाम्भीर्यार्थसुभद्रयोर्जति धिया प्राज्ञात्मचिन्मुद्रया ॥११॥

८४४ या गम्भीरतरोर्जितोर्मिकल्या प्रज्ञातरङ्गाप्तया
या गाम्भीर्यसुयोगशक्तिपरया प्रज्ञानसत्त्वोच्चया ॥
गम्भीरे चितितारसुस्वरमुखा वाग् वेदविद् ब्राह्मणी
गम्भीरा परमे पदे विरमते पूर्णे परे ब्रह्मणि ॥१२॥

८४५ गम्भीरेण चितिस्वरेण नियतो गान्धर्वविद्यारत:
गम्भीरो हृदये स्थितो रसनया प्राणादनुस्वारत: ॥
गाम्भीर्येण समास्वरन् समधिया गायत्यजस्राक्षरा
गम्भीराऽऽत्मनि हृत्पदे च परमे व्योम्न्यन्तरे वाक् परा ॥१३॥

८४६ गान्धर्वी स्वरगायनैकरसिका नादानुसन्धानत:
गायन्ती परवस्तुसद्गुणगणान् वीणादिसन्तानत: ॥
गम्भीरं प्रतिवादयत्यनुगुणं तां वज्रवीणां निजां
गम्भीरा परिसङ्ख्यया विजयते वाग् वैद्युतेन्द्रात्मजा ॥१४॥

८४७ गम्भीरेण गुणस्वरेण गुरुणा गान्धर्वसद्गायने
गाम्भीर्यात् तदनुस्वरं स्वनुसरन् वीणादिसद्वादने ॥
वीणायाश्च गुणस्वरानुकरणाद् गायन् परं वन्द्यते
वाण्याऽन्तर्हृदये रतत्रिकरणाद् गम्भीरता गम्यते ॥१५॥

८४८ गाम्भीर्यं तदिदं परं स्वरमयं वागात्मनोगौरवं
गम्भीरोदधिवद् रसै विलसति स्वान्तः प्रलीनोऽन्वहम् ॥
गम्भीरः सकलैर्निजैर्गुणगणैरात्मा स्वयं राजते
"गम्भीरा" परवाक् स्वमेव पुरुषं वृत्वा प्रति भ्राजते ॥१६॥

॥ मन्द्रा - नवमं (९) वाङ् नाम ॥

८४९ "मन्द्रा" व्योमनि मन्दते स्वमरुता विद्युन्मनः सत्त्वका
मेघादिध्वनिवत् समस्तमदकृद् गम्भीरनादात्मिका ॥
मर्त्यानां मुखगा स्तुतिर्दिविषदां सर्वप्रहर्षप्रदा
मान्या सौम्यमनोमुखेन नवमी वाङ्नाम्नि मेयार्थदा ॥१७॥

८५० मन्द्रोऽग्निर्निजसोमरस्यमनसा योगेन हर्षप्रदः
मन्द्राग्नेयचितिप्रदीप्तमहसा सन् पावकः पाकदः ॥
मन्द्रः सन् मृदुभिः स्वरैः सुमधुरैः प्रातः प्रसादार्थदा
मन्द्रा वाक् परमन्त्रवेदवदनै हृच्छान्ति - शक्तिप्रदा ॥१८॥

॥ अग्निः मधुमन्द्रवाग्वदनः ॥

॥ ऋङ्मन्त्रः ॥

( ऋ० मं० ४ । ६ । ५ )

परि त्मना मितद्रुरेति होता अग्निर्मन्द्रो मधुवचा ऋतावा ॥

॥ पदपाठः ॥

परि । त्मना । मितऽद्रुः । एति । होता ।
अग्निः । मन्द्रः । मधुऽवचा । ऋतऽवा ॥

८५१ सोऽग्निः सन् मधुना स्वेन मनसा रसेन मन्द्रस्वनः
सौम्येनामृतसत्त्वकेन मनसा योगेन सत्यात्मनः ॥
सन्मन्द्रो मननादुदेति ऋतवान् वैश्वानरेणात्मना
स्यान्मन्द्राऽऽत्मनि चिद्रसा सुवचना वागग्निजिह्वास्वना ॥१९॥

॥ इन्द्रात्मनः कृते – मद्रायाः वाचः प्रादुर्भावः ॥

## ॥ ऋङ्मन्त्रः ॥

(ऋ० म० ८।९५।५)

इन्द्र यस्ते नवीयसीं गिरं मन्द्रामजीजनत् ॥
चिकित्विन् मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥

## ॥ पदपाठः ॥

इन्द्र । यः । ते । नवीयसीम् गिरम् । मद्राम् । अजीजनत् ॥
चिकित्विन् । मनसम् । धियम् । प्रत्नाम् । ऋतस्य । पीप्युषीम् ॥

८५२ इन्द्रस्यैव कृते जगज्जनिकृते तद्विश्वभूतेः कृते
मन्द्रेन्दोर्मनसो रसान्मदकृते स्वानन्दसंवित्कृते ॥
मन्द्रा साऽग्निरवीन्दुभिर्जिनियना ज्योतीरसात्मानना
जज्ञे वाक् स्वरमन्त्रवेदवदना ब्रह्मात्मसत्त्वायना ॥२०॥

॥ आदित्यस्य मन्द्रा वाक् ॥

इदं कवेरादित्यस्य० अभियो मन्द्रो०

८५३ आदित्यस्य कवेरिदं सुवचनं मन्द्रं स्वराजः परं
दिव्यात्मेन्दुरसात्मसत्त्वसवनं मन्त्रात्मकं सस्वरम् ॥
मन्द्रानुस्वरहृच्चिताऽनुसवनं तत्पूर्णबिन्दुस्वरा
साऽनुस्वारपराऽभ्युदेति मननं मन्द्रात्मिका वाक् परा ॥२१॥

॥ सोमी मन्द्रा वाक् ॥

॥ ऋङ्मन्त्रः ॥

(ऋ॰ मं॰ ८।३४।२)

आ वा ग्रावा वदन्निह सोमी घोषेण यच्छतु ॥

॥ पदपाठः ॥

आ । वा । ग्रावा । वदन् । इह । सोमी । घोषेण । यच्छतु ॥

८५४ सोमो मन्द्रमनोरसेन पवते इन्मद्रया धारया
सोमी मन्द्रतरा स्वरस्सुपचिता वाङ् मानसाऽऽधारया ॥
सौम्यो मन्द्रतरः स्वरः सुमनसा वाचाऽनुशस्यो धिया
मन्द्रां तां स्वरवर्णरस्यमधुरां शंसेदनुस्वारया ॥२२॥

॥ दैवी शक्तिप्रदा मन्द्रा वाग् धेनुः ॥

॥ बल प्राणसञ्जीवनाविरसायना ॥

॥ ऋङ्मन्त्रः ॥

यद् वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ॥
चतस्र ऊर्जं दुदुहे पयांसि कस्विदस्याः परमं जगाम ॥

(ऋ॰ मं॰ ८।१००।१०)

॥ पदपाठः ॥

यत् । वाक् । वदन्ती । अविऽचेतनानि ॥
राष्ट्री । देवानाम् । नि । ससाद । मन्द्रा ॥
चतस्रः । ऊर्जम् । दुदुहे । पयांसि ।
कस्वित् । अस्याः । परमम् । जगाम ॥

८५५ देवी शक्तिरचेतनानि सहसा मद् वाग् वदन्तीशिनी
देवानां निषसाद मन्द्रमहसा राष्ट्री सती स्वामिनी ॥
मद्रामूर्जमसुप्रदां सुबलदां शक्तिं दधाना सदा
मन्द्राऽऽनन्दसुधा प्रहर्षरसदा स्यात् सत्त्वदाग्ध्री विदा ॥२३॥

॥ ऋङ्मन्त्रः ॥

देवीं वाचमजनयन्त देवाः तां विश्वरूपाः पशवो वदन्ति ॥
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥
(ऋ० मं० ८ । १०० । ११)

॥ पदपाठः ॥

देवीम् । वाचम् । अजनयन्त । देवाः
ताम् । विश्वऽरूपाः । पशवः । वदन्ति ॥
सा । नः । मन्द्रा । इषम् । ऊर्जम् । दुहाना ।
धेनुः । वाक् । अस्मान् । उप । सुऽस्तुता । एतु ॥

८५६ देवीं वाचमजां निजामजनयन् देवा विदोऽयोनिजाः
दिव्यां तेऽनुवदन्ति सर्वपशवस्तां विश्वरूपाः प्रजाः ॥
वाच्येन्द्रात्मनि हर्षदा हृदि भवेदस्माकयन्तर्हिता
वाङ् मन्द्रा भुवि धेनुरात्मरसदा साऽऽस्मानुपैतु स्तुता ॥२४॥

॥ मन्द्राजनी - दशमं (१०) वाङ्नाम ॥

८५७ "मन्द्रा"ऽऽत्मस्वरगाऽजनीह दशमी "मन्द्राजनी" नामतः
सेन्द्रा मन्द्रपदा परात्मनि यमी हृद्-व्योम-दिग् धामतः ॥
मूलेऽन्तर्हृदये च मूर्ध्नि परमे साऽनाहता वाक् परा
सोमेनाऽऽत्मरसात्मना विरमते पूर्णामृतात्माक्षरा ॥२५॥

## ॥ ऋङ्मन्त्रः ॥

उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ॥
पवमानः सन्तनिः प्रघ्नतामिव मधुमान् द्रप्सः परिवारमर्षति ॥

(ऋ० मं० ९।६९।२)

## ॥ पदपाठः ॥

उपो इति। मतिः। पृच्यते। सिच्यते। मधु।
मन्द्राजनी। चोदते। अन्तरिति। आसनि ॥
पवमानः। सन्तनिः। प्रघ्नताम्ऽइव।
मधुऽमान्। द्रप्सः। परिऽवारम्। अर्षति ॥

८५८ ऐन्द्री स्यादमृताऽजनेरजनना संविन्मनश्चित्स्वना
मन्द्रा वागजनी प्रहर्षजननी मन्द्राजनी गीयते ॥
सेन्द्रात्मन्युप पृच्यते मधु मतिः प्राणाद् रसैः सिच्यते
साऽस्येऽन्तः सुवचः स्वराद् रसनया वाक् चोदयन्त्युच्यते ॥२६॥

८५९ इन्द्रः सन्नजनो ह्यजन्ममरणश्छन्दोरसोद्धर्षणः
मन्द्रः सन् निजधीन्द्रियाधिकरणः स्यात् संविदाकर्षणः ॥
मन्द्रात्मेन्द्रतनूरनादिनिधना छन्दस्वती वाक्स्वना
मन्द्रा वागजनीन्द्रमन्त्रवदना मन्द्राजनीन्द्रात्मना ॥२७॥

८६० या मन्द्रस्य कवेः परस्य विदुषो दिव्यस्य कन्हेश्रिताऽऽ-
नन्दात्मा वचनस्य तस्य मधुनः संविद्रसस्योचिता ॥

तस्यैवाजनमर्थतोऽनुगमनं तज्ज्ञानचित्सञ्चिता
मन्द्रा सङ्गमनी सतां वसुमतां मन्द्राजनी वाक् चिता ॥२८॥

८६१ मन्द्रं मन् मननं तदर्थमनने ज्ञानं च राति स्वयं
मानं सद् वचनं हि वस्त्ववगमे मन्द्रात् परार्थान्वयात् ॥
मानात् स्वार्थ - परार्थसत्त्वगमनी मन्द्राजनी संविदा
मन्द्रा वाङ् मनसेरिताऽऽत्मनि सदा सर्वार्थबोधप्रदा ॥२९॥

॥ अध्यात्मम् ॥

८६२ मन्द्रात्मेन्द्र इहाखिलेन्द्रियपतिर्बुध्याऽर्थमेत्यात्मना
युङ्क्ते स्वार्थविवक्षया निजमनस्तेनाहतोऽस्मिंस्तनौ ॥
सोऽन्तः प्रेरयतीह मारुतमसुं वाचः समुच्चारणे
मन्द्रं स्वं स्वरमान्तरं जनयति प्राणो हृदन्तश्चरन् ॥३०॥

८६३ सोदीर्णो हृदयाच्च मूर्ध्न्यभिहतो भूयोऽवतीर्णो मुखं
वर्णान् तस्ञ्जनयत्यसू रसनया तत् पञ्चधाऽर्थोन्मुखम् ॥
प्राणैर्मन्द्रगुणस्वरानुगमनाद् वाक् सैव मन्द्राजनी
साऽस्येऽन्तः प्रतिचेतते स्वरमिमं सञ्चेतयत्युन्मनी ॥३१॥

८६४ स्वःस्थां वाचमिहात्मना परतरां मन्द्रां स्वरामुच्चरन्
स्वान्तर्यां हृदि मानसां परधियं प्रज्ञामृतस्यात्मनः ॥
जानन् इन्द्र ! तवेन्द्रियात्मकलिकां मन्द्रात्मिकामक्षरां
ज्ञेयां मन्त्रमयीं स्मरन् विरमते मन्द्राजनीं स्वस्वराम् ॥३२॥

॥ इति सप्तविंशी कला सम्पूर्णा ॥

इन्द्रलिङ्गवृत्तयाऽऽत्मचित्तरङ्गया दया-
सान्द्रयाऽन्तरङ्गयाऽऽप्तया गभीरयाऽऽद्यया ।
वेदचन्द्रिकार्द्र्या सुमन्द्रया समाख्यया
दैवरातवाक्सुधा प्रपीयतां सुजिह्वया ॥२७॥

## ॥ अष्टविंशी कला ॥

### ॥ वाशी - एकादशम् (११) वाङ्नाम ॥

८६५ "वाशी" व्योमनि वाशति स्वरवती शब्दायते स्वार्चिषा
वाच्या स्वात्मनि वाश्यते स्वरचिता कान्त्याऽश्यते ज्योतिषा ॥
सा वाङ्नामसु संशिता हिमवती सैकादशी वाशिका
साम्यात् सौम्यमुखा सिता रसवती काम्या कला काशिका ॥१॥

### ॥ ऋङ्मन्त्रः ॥

प्र वो मरुतस्त्विषा उदन्येवा वयोवृधो अश्वयुजः परिज्रयः ॥
सं विद्युता दधति वाशति त्रितः स्वरन्त्यापोऽवना परिज्रयः ॥

(ऋ० मं० ५।५४।२)

### ॥ पदपाठः ॥

प्र । वः । मरुतः । त्विषा । उदन्यवः ।
वयःऽवृधः । अश्वऽयुजः । परिऽज्रयः
सम् । विऽद्युता । दधति । वाशति । त्रितः
स्वरन्ति । आपः । अवना । परिऽज्रयः ॥

८६६ आप्योऽप्सत्त्वमहोमुखस्त्रिभुवने तेजोजलान्नैर्वृतः
व्याप्तोऽग्निः सह विद्युता समुदगादाप्त्यस्त्रितो नामतः ॥
वाचा वाशति सस्वरेण महसा शब्दायमानो द्युता
वाशी वागसुसुस्वरा सुवचना प्राणात्मचित्त्युद्यता ॥२॥

८६७ यज्ञार्थे यजमानरक्षणकृते सोमस्य पानार्थके
यज्ञात्मेन्द्रमनःप्रसादनकृते स्वानन्दपूर्णार्थके ॥
सेन्द्रो विश्वमिदं मिमाति मनसा प्राचीह वाशी यथा
सेन्द्राणी स्वचिदात्मना विरमते वाग् विश्वमाता तथा ॥३॥

८६८ वाशी स्वावगतात्मवस्तुवचना शद्धायमाना चिता
वाग् वज्रात्मकशक्तिचित्तिवदना सल्लक्ष्यवेधोद्यता ॥
इन्द्रस्येन्द्रियसत्त्वकस्य मरुतः प्राणात्मनः सन्दृशः
सैन्द्रीन्धात्मनि वामशक्तिसुदृशा वाशी विराट् सन्दृशा ॥४॥

ये अञ्जिषु ये वाशीषु स्वभानवः

( ऋ० मं० ५।५३।४ )

८६९ ये वाशीभिरुपाचिताभिरभितः सञ्चारिताभिः समाः
ये वाऽऽशीभिरभीप्सिताभिरमिताः सञ्चेतनास्तेऽसमाः ॥
ये वाशीषु सुभानवः स्वमहसा विद्युत्प्रभा मध्यमाः
ये स्वाशासु सदोर्जयन्ति मरुतस्ते वाक्स्वरैरुत्तमाः ॥५॥

वाशीमन्त ऋष्टिमन्तो मनीषिणः

( ऋ० मं० ५।५७।२ )

८७० वाशीमन्त उपस्वरात्मपरया शक्त्या महान्तः समे
वाशन्त्यन्तरभीरवोऽनुचरया वाचा स्वतन्त्राऽसमा ॥
इन्द्रात्माधिकृतोज्जयेन मरुतः सरव्येन चेन्द्रात्मनः
सैन्द्रीशाधिहितात्मचित्स्वररुता वाग् वाशति स्वात्मना ॥६॥

वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः

( ऋ० मं० ८।२९।३ )

८७१ एकः कश्चिदलौकिकः स पुरुषो वाशीं बिभर्त्यान्तरां
वाचं स्वायुधशक्तिकां सुफलां विद्युन्मयीमायसीम् ॥
सेन्द्रो वैद्युतदिव्यचिन्निशितया वाश्याऽऽत्ममन्त्राख्यया
विश्वस्यावरकं जघान चतुरं वृत्रं स्ववज्राख्यया ॥७॥

८७२ वाशीमन्तमिहाग्निमग्रियममुं दिव्यं हविर्यज्ञनीं
वाचैवाखिलयज्ञसाधकतमं यज्ञः समेत्याग्रणीम् ॥
योगक्षेमकृते नृणां त्रिजगतां सोऽग्निः समिद्धः सदा
योगायैव परात्मना प्रभवति ब्रह्मात्मवाशी विदा ॥८॥

## ॥ वाणी - द्वादशम् ( १२ ) वाङ्नाम ॥

८७३ "वाणी" साऽऽत्मनि वण्यते सुवचना वाङ्नामसु द्वादशी
वाच्यार्थं निजशक्तितो वणयति प्राग् वर्णयन्तीदृशी ॥
वाणिः सद्रसदोऽम्बुदः स्वरसदा दूती परा भ्राजते
वाण्येवात्मनि राजते स पुरुषो वाण्यैव सम्राजते ॥९॥

८७४ वाणी वाचकसुस्वरानुकरिणी नाम्ना तदुच्चारिणी
वाच्यार्थात्मक वस्तुनाऽनुसरिणी तद्रूपसञ्चारिणी ॥
विद्या वेदवचःसुधावितरिणी सर्वस्वसन्तारिणी
वेद्या वेदमुखेन सर्वकरणैर्वाक् संविदाकारिणी ॥१०॥

८७५ वाणी ब्रह्मसतीह वेदनिचिता सेन्द्राग्निवक्त्राञ्चिता
राणी ब्रह्मणि राजते सुरचिता सौम्या मनःसञ्चिता ॥
वाणीष्वन्तरुपार्थिवोऽधिनिहितः सोमो मनःसत्त्वकः
वाच्या सा ऋत - सत्ययोगरचिता सर्वात्मचित्सत्त्वका ॥११॥

८७६ वाणी स्वानुगुणेन दिव्यमणिना विज्ञानमातन्वती
वीणापणिरियं निजेन घृणिना प्रज्ञानदाऽऽत्मन्वती ॥
सत्यं ब्रह्म परोक्षमेव परमं सन्निर्गुणं निष्कलं
सत्त्वान्मौनमुखान्निनादकरणात् प्रत्यञ्चि गायत्यलम् ॥१२॥

॥ वाणीची - त्रयोदशम् ( १३ ) वाङ्नाम ॥

८७७ "वाणीची" प्रतिवाक्परा रसपरा स्वात्मानमेवाश्नुती
वाणीं चित्तिमनूत्तरा स्वरपरा वाच्यार्थमञ्चत्यसौ ॥
वाङ्नाम्नि प्रथिता त्रयोदशतमा प्रत्यक्षगाऽऽत्माचिता
वाङ् नाम्ना प्रति सञ्चिनोति सकलं स्वान्तः प्रतीच्याचिता ॥१३॥

## ॥ ऋङ्मन्त्रः ॥

सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता ॥
( ऋ० मं० १० । १२३ । ७ )

## ॥ पदपाठः ॥

सुऽस्तुभः । वाम् । वृषण्ऽवसू इति । रथे । वाणीची । आऽहिता ॥

८७८ वाणी प्राग् दिवि विश्वतः समुदगादिन्द्राग्निचित्त्योहिता
वाणीची स्वचिताऽश्विनोर्दिविषदोर्ज्योतीरथेऽध्याहिता ॥
प्राङ्मुख्यात् प्रगतेः पथा सुनियता प्राणात्मचित्त्यूर्जिता
प्रामुख्यात् सुनिवृत्ति - संस्थितिरता प्रत्यक्चिदात्मार्जिता ॥१४॥

८७९ वाणी सा द्वितयी द्विपात् द्विकरणा स्याद् वाङ्मनः स्वर्चिनी
वर्ण्ये मन्त्रमुखात् प्रथक्प्रकिरणे यज्ञस्य ते वर्तनी ॥
वर्तन्योर्ऋत - सत्ययोर्मतवतोर्योगेन दिव्याश्विनोः
वाणीच्यौ रथचक्रयोः समहिते ज्योतीरसैकात्मनोः ॥१५॥

८८० सा वाणी त्रियमी त्रिपात् त्रिकरणैः स्याद् वाङ्मनः प्राणनीः
सावर्णे ऋतुथा त्रिचक्रविधृते विद्युद्रथे साऽश्विनोः ॥
वाणीच्योऽत्र सुचेतने तनुरथे प्रत्यग्गतिप्रत्ययाः
ज्ञानेच्छाकृतिशक्तिचित्प्रकृतयो वाचस्त्रयीप्रोच्चयाः ॥१६॥

८८१ वाणी सैव चतुष्पदी सुविहिता सेन्द्राग्निवक्त्रोदिता
ब्रह्माणी परदिव्यसत्त्वमुदिता सा वेदवक्त्रोर्जिता ॥
विद्याप्ता विविधाः प्रबोधनिरताः प्राचीः प्रतीचीः स्तुताः
वाणीचीहृदयेऽग्निरीरयति ताः स्वज्योतिरग्राः श्रुताः ॥१७॥

८८२ एकान्ताप्तचिदेकरस्यनदिता सङ्ख्यादिपङ्क्तिक्रमाद्
एकाद्या च दशान्तगा समुदिता सङ्ख्यान्ततत्त्वोत्क्रमात् ॥
वाणी विश्वविभूतिभाक् सुविदिता ब्रह्मात्मतेजोनिभा
वाणीची परमार्थसत्त्वमुदिता वाग् विश्वरूपा बभौ ॥१८॥

॥ वाणाः चतुर्दशम् ( १४ ) वाङ्नाम ॥

८८३ "वाणो" व्योमनि वण्यते परचिता वर्णाद्यनुस्वारतः
वाच्यार्थं वणति स्वयं स्वरचिता स्वं वर्णयत्यर्थतः ॥
वाण्या वाणयति प्रसादवचनात् प्राणोऽयमिन्द्राननाद्
वाङ्नाम्नीह चतुर्दशी सुवचना वीणाप्रवीणानना ॥१९॥

॥ ऋङ्मन्त्रः ॥

गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये ॥
गोबन्धवः सुजातास इषे भुजे महान्तो नस्परसे नु ॥

(ऋ० मं ८। २०। ८)

## ॥ पद पाठः ॥

गोभिः । वाणः । अज्यते । सोभरीणाम् । रथे । कोशे । हिरण्यये ॥

गोऽबन्धवः । सुऽजातासः । इषे । भुजे । महान्तं । नः । परसे । नु ॥

८८४ गोभीरश्मिभिरुर्जितोऽसुरवणो वाणोऽर्चिषामिज्यते
गीर्भिर्व्योम्नि हिरण्ययेऽप्रतिरथे संविच्चितां सत्पथे ॥
गीर्णं वाचकनामनादकरणे चित्सोभरीणां रथे
गोनाम्नाऽऽत्मधियां परात्मकरणः शब्दायते सर्वथा ॥२०॥

## ॥ ऋङ्मन्त्रः ॥

ऊर्ध्वं नुनुद्रे वतं त ओजसा दादृहाणं चिद् बिभिदुर्विपर्वतम् ॥
धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥

## ॥ पदपाठः ॥

ऊर्ध्वम् । नुनुद्रे । अवतं । ते । ओजसा । दादृहाणम् । चित् । बिभिदुः । विऽपर्वतम् ॥
धमन्तः । वाणम् । मरुतः । सुऽदानवः । मदे । सोमस्य । । रण्यानि । चक्रिरे ॥

८८५ ऊर्ध्वं व्योमनि दिव्यचित्स्वरणतः प्राणात्मचिज्ज्योतिषा
सार्धं व्योमगुणस्वरेण मरुतो वाणं धमन्तोऽर्चिषा ॥
मेघाद् वैद्युतचिन्मुखादशनितः सद्गर्जनाद् वर्षणात्
प्राणान् प्राणभृतः सृजन् विजयते वाणः स वाक्चित्स्वनः ॥२१॥

८८६ ऊर्ध्वं प्राणभृतां परे तनुपदे सर्वेन्द्रियैकास्पदे
मूर्धन्यन्तरनाहते स्वनिनिदे चित्संविदां सत्पदे ॥
सिद्धः संवननोऽन्तरेऽनिलयने वाणः स सौम्यायनः
तद्वाणस्य हि सप्तधातुरपदं स्यात् सप्तनामात्मनः ॥२२॥

८८७ शीर्षण्यः परमः परात्मनिनदो मूर्ध्नोऽवतीर्णो मुखे
शीर्षण्येन रसेन सद्रसनया सन् सप्तधा वाङ्मुखे ॥
वाच्यार्थेन् सहात्मनः प्रवहति प्राणात्मसत्त्वसरः
वाणोऽयं हृदि सप्तधीन्द्रियपरः संवित्सुधावाग्रसः ॥२३॥

८८८ वीणावादननादसप्तकपदा वाणी ऋषीणां विदः
प्राणानामपि सप्तकानुसरणात् सप्तस्वरान् त्सद्विदः ॥
प्राणैस्तैः सह सप्तभिः स्वरगुणैः सन् त्सप्तधातुर्जनः
वाणः प्राणमुखादनुस्वरणतः स्यात् सप्तधा सुस्वनः ॥२४॥

॥ पविः – पञ्चदशम ( १५ ) वाङ्नाम ॥

८८९ वज्रास्येन "पविः" पुनाति सकलं वाग् ज्योतिषा वैद्युती
वायोः सा पवतेऽन्तरिक्षसदने सा पावमानी सती ॥
वाच्या पञ्चदशी स्वनाम्निपविभृत् सा वज्रचिद्योगिनी
वाचा पावयति स्वयं पविमुखा सेन्द्रात्महृद्योगिनी ॥२५॥

८९० चिद्योगात् पवते पवित्रकिरणैर्यो ज्योतिरग्रः पविः
तद्योगात् पवनेन च त्रिकरणैर्दिव्यः प्रदीप्तो रविः ॥
सद्योगात् समनुस्वरन् त्सुमनसा प्राणेन वाचा कविः
हृद्योगात् सकलान्तरे त्रिभुवने सा वाक् स्वसंवित्पविः ॥२६॥

॥ पावीरवी ॥

८९१ तीक्ष्णास्ते शुचयस्त्रयोऽत्र पवयश्चिज्ज्योतिरग्राः शिताः
तिस्रो वाच इतीरिताः सरवयो विद्युन्मुखाः संशिताः ॥
वेदानां मधुवाहने चितिरथे संविद्रसाप्ते स्थिताः
वेद्यास्ताश्च पवीरवन्त्य उदिताः पावीरवी वाक् स्तुता ॥२७॥

८९२ ज्योतिष्मान् त्सरसाभिरद्भिरुदगाद् दिव्यः सरस्वान् रविः
व्योम्नि स्वानुगुणानुरूपकरणा ज्योतिष्मती वाक् पविः ॥
प्रज्ञात्मा स पवीरवान् रसचिता योगेन सा वायवी
प्रज्ञानेन सरस्वती विजयते वागेव पावीरवी ॥२८॥

॥ भारती - षोडशम् ( १६ ) वाङ्नाम ॥

८९३ वाग् दिव्या भुवि "भारती" चितिमती वाङ्नामगा षोडशी
वाच्यं विश्वमधिष्ठिताऽऽत्मकल्या पूर्णा ध्रुवा षोडशी ॥
साक्षाद् ब्रह्म सतीह भारतमलं स्वान् भारतीयाञ्जनान्
शक्त्या रक्षति शान्तिसत्त्वकल्या भासाऽखिलान् भारतान् ॥२९॥

आ भारती भारतीभिः सजोषाः ० ।

(ऋ० म० ३।४।८) (७।२।८)

भारतीळे सरस्वति ० ।

( ऋ० म० १ । १८८ । ८ )

८९४ आप्रीसूक्तगताः पराग्नितनवो यज्ञात्मसत्कीर्तयः
ताः प्रीणन्ति नुता ऋगात्ममनवो वाग्देवतामूर्तयः ॥
तिस्रो देव्य इति श्रुताः सुकृतयः साग्नीन्द्रसूर्योर्जिताः
तासां माध्यमिका सतीन्द्रनिरता वाग् वैद्युती भारती ॥३०॥

॥ मध्यमा सती भारती ॥

॥ ऋङ्मन्त्रः ॥

आग्ना अग्न इहावसे होत्रां यविष्ठ भारतीम् ॥
वरूत्रीं धिषणां वह ॥

( ऋ० मं० )

॥ पद्पाठः ॥

आ । गाः । अग्ने । इह । अवसे । होत्राम् । यविष्ठ । भारतीम् ॥
वरूत्रीम् । धिषणाम् । वह ॥

८९५ अग्ने याहि वषट्कृतिं स्वसदने सद्यो हविः सेवनाद्
आग्नेयीं निजचित्प्रभासुनिरतां तां भारतीमावह ॥
साक्षाद् ब्रह्मपरात्मवेदवदना सेन्द्राग्निचिद्भारतेः
साऽग्नायी प्रभवत्यलं सुकृतिनां सम्भावने भारती ॥३१॥

॥ ऋङ्मन्त्रः ॥

य इमे रोदसी उभे अहमिन्द्रमतुष्टवम् ।
विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् ॥
(ऋ० मं० ३ । ५३ १२)

॥ पदपाठः ॥

यः । इमे । रोदसी इति । उभे इति । अहम् । इन्द्रम् । अतुष्टवम् ॥
विश्वामित्रस्य । रक्षति । ब्रह्म । इदम् । भारतम् । जनम् ॥

८९६ गायत्री परवेदमन्त्रवदना सञ्चोदयित्री सतां
गायन्ती पुरुषं स्वरेण परमं ब्रह्मात्मना चोदिता ॥
विश्वामित्रतपःप्रभासुमुदिता छन्दःस्वरामोदिता
वेदात्मा भुवि भारती समवतात् स्वं भारतं स्वं जनम् ॥३२॥

॥ इति अष्टविंशी कला सम्पूर्णा ॥

---

शब्दशक्तिरात्मचित्तिरत्र वाशतीति वा—
शीति वाणि-वाणनामसत्त्वमाचिनोति वाक् ॥
दैवतेन्द्रविद्युता पविश्च भारतीरिता
दैवरातवाक्सुधारसेन संविदा रता ॥२८॥

## ॥ एकोनत्रिंशी कला ॥

### ॥ "धमनिः" (१७) सप्तदशं वाङ्नाम ॥

८९७ ध्वन्याख्या "धमनिः" स्वरेण धमति स्वर्ज्योतिषा ध्वंस्यते
धाम्ना सप्तदशीह वाक् स्वगुणतो नाम्ना ध्वने र्धम्यते ॥
ध्वन्यास्यादसुनाडिकाऽसुनलिका सा वाग् धमन्यायते
ध्वन्यार्थं निखिलं निजं ध्वनयति प्रत्यक्षतो ध्मायते ॥१॥

८९८ अग्निर्वेदिगतः स वेणुधमनेः फूत्कारतो दीप्यते
तद्वत् प्राणमुखेन वाग् धमनतो वैश्वानरस्तप्यते ॥
स्वान्तःस्थः करणत्रयात्मतपसा स्वात्मैव देदीप्यते
साऽन्तःस्थैव चिदात्मनोऽपि धमनिर्योगेन धागिप्यते ॥२॥

### ॥ ऋङ्मन्त्रः ॥

दूरे पारे वाणीं वर्धयन्त
इन्द्रेषितां धमनिं पप्रथन् नि ॥

(ऋ० मं० २।११।८)

### ॥ पदपाठः ॥

दूरे। पारे। वाणीम्। वर्धयन्तः।
इन्द्रऽइषिताम्। धमनिम् पप्रथन्। नि ॥

८९९ वस्तूनामनुवादहृत्सुमुदितां दूरे च पारे स्थितां
वाणीं वाचकशक्तिकां चिदुदितां तां वर्धयन्तो हिताम् ॥
दिव्यां तां धमनिं चिदात्मनदितां तां वैधुतेन्द्रे षितां
विद्यामप्रथयन् विदाऽऽदिकवयो योगेन नित्योषिताम् ॥३॥

॥ ब्रह्मणस्पतेःविश्वधमनक्रियया वाचः धननित्वम् ॥

॥ ऋङ्मन्त्रः ॥

ब्रह्मणस्पतिरेता सङ्कर्मार इवाधमत् ॥
देवानां पूर्व्ये युगेऽसतः सदजायत ॥

( ऋ० मं० १० । ७२ ।२ )

॥ पदपाठः ॥

ब्रह्मणः । पतिः । एता । सम् । कर्मारःइव । अधमत् ।
देवानाम् । पूर्व्ये । युगे । असतः । सत् । अजायत ॥

९०० प्राक् सृष्टेः पुरुषः स एव परमो वाग्ब्रह्मणः सन् पतिः
वाक् सृष्टेर्जगतो विसृष्टिनियमान्नित्यं तपस्यन् यतिः ॥
निःश्वासादधमत् प्रचेतनमुखात् कर्मारवत् फूत्कृतेः
विःश्वासात् प्रबभूव दिव्यधमनिर्वाग्गेव विश्वोत्कृतेः ॥४॥

९०१ दिव्यात् तद्धमनेश्चिदात्मनिनदाच्छन्दोमयाद् ब्रह्मणः
दिव्यन्तस्तपतोऽत्र वेदवदनाच्छन्दःस्वरैकात्मनः ॥
निःश्वासादिह सस्वरात् समरसात् प्रादुर्बभूवुः समे
वेदास्ते भुविदिव्यमन्त्रवचनाः सिद्धास्त्रयीवाक्समाः ॥५॥

९०२ दिव्या सा धननि ध्वनेश्च जननी ब्रह्मेन्द्रसत्त्वात्मनः
दैवी वाग् धमति स्वयं चिदयनी प्राणैः समुच्छ्वासनात् ॥
वेदात्मा स्वस्वर्णशब्दवचनात् सेन्द्राग्निचित्स्याननाद्
त्रिधाशास्त्रमहःस्वनाद् विजयते विश्वस्य सच्छासनात् ॥६॥

## ॥ अस्मिनेवार्थे ऋङ्मन्त्रान्तरम् ॥

### ॥ ऋङ्मन्त्रः ॥

विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुत विश्वतस्पात् ॥
सं बाहुभ्यां धमति सम्पतत्रै-
र्द्यावाभूमी जनयन् देव एकः ॥

( ऋ० मं० १०।८१।३ )

### ॥ पदपाठः ॥

विश्वतःऽचक्षुः । उत । विश्वतःऽमुखः ।
विश्वतःऽबाहु । उत । विश्वतः ऽपात् ॥
सम् । बाहुऽभ्याम् । धमति । सम् । पतत्रैः ।
द्यावाभूमी इति । जनयन् । देवः । एकः ॥

९०३ यो द्रष्टा दिवि विश्वचक्षुरुदितः सन् विश्वपाच् चिद्गतेः
ज्योतिष्मानिह विश्वतोमुख इति स्याद् विश्वबाहुः कृतेः ॥
यो विश्वं जनयन् पतत्रिकपर्णैरेकः स देवो भवान्
बाहुभ्यां धमतीह सैव धमनिः सम्भूतिभाग् वाग् बभौ ॥७॥

९०४ तत्पूर्णात्मकचेतदाद् धमनतो ब्रह्मात्मनो वाक्पतेः
तत्रानुन्मिषतोऽसतः सुवसतः सत्यात्मनश्चित्पतेः ॥
सञ्जातं सकलं हि सज्जगदिदं तस्माच्च सद्वस्तुतः
सत्या चिद्ध्वनिताऽत्र सैव धमनिः सा वाक् पराशक्तितः ॥८॥

## ॥ "नाळी" (१८) अष्टादशं वाङ्नाम ॥

नलिकेव

९०५ "नाळी" सा नलिकेव सुस्वरमुखा वाङ्नामगाऽष्टादशी
नाल्या सा नलति स्वशब्दमुखतो वाक् पुण्यगन्धात् कृतेः ॥
"नाडी" नाल्यति स्वरा सुवचना सा गन्धयत्यादिशं
नाड्यां सा कुहना क्रिया चितिमुखाद् वाक् सन्दिशत्युद्दिशम् ॥९॥

## ॥ ऋङ्मन्त्रः ॥

इदं यमस्य सादनं देवमानं यदुच्यते ।
इयमस्य धम्यते नाळीरयं गीर्भिः परिष्कृतः ॥
(ऋ० म० १० । १३५ । ७)

## ॥ पदपाठः ॥

इदम् । यमस्य । सदनम् । देवऽमानम् । यत् । उच्यते ॥
इयम् । अस्य । धम्यते । नाळीः । अयम् । गीःऽभिः । परिऽकृतः ॥

९०६ यस्येन्द्रस्य यमस्य दिव्यसदनं तत्सादनं चोच्यते
यस्मिन् व्याप्तमिदं प्रमाप्रपदनं तद्देवमानं श्रुतम् ॥
ध्वन्या व्योमनि धम्यते स्वरचिता वाक् सैव नाळीरिता
दिव्योऽग्निः स परिष्कृतोऽत्र हविषा गीर्भिः स्वरैरीडितः ॥१०॥

९०७ नाडी लोहितवाहिनी तनुतमा सा प्राणसञ्चालिनी
लीनाऽन्तर्मणिबन्धयोगसदना - सूक्ष्मा हृदन्तस्तनी ॥
नाम्ना सूक्ष्मतमाऽसुनादवदना प्राणेन सञ्चेष्टते
साऽऽवृत्त्या परिगण्यतेऽसुगमनाद् वाक् सुस्वनालेष्यते ॥११॥

९०८ या रक्तैः सह तेजसा प्रवहति प्राणैः स्वरैः सद्रसैः
याऽन्तश्चेतनया परात्मकलया योगात् समन्वीयते ॥
नाडीषु प्रतिसन्तताऽन्तरसुना सोष्णेन सञ्चेतते
"नाळी" वाक् स्फुरतीह साऽग्निमहसा वैश्वानरेणाततेे ॥१२॥

९०९ लोकेऽस्मिन्नपि वेणुदण्डनलिकाद्वारेण नादानना
निःश्वासान्निजनासिकानलिकया याऽनुस्वरन्ती स्वना ॥
सानुस्वारगुणानुनादसदना नामानुरूपानना
नाली सूक्ष्मतमाऽऽत्मचिन्निलयना सा वाक् स्वरैकायना ॥१३॥

९१० नाड्यस्ता हृदयस्य सन्ति शतशः सूक्ष्माः शरीरान्तरे
नीडेऽस्मिन् हि सहस्रशः प्रतिहिताः प्रज्ञानतन्तूत्तराः ॥
यावानिन्द्रचिताऽऽन्तरोऽसुमुदितः स्वात्मा चिता मण्डितः
तावत्येव सुचेतनाऽऽत्मकलिता नाडीह वागीडिता ॥१४॥

९११ दिव्या चेतननाडिकाऽसुनलिका व्याप्ता चिदात्माञ्चिता
देहेऽन्तश्च बहिर्दिवि प्रचलिता विद्युत्कलासंवृता ॥
नाम्ना रूपगुणक्रियादिवलिता सा यावती सञ्चिता
नाळी प्राणनिनादसत्त्वकलिता वाक् तावती सम्भृता ॥१६॥

९१२ नानासत्त्वरसप्रवाहगमना प्राणात्मचिद्वाहिनी
नाम्ना नेम - समानसत्त्वनयना साक्षात् प्रमाऽऽवाहिनी ॥
नासाभ्यामनु धम्यते ऽसुरुतया संवित्सुसंवेदिनी
"नाळी" रित्यभि धीयते सुवचसा योगेन वाग्वादिनी ॥१६॥

॥ "मेळिः" (१९) एकोनविंशं वाङ्नाम ॥

९१३ "मेळिः" सङ्गमनी धियां दिविषदां सत्सम्पदां संविदां
मेल्यैः सम्मिलतीह मेलयति तान् सैकोनविंशी पदाम् ॥

संश्लेषात् परसामरस्यकल्या सर्वैः स्वसम्मेलनात्
सद्योगाद् रमते परान् रमयति प्रत्येति वाग्-आत्मना ॥१७॥

९१४ सत्यासत्य - पपापरात्मकचितोः प्रत्यक - पराक्सञ्चिता
सर्वं मेलयति स्वशक्तिकलया वागर्थयोरञ्चिता ॥
सत्या वाचकशब्द[redacted]ता स्वात्मार्थयोगेन वाक्
शक्तिरुचिता सत्त्वैः सम्मिलितेति मेळिरुदिता वाच्यार्थतादात्म्यभाक् ॥१८॥

॥ ऋङ्मन्त्रः ॥

शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्त्वानाम् ॥
मेळिं मदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम् ॥
( ऋ० मं० ५ । ५३ । ४ )

॥ पदपाठः ॥

शतऽधारम् । उत्सम् । अक्षीयमाणम् ।
विपःऽचितम् । पितरम् । वक्त्वानाम् ॥
मेळिम् । मदन्तम् । पित्रोः । उपऽस्थे ।
तम् । रोदसी इति । पिपृतम् । सत्यऽवाचम् ॥

९१६ सर्वाग्रं शतधारमुच्चममृतादक्षीयमाणं सदा
सर्वज्ञं सुविपश्चितं च पितरं वाचां धियां संविदाम ॥
"मेळि" वाचमिमां मदन्तममृतैस्तं सत्यवाचं परं
सद्रस्यैः पिपृतं समस्तपितरौ तं रोदसी स्वान्तरम् ॥१९॥

॥ ऋङ्मन्त्रः ॥

तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः ॥
वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥
( ऋ० मं० ४।७।११ )

## ॥ पदपाठः ॥

तृषु । वत् । अन्नां । तृषुणां । ववक्षं ।
तृषुम् । दूतम् । कृणुते । यव्हः । अग्निः ॥
वातस्य । मेळिम् । सचते । निऽजूर्वन् ।
आशुम् । न । वाजयते । हिन्वे । अर्वा ॥

९१६ अग्निर्यद् वहति प्रपूर्णममृतं भोग्यं सदन्नं तृषा
दूतं तं कुरुते भुवीह तृषितं भोक्तारमाप्तं त्विषा ॥
अन्नं वाजयते निजां प्रकृतिकां वातस्य मेळि धरां
वाचं तां सचते समस्तकृतिकां शक्तिं समर्थाक्षराम् ॥२०॥

## ॥ मेना (२०) विंशं वाङ्नाम ॥

९१७ "मेना" मेयमिदं मिनाति मनसा सा मानयत्यात्मना
मानात्मा सकलं मिमाति नमसा संवित्स्वरैकात्मना ॥
नाम्ना पङ्क्तिगताऽत्र विंशतितमा प्रज्ञानमानात्मिका
नामैकायतना प्रमाणवचना वागेव मेनात्मिका ॥२१॥

## ॥ ऋङ्मन्त्रः ॥

अददा अर्भा महते वचस्यवे कक्षीवते वृचयामिन्द्र सुन्वते ॥
मेनाऽभवो वृषणश्वस्य सुक्रतो विश्वेत् ता ते सवनेषु प्रवाच्या ॥

(ऋ० मं० ८ १।५१।१३)

## ॥ पद् पाठः ॥

अददा । अर्भाम् । महते । वचस्यवे ।
कक्षीवते । वृचयाम् । इन्द्र । सुन्वते ॥
मेना । अभवः । वृषणश्वस्य । सुक्रतो इति सुक्रतो ।
विश्वा । इत् । ता । ते । सवनेषु । प्र ऽ वाच्या ॥

९१८ सन् वाचस्पतिरिन्द्र एव हि वचःकामाय कक्षीवते
सैन्द्रीं शक्तिमदाद् वराय वृचयां सौम्यं मनः सुन्वते ॥
सा "मेना"ऽभवदिन्द्रमाननवरा सेन्द्रात्मना वाक् परा
साम्नाऽन्तः सवनेषु गायनपरा संविद्रसाऽसुस्वरा ॥२२॥

## ॥ ऋङ्मन्त्रः ॥

अधः पश्यस्व मोपरि सन्तरां पादकौ हर ।
मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ ॥

( ऋ० मं० ८ । ३३ । १९ )

## पदपाठ

अधः । पश्यस्व । मा । उपरि । सम्ऽतराम् । पादकौ हर ।
मा । ते । कशऽप्लकौ । दृशन् । स्त्री । हि । ब्रह्मा । बभूविथ ॥

९१९ इन्द्रो विश्वविभूतिपूर्णपुरुषो ब्रह्माण्डसम्राण् महान्
ब्रह्मात्मा परचेतनान्तरतमः पिण्डान्तरस्थो भवान् ॥
स्त्रीसत्त्वोऽभ्युदियाय शक्तिमहसा सर्वेन्द्रियेभ्यः परः
सा "मेना" मतिमानसत्त्वकलिता वाग्देवतात्मा परा ॥२३॥

॥ ऋङ्मन्त्रः ॥

द्विता वि वंव्रे सनजा सनीळे अयास्यः स्तवमानोभिरर्कैः ॥
भगो न मेने परमे व्योमन् अधारयद् रोदसी सुदंसाः ॥

( ऋ० मं० १० । १२३ । ७ )

॥ पदपाठः ॥

द्विता । वि । वव्रे । सनऽजा । सऽनीळे ।
अयास्यं । स्तवमानेभिः । अर्कैः ॥
भगः । न । मेने । परमे । विऽओमन् ।
अधारयत् । रोदसी इति रोदसी । सुऽदंसाः ॥

९२० "मेने" ते सहजे द्विते च सयुजौ वाचौ सनीडे समे
मान्ये ते स्वयमिन्द्र एव परमे व्योम्न्यन्तरे सन्दधे ॥
भास्वानिन्द्र इवैव दिव्यमहसा ते रोदसी स्वार्चिषा
भासाऽन्तः प्रतिसन्दधार तपसा विश्वात्मिके स्वाशिषा ॥२४॥

॥ ऋङ्मन्त्रः ।

उभे भद्रे जोषयेते न मेने गावो न वाश्रा उपतस्थुरेवैः ॥
स दक्षाणां दक्षपति र्बभवा- ञ्जन्ति यं दक्षिणतो हविर्भिः ॥

( ऋ० मं० १ । ९५ । ६ )

॥ पदपाठः ॥

उभे इति । भद्रे इति । जोषयेते इति । न । मेने इति ।
गावः । न । वाश्रा । उप । तस्थुः । एवैः ॥
सः । दक्षाणाम् । दक्षऽपतिः । बभूव ।
अञ्जन्ति । यं । दक्षिणतः । हविःभिः ॥

९२१ भद्रे रुद्रपदे उभे चितिपरे ते जोषयेते स्वके
"मेने" भर्गरसोदिते. स्वरपदे तेजःपरे वाचके ॥
ते अग्नीन्द्रचिदूर्जिते विलसतो गायत्रसुत्रैष्टुभे
वाक्प्राणात्मकलान्विते प्रभवतश्छन्दःसुसत्त्वप्रभे ॥२५॥

९२२ "मेना" पञ्चमरागरस्यनयना मञ्जुस्वरैकायना
मूलाधारपदादुदीर्णनदना सौम्यानुनादानना ॥
मेनावाग् भुवि कोकिलामधुरवा मन्द्रस्वराद् गायनात्
मान्या शान्तिसुधावसन्तवदना साऽन्वेति कालायनात् ॥२६॥

॥ सूर्या (२१) एकविंशं वाङ्नाम ॥

९२३ "सूर्या" वागुषसः स्वरात्मकिरणैर्ज्योतीरसैः संहिता
सूते विश्वमिदं स्वशक्तिकरणैर्विद्युन्महोऽभ्याहिता ॥
सूर्यस्यैव सती दिवि प्रसरति प्रज्ञानसम्पन्मता
स्वर्या सूर्यचितिं मते रनुगता वागेकविंशी नुता ॥२७॥

॥ ऋङ्मन्त्रः ॥

सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥

(ऋ॰ मं॰ १०। ८५। १७)

॥ पदपाठः ॥

सूर्यायै । देवेभ्यः । मित्राय । वरुणाय । च ।
ये । भूतस्य । प्रऽचेतसः । इदम् । तेभ्यः । अकरम् । नमः ॥

९२४ "सूर्यायै" परमात्मचित्प्रकृतये दास्यामि सौम्यं मनः
स्वर्यायै सवितृप्रसूतिकृतये सत्यात्मिकायै नमः ॥
सूर्यात्मेह सरस्वती स्वरमयी कुर्यात् स्वके मे मनः
सावित्री परसोमसद्रसमयी वाक् प्रेरयेत् सन्मनः ॥२८॥

## ॥ ऋङ्मन्त्रः ॥

आशसनं विशसनमथो अधि विकर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥
(ऋ० मं १०।८५।३५)

## ॥ पदपाठः ॥

आऽशसनम् । विऽशसनम् । अथो इति । अधि । विऽकर्तनम् ।
सूर्यायाः । पश्य । रूपाणि । तानि । ब्रह्मा । तु । शुन्धति ॥

९२५ "सूर्या" वाक् तु सरस्वती स्वरवती मत्याशिषा शासती
सूर्येणैव सरस्वता स्वरवता स्वर्ज्योतिषा भास्वती ॥
सूर्यायाः परिपश्य वाचकचितेः सर्वाणि रूपाणि भोः
ब्रह्मा शुन्धति तानि दिव्यकिरणानीन्द्राग्निभासा प्रभोः ॥२९॥

## ॥ सूर्यायाः दिव्य रथस्य तात्त्विकस्वरूपोपवर्णनम् ॥

## ॥ ऋङ्मन्त्रः ॥

मनो अस्या अन आसीद् द्यौरासीदुतच्छदिः ।
शुक्रावनड्वाहावास्तां यदयात् सूर्या गृहम् ॥
(ऋ० मं० १०।८५।१०)

## ॥ पद्पाठः ॥

मनः । अस्याः । अनः । आसीत् । द्यौः आसीत् । उत । छदिः ।
शुक्रौ । अनड्वाहौ । आस्ताम् । यत् । अयात् । सूर्या । गृहम् ॥

९२६ "सूर्यायाः" सुविवाहकोत्सवमुखे ज्योतीरथे रूपके
वागदेव्याः शकटे चिदात्मनि मखे सौम्यं मनः स्यादनः ॥
व्योम प्रावरणं छदिः सुविततं विश्वात्मके व्यापकेऽ
नड्वाहौ चितिदीप्तिशुक्रवपुषाविन्द्राग्नितेजोमुखौ ॥३०॥

## ॥ ऋङ्मन्त्रः ॥

ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः ।
श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥
(ऋ० मं० १० । ८५ । ११)

## ॥ पद्पाठः ॥

ऋक्ऽसामाभ्याम् । अभिऽहितौ । गावौ । ते । सामनौ । इतः ।
श्रोत्रम् । ते । चक्रे इति । आस्ताम् । दिवि । पन्थाः । चराचरः ॥

९३७ ऋक्सामप्रहितावुभावभिहितौ गावौ समौ सामनौ
श्रोत्रं ते दिवि चक्रके उभयतो योगात् समास्तां समे ॥
पन्थास्तत्र चराचरः सुविततो दिव्यः समास्ते सदा
"सुर्यायाः" सुरथे तु वेदनिहितं सत्त्वस्वरूपं विदा ॥३१॥

## ॥ ऋङ्मन्त्रः ॥

शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।
अनो मनस्मयं सूर्याऽऽरोहत् प्रयती पतिम् ॥
(ऋ० मं० १० । ८५ । १२)

## ॥ पद्पाठः ॥

शुची इति । ते । चक्रे इति । यात्या । व्यानः । अक्षः । आऽहतः ।
अनः । मनस्मयम् । सूर्या । आ । अरोहत् । प्रऽयती । पतिम् ॥

९२८ चक्रे ते च शुची प्रदीप्तकिरणे ते रोदसी संहिते
प्राणापानगतिप्रकृष्टकरणे व्यानोऽक्ष एवांहतः ॥
स्वीयं दिव्यमनोमनोरथममुं प्रत्युः सुखं प्रेप्सती
साऽऽरोहत् प्रयती प्रतिं निजगृहं "सूर्या" स्वरात्मासती ॥३२॥

॥ इति एकोनत्रिंशी कला सम्पूर्णा ॥

प्राणवेणुयोगनादवाग् धमन्युदीरणा
नालिका नलीमुखा समीरणाऽसुधारणा ॥
मेलिरात्ममेलिनीह विश्वमेलननार्यया
मेनया सुमानया स्वरासया च सूर्यया ॥२९॥

## ॥ त्रिंशी कला ॥

### ॥ सरस्वती (२२) द्वाविंश वाङ्नाम ॥

९२९ वाग् विश्वेषु "सरस्वती" स्वस्वती स्वज्योतिषा चिद्धती
वाच्यार्थेषु सरत्यसौ रसवती शद्बार्थसंविद्धती ॥
द्वेधाऽन्वेति सरिद्रसा स्वररसा संविद्रसात्मा सती
द्वाविंशीह जगत्यसौ विजयते वाङ्नामतो भास्वती ॥ १ ॥

९३० माधुश्छन्दसदर्शने प्रउगके सा पावका न स्तृचे
माधुर्यादिरसेन दैर्घतमसे यस्ते स्तनो मन्त्रके ॥
बार्हस्पत्यमुखात स्तुतिमददात् सूक्ते भरद्वाजतः
ब्रह्मात्मेह "सरस्वती" श्रुतिपदाद् वाङ्नामतो राजते ॥ २ ॥

### ॥ तिस्रो देव्यः सरस्वती-इळा-भारत्यः ॥

### ॥ ऋङ्मन्त्रः ॥

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ॥
बर्हिः सीदन्त्वस्रिधः ॥

(ऋ० मं० १ । १३ । ९)

भारतीळे सरस्वति या वः सर्वा उपब्रुवे ॥
ता नश्चोदयत श्रिये ॥

(ऋ० मं० १ । १८८ । ८)

९३१ "तिस्रोदेव्य" इति श्रुतिप्रकृतयो वाग्देवतामूर्तयः
तासु स्वा[illegible] [illegible] महोरसपूर्दिव्यस्वरैरन्वयात् ॥
सूर्यस्यैव "सरस्वतः' सुमहसः शक्तिश्च तेजस्वती
स्वारस्येन "सरस्वती" विजयते वाग्ज्योतिषा भास्वती ॥ ३ ॥

॥ ऋङ्मन्त्रः ॥

पावकाः नः सरस्वती वाजेभि र्वाजिनीवती ॥
यज्ञं वष्टु धिया वसुः ॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ॥
यज्ञं दधे सरस्वती ॥
महोअर्णः सरस्वती प्रचेतयति केतुना ॥
धियो विश्वा विराजति ॥

( ऋ० मं० २।११।८ )

९३२ साऽऽग्नेयी भुवि पावका चितिमयी वाग् यज्ञसंसाधनी
साऽस्मायी सु[illegible] संवित्सुसम्बोधिनी ॥
यज्ञार्थं प्रतिचोदयत्यनुपदं वाचश्च विश्वा धियः
यज्ञं कामयते विदा समहृदा मित्र्यं वसन्ती धिया ॥४॥

९३३ सर्वान्तर्हृदि चेतते ऽसुरचिता सञ्चेतनाशक्तिका
सर्वासु प्रतिभासु धीषु रुचिता सञ्ज्ञानसत्त्वात्मिका ॥
प्रज्ञा - प्राण - महोरसार्णवचिता सञ्चेतयन्ती समं
विश्वा एव धियोऽन्विता सुखचिता सम्राजते वाक् स्वयम् ॥५॥

९३४ सत्यात्मा ऽसुसरिद्धतीक्षणवती स्वात्मानमाचिन्वती
सत्त्वार्थेन "सरस्वती" जगदिदं सच्छन्दसाऽऽतन्वती ॥ ३९

सर्वांश्चान् प्रतिबोधयत्यनुपदं सर्वात्मचित्त्योद्यती
साक्षाद् ब्रह्ममयी सदा विजयते वाग् देवता वैद्युती ॥६॥

॥ सरस्वती सरित्स्वरूपा रसवती ॥

"इमं मे गङ्गे यमुने सरस्वति०–
(ऋ० मं० १०।७५।५)

९३५ श्रीगङ्गायमुनाख्ययोः सुसरिदोः सत्सङ्गमेऽन्तर्हिता
सद्योगेन सितासितामृतपदोर्मध्ये वहन्त्यूहिता ॥
चिद्योतेन "सरस्वती" समरसात् स्याद् गुप्तगामिन्यसौ
साऽन्तः प्राणमनश्चितोः प्रतिरता वाक् स्वात्मनीन्द्रे बभौ ॥७॥

॥ ऋङ्मन्त्रः ॥

एकाऽचेतत् सरस्वती नदीनां शुचिर्यती गिरिभ्य आसमुद्रात् ॥
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥
(ऋ० मं० ७।९५।२)

॥ पदपाठः ॥

एका। अचेतत्। सरस्वती। नदीनाम्। शुचिः। यती। गिरिऽभ्यः। आ। समुद्रात्॥
रायः। चेतन्ती। भुवनस्य। भूरेः। घृतम्। पयः। दुदुहे। नाहुषाय॥

९३६ एकाऽचेतदुदीर्णसद्रसतमा सुप्ता नदीनां समा
साऽनेकासु "सरस्वती" परतमा गुप्ता सरित्सूत्तमा ॥
चित्सत्त्वेन शुचिर्यती घनगिरेः स्यादासमुद्रात् परा
प्राची वागिह विश्वतो मुखगतेः साऽभ्येति पारावरा ॥८॥

### ।। निवित् (२३) त्रयोविंशी वाङ्नाम ।।

९३७ वाग् वै सैव "निवित्" परेह नितरां वेत्तीति संविद्यते
वाच्यार्थं च निवेदयत्यतितरां स्वार्थे विदा विन्दते ।।
शक्त्या विन्दयति स्वमर्थमखिलं वेदेन सञ्चेतते
शक्नोतीह समस्तवस्तुजनने नाम्ना त्रयोविंशतेः ।।९।।

९३८ पूर्णं ब्रह्म परं च विश्वमपरं वेत्ति प्रमेयात्मना
वाचा वेदयति प्रमाणपरया वेदेन चित्तत्त्वया ।।
सङ्केतेन समाख्यया निगदिता सा वाङ् निवित् सेविता
सौहार्देन निवेदिता श्रुतिचिता साक्षात् परा देवता ।।१०।।

### ।। ऋङ्मन्त्रः ।।

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।।
स पूर्वया निविदा कव्यताऽऽयोरिमाः प्रजाः अजनयन्मनूनाम् ।।

( ऋ० मं १ । ९६ । १-२ )

### ।। पदपाठः ।।

सः । प्रत्नऽथा । सहसा । जायमानः । सद्यः । काव्यानि बट् । अधत्त । विश्वा ।
सः । पूर्वया । निऽविदा । कव्यता । आयोः । इमाः । प्रऽजाः । अजनयत् । मनूनाम् ।।

९३९ स प्रत्नः प्रथमोऽग्निरात्तसहसा योगात् समाविर्भवन्
सद्यः काव्यमयाति मन्त्रवचनच्छन्दाँसि सन्धारयन् ।।
चिद्योगेन स पूर्वया च निविदा वाचाऽऽत्मचित्सन्दृशा
ज्योतिष्मान् य इमाः प्रजा अजनयत् ता मानवान्ताः समाः ।।११।।

९४० देवानां महताऽऽत्मवैद्युतचिता कालाग्निरुद्रान्विता
दिव्यादित्यमहौजसा सुरुचिता ज्योतिः स्वरात्माञ्चिता ॥
देवी द्वादशसत्पदा समुदिता सेन्द्राग्निविद्यादिता
दिव्याग्नेयकलामयी चितितनुः सा वाङ् "निविद्" वेदिता ॥१२॥

॥ अग्निर्देवेद्धः (१) प्रथमा निविद् ॥
॥ अग्निर्मन्विद्धः (२) ॥ अग्निः सुषमिद् (३) ॥

९४१ "देवेद्धोऽग्नि" स्वं दिवि स्वयजने देवैश्चिता दीपितः
"मन्विद्धो" मनुनाऽऽदिमेन मुनिना मर्त्येन मन्त्रैर्युतः ॥
यज्ञार्थं स्वयमग्निरेव "सुसमिद्" दिव्याग्निना चीयते
यज्ञेनैव समिध्यतेऽत्र हविषा यज्ञोऽग्निरेवेज्यते ॥१३॥

॥ होता देववृतः ॥ (४) ॥ होता मनुवृतः ॥ (५)

९४२ "होता देववृतः" स यज्ञकृतये देवैर्वृतो देवता—
ऽऽह्वाताऽऽह्वानकृदेव सन् हवनकृत् सोऽग्निः समा देवताः ॥
नेता सन् मनुना च मन्त्रवचसा सोऽग्निर्मनुष्यैर्वृतः
यज्ञायैव चितोऽखिलैस्त्रिभुवने वेदौ च वेदैर्हितः ॥१४॥

॥ प्रणीर्यज्ञानाम् ॥ (६) ॥ रथीरध्वराणाम् ॥ (७)

९४३ "यज्ञानां" महतां "प्रणीः" प्रणयनादग्निः स्वयं यज्ञनीः
यज्ञेष्वाहवनीयवेदिसदने देवान् यजेताग्रणीः ॥
यज्ञाध्यक्ष इहास्थितस्त्रिभुवने सिद्धोऽ"ध्वराणां रथी"
यज्ज्योतीरथ एव यज्ञरथगो विद्युद्रथश्चिद्रथः ॥१५॥

॥ अतूर्तो होता ॥ (८) ॥ तूर्णि र्हव्यवाट् ॥ (९)

९४४ "होताऽतूर्त" इतीरितोऽवितरणः सिद्धोऽतितीर्णोऽन्तिमः
हन्ता ज्योतिषमौरिवैव तरणिर्दिव्योऽग्निरेवाग्रिमः ॥

"तूर्णिः" सन्निह "हव्यवाट्" समुदितो यज्ञेषु हव्यं वहन्
तीर्णः सन्मनसा समान् दिविषदो यज्ञाय वाचा वहन् ॥१६॥

॥ आ देवो देवान् वक्षत् ॥ (१०) ॥ यक्षदग्निर्देवो देवान् (११)

९४५ "देवा" देवगणात् सुदिव्यसदमाद् "आवक्षद्" अग्निः स्वयं
"देवान्" त्वानिह दिव्यसत्त्वपुरुषाँस्तानावहत्यन्वहम् ॥
"देवान्" देवयतां स्वसंविदुदये "यक्षत् स देवो महान्
दिव्याँस्तत्र दिवि स्थिताँश्च यजते भूमौ स्थितः सन् भवान् ॥१७॥

॥ सो अध्वरा करति जातवेदाः ॥ (१२)

९४६ अग्निः "सोऽध्वरकृत्" ससोमरसतः सञ्जातवेदाः समः
प्राज्ञः सौम्यसुसामरस्यमनसः सन् विश्ववेदस्तमः ॥
वाच्योऽग्निः परसंविदात्मवपुषा वेदात्मकः पूरुषः
वाचाऽन्तर्निविदा सदा वितरति ज्ञानं परज्ज्योतिषः ॥१८॥

॥ आग्नेयी निवित्-वाग् देवता-द्वादशपदवेदिता ॥

९४७ ता एता निविदोऽग्निदिव्यमहसो वाग्देवतामूर्तयः
तादात्म्येन निजाग्निना सुतपसा चिज्ज्योतिरग्राःश्रुताः ॥
पद्भिर्द्वादशभिः स्वमन्त्रवचसा सिद्धात्मचिद्वेदभूः
प्रत्ना द्वादशसत्पदा विजयते सा वाङ् निविद् देवहूः ॥१९॥

॥ (१) देवेद्धा निवित्-वाग्-(२) मन्विद्धा ॥ (३) सुसमित् ॥

९४८ "देवेद्धा" दिवि देवधीप्रतिचिता स्वर्ज्योतिषा दीप्यते
"मन्विद्धा" भुवि मानवेन मनुना स्वात्मत्त्विषा द्योतते ॥
साऽऽग्नेयी हृदि वागियं हि सुसमित् संवित् सतामिन्धते
वाचैवात्र समिध्यते मनसि वाक् प्राणे निविद् वेद्यते ॥२०॥

|| (४) हौत्री देववृता-वाक् (५) हौत्री मनुवृता ||

९४९ "हौत्री देववृता" ऽत्रदेवयजने वाग् देवताह्वानकृत्
होत्रा हौत्रामुखाद्धविर्वहनकृत् स्वाहाग्निजाया निवित् ||
यज्ञे होतृमुखेन सा मनुवृता सा दिव्यमन्त्रैर्वृता
हौत्रात्साऽनुवृता च होतृमनसा वाङ् मानवी स्याद्धता ||२१||

(६) || प्रणीर्यज्ञानाम् वाक् || (७) रथीरध्वराणाम् ||

९५० वेदात्मा परसंविदाऽऽत्मनि निविद् वागेव यज्ञप्रणीः
वेद्यं वस्तु निवेदयत्यनुपदं यज्ञं नयत्यात्मनः ||
विद्याध्यक्षपदेऽधितिष्ठति सदा सिद्धाऽध्वराणां श्रुतेः
वेद्या यज्ञरथे धियाऽत्र रथिनी वाग्यज्ञसंस्थोद्धृतेः ||२२||

|| (८) अतूर्ता हौत्री-वाक् (९) तूर्णिर्हव्यवाट् ||

९५१ अग्नेर्होतुरुदीरिता दिवि निवित् सा वाग् "अतूर्ता" श्रुता
हौत्री यज्ञमतूरिता त्वरितगा स्वर्गामिनी साऽऽश्रिता ||
सा वाक् सन्त्वरते स्वरेण तरणि "स्तूर्णिः" सती हव्यवाट्
सा हव्यं वहति स्वयं हि हवने स्वाहा स्वधात्माभिधा ||२३||

|| (१०) आ देवो देवान् वक्षत्-वाक् (११) यक्षदग्निर्देवो देवान् ||

९५२ देवी वागिह वेदमन्त्रवचसा वाग्यज्ञसंसिद्धये
देवानावहति प्रसन्नमनसा विश्वस्य संवृद्धये ||
साऽऽग्नेयी निजहोतृभिरिह निविद् वाग् ब्रह्मणाऽध्वर्युणा
साऽग्नायी यजतेऽत्र यज्ञमखिलं स्वाहा-स्वधा कर्मणा ||२४||

(१२) || सो अध्वरा करति जातवेदाः ||

९५३ वागेवाग्निविभूतिचित्तिलनुभृत् सा जातवेदा निवित्
यज्ञेवाखिलमध्वरं प्रकुरुते सर्वार्थसम्पत्सुवित् ||

ताभिर्द्वादशभिर्निविद्भिरुदिता देवात्मसंविन्मयी
वाग्मि द्वादशसत्पदा विजयते साऽऽम्नेयचित्सन्मयी ॥२५॥

॥ ऋङ्मन्त्रः ॥

तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ॥
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥
(ऋ० मं० १।८९।३)

॥ पद पाठः ॥

तान् । पूर्वया । निऽविदा । हूमहे । वयम् ।
भगम् । मित्रम् । अदितिम् । दक्षम् । अस्रिधम् ॥
अर्यमणम् । वरुणम् । सोमम् । अश्विना ।
सरस्वती । नः । सुऽभगा । मयः । करत् ॥

९५४ तान् देवानिह पूर्वयैव निविदा वाचा ह्वयामो वयं
तं मित्रं भगमाद्रि शक्तिमदितिं दक्षात्मकं चाक्षयम् ॥
दिव्यं त्वर्यमणं परं च वरुणं सोमं परावश्विनौ
सत्त्वार्थेन सरस्वतीह सुभगा कुर्यात् सुखं नः समम् ॥२६॥

॥ स्वाहा (२४) चतुर्विंशं वाङ्नाम ॥

९५५ "स्वाहा" स्वात्मसमर्पणैकवचनात् वाक् सत्क्रमात्रागुणा
स्वार्थत्यागसुखात् परार्थकरणा सा पारमार्थेक्षणा ॥
देवाह्वानकृते हविः सुहवनाद् धर्माभिरता साऽऽत्मसु
स्वर्गीये मखमुखे समर्जति चतुर्विंशीह वाङ्नामसु ॥२७॥

"आत्मा यज्ञस्य पूर्व्यः" (ऋ० म० ९।२।१०)

९५६ स्वः स्वात्मा यजमान आदिपुरुषः यज्ञस्य पूर्व्यः श्रुतः
सर्वत्र प्रथमः समस्तकरणे सर्वस्वतन्त्राश्रितः ॥
"ओहाक् त्याग" इति प्रसिद्धिकृतितो वाचा धिया स्वाहया
स्वार्थं स स्वयमाजहाति मतितः सद्देवतावाहया ॥२८॥

॥ ऋङ्मन्त्रः ॥

स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे ॥
तत्र देवाँ उपह्वये ॥

( ऋ० मं० १ । १३ । १२ )

९५७ "स्वाहा" मन्त्रमुखा स्वनाऽग्निरसना वाग् देवताऽऽवाहने
साऽऽह्वानार्थगुणा हविः सुवहने सिद्धा हविः स्वादने ॥
देवानां यजने स्वमन्त्रजपने मन्त्रान्ततो योजने
स्वाहां वाचमनूच्चरेद् रसनया तद्देवतायाजने ॥२९॥

॥ स्वाहाकृतिः । स्वाहाकृतम् ॥

॥ ऋङ्मन्त्रः ॥

परोगा अग्निर्देवानं गायत्रेण समज्यगे ॥
स्वाहाकृतीषु रोचते ॥

( ऋ० मं० १ । १८८ । ११ )

विश्वे देवाः स्वाहाकृतिं पवमानस्यागत ॥
वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः ॥

( ऋ० मं० ९ । ५ । ११ )

९५८ सा स्वाहाकृतिरग्निमनुसृत्य योगेन सम्मिता
साऽऽग्नेयी यज्ञेऽग्निना दिविषदां यज्ञात्मनाम् "आग्निया" ॥
सा सर्वार्थसमर्पणेन जगतां सन्तर्पणे सुक्षमा
सर्वं सम्भृतं मधु च यज्ञे वाक् स्वाहाऽऽत्मना ॥२०॥

॥ स्वाहा स्वधेति द्वे वाग्रूपे ॥

॥ वाक्कर्मफलस्वरूपे प्रमाणम् ॥

## ॥ ऋङ्मन्त्रः ॥

मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ॥
यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ॥

(ऋ० सं० १०।१४।३)

## ॥ पदपाठः ॥

मातली। कव्यैः। यमः। अङ्गिरःऽभिः। बृहस्पतिः। ऋक्वऽभिः। ववृधानः॥
यान्। च। देवाः। ववृधुः। ये। च। देवान्। स्वाहा। अन्ये। स्वऽधया। अन्ये। मदन्ति॥

९५९ या स्वाहाऽग्निस्तीह यज्ञकर्मे सा दक्षिणा वाक् परा
या देवान् यज्ञेन मादयति तान् तत्स्वाहया सुस्वरा ॥
वामाऽन्या च पितृन् प्रहर्षयति या सा वाक् स्वधास्याऽपरा
तस्मान्ने स्वधया मदन्ति पितरो देवाश्च ते स्वाहया ॥२१॥

॥ देवानां यज्ञे स्वाहा कारः ॥

स्वाहाऽग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः ॥
स्वाहा देवेभ्यो हविः (ऋ० सं० [illegible])

स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे ॥
तत्र देवाँ उप ह्वये ॥

( ऋ० मं० १ । १३ । १२ )

९६० स्वाहा वागिन्द्रमन्त्रे निहिते यज्ञे स्वनाकाशकी
स्वाहां वाक्यमनूच्य देववचने स स्वाहया तर्प्यते ॥
स्वाहायै सुकृतं नमोऽस्तु तदिदं स्वाहात्मिकायाः समं
स्वाहायां सुसमर्पितं हि सकलं स्वाहात्मिके ते नमः ॥२२॥

॥ इति चत्वारिंशी कक्षा सम्पूर्णा ॥

---

वेदज्ञा सरस्वती सात्त्विका समास्वरा
नीतिज्ञा निनिदता निन्दिता निवित् परा ॥
स्वाहृता स्वमानसा महास्वरा निरान्तरा
साध्वता च दैवतत्वानुपा निस्वरा ॥२०॥

## ॥ एकत्रिंशी कला ॥

### ॥ वग्नुः ॥ (२५) पञ्चविंशं वाङ्नाम ॥

९६१ "वग्नु" वाग् वचनेन नौति परमं सर्वार्थसत्प्रथये
वाग्यज्ञं यजते निजेन नमसा सर्वात्मभावाप्तये ॥
वाचा ब्रह्म परं प्रणोति मनसा सा विश्वरूपान्विता
वागेव प्रतिनूयते स्ववचसा सा पञ्चविंशी नुता ॥१॥

### ॥ ऋङ्मन्त्रः ॥

वृषा शोणो अभि कनिक्रदद्गा नदयन्नेति पृथिवीमुत द्याम् ॥
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेनाम् ॥

(ऋ० म० ९।९७।१३)

९६२ सोमो दिव्यसुतेजसा सुमनसा मेघादपां वर्षकः
सौम्यां द्यां पृथिवीं स्वरेण नदयन् त्सोऽभ्येत्युदाकर्षकः ॥
इन्द्रस्येव हि वग्नुरार्षवचना वाग् व्योमगाऽऽश्रूयते
सेन्दुः सत्स्वरसेन वाचममृतां सञ्चेतयन्नर्षति ॥२॥

### ॥ ऋङ्मन्त्रः ।

आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी ॥
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥

(ऋ० मं० १।८४।३)

९६३ आतिष्ठेन्द्र रथं सुदिव्यमहसं ज्योतीरथे ब्रह्मणा
युक्तौ ते च हरी हयौ सुमनसौ योगेन सत्कर्मणा ॥

अर्वाचीनमिहास्मदाद्यभिमुखं कुर्यान्मनो "वग्नुना"
ग्राव्णा दिव्यमहः स्वरेण मनुना ग्रावस्तुता शंसनात् ॥३॥

॥ ऋङ्मन्त्रः ॥

अस्य यामा॑सो बृह॒तो न व॒ग्नून् इन्धा॑ना अ॒ग्नेः सख्युः॑ शि॒वस्य॑ ॥
ईड्य॑स्य॒ वृष्णो॑ बृह॒तः स्वासो॒ भामा॑सो॒ याम॑न्न॒क्तव॑श्चिकित्रे ॥
(ऋ० मं० १०। ३। ५)

९६४ अस्याग्नेर्बृहतो महस्तनुमनून् वग्नून् सुवाचः स्वनान्
इन्धानाः प्रतिदीपयन्त्य उदिताः सख्युः शिवस्यात्मनः ॥
ईड्यस्य स्वरसाभिवर्षणपरास्तास्तस्य भामाः समाः
ईड्याः प्राणमनोऽन्वयेन नियमे प्रज्ञानसत्त्वस्वना ॥४॥

॥ उपब्दिः ॥ (२६) षड्विंश वाङ्नाम ॥

९६५ षड्विंशीयम् "उपब्दि" रित्यभिहिता साऽऽत्मन्युपादीयते
षड्भागाब्दिककालभागुपहिता सा वाग् उपब्दीयते ॥
षड्भिः सप्तभिरङ्गसत्त्वकगुणै ब्रह्मात्मनोपाहिता
संवित्तेऽस्वसचेतनेन्द्रियगणै र्वागष्टमी व्यूहिता ॥ ५ ॥

॥ ऋङ्मन्त्रः ॥

न यो॒रुप॑ब्दि॒रश्व्यः॑ शृ॒ण्वे रथ॑स्य॒ कच्च॒न ॥
यद॑ग्ने॒ यासि॑ दू॒त्य॑म् ॥
(ऋ० मं० १। ७४। ७)

९६६ अग्निर्यद् भुवि संस्थितो दिविषदां दौत्यं प्रयाति स्वयं
स्वं ज्योतीरथमास्थितो निजरथे हव्यं वहत्यन्वहम् ॥

अग्नेस्तस्य परस्य दिव्यमहसो यज्ञीयसञ्ज्ञामयी
सूक्ष्मोपब्दिरसौ परा सुनिनदा न श्रूयते वाङ्मयी ॥ ६ ॥

॥ ऋङ्मन्त्रः ॥

अति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः ॥
ये मर्त्यं पृतनायन्तमूमैं ऋणावानं न पतयन्त सर्गैः ॥
(ऋ० मं० १। १६९। ७)

९६७ घोराणां मरुतां परिप्रवहतां मध्येऽन्तरिक्षे पदे
घोरः सोऽयमुपब्दिरास्वरमयो दिव्यो बहिः श्रूयते ॥
ये मर्त्यं प्रति चेतयन्ति सकलं लोके सृजन्तः सवान्
सप्तासास्तदुपब्दिवाक्स्वरणतः सर्वान्तरे तेऽसवः ॥ ७ ॥

॥ ऋङ्मन्त्रः ॥

बृहद् वदन्ति मदिरेण मन्दिनेन्द्रं क्रोशन्तोऽविदन्नना मधु ॥
संरभ्या धीराः स्वसृभिरनर्तिषु राघोषयन्तः पृथिवीमुपब्दिभिः ॥
(ऋ० मं० १०। ९४। ४)

९६८ ग्रावाणोऽत्र बृहद् वदन्ति सहसा यज्ञे हविः साधकाः
क्रोशन्तः परमिन्द्रमध्वरपतिं स्तुत्वाऽन्वविन्दन् मधु ॥
वाग्भिस्ताभिरुपब्दिभिः सुमहसाऽप्याघोषयन्तो महीं
स्वानन्देन सुसम्भ्रमेण ननृतुस्तेदिव्यनादानुगाः ॥ ८ ॥

॥ मायुः (२७) सप्तविंशं वाङ्नाम ॥

९६९ "मायुः" स्वात्मगतं सदर्थ मखिलं सा वाङ् मिमाति स्वयं
मातुं कामयते निजार्थवचने तद्वेदने स्वान्वयम् ॥

मेयं मानवतीह सा प्रवचनाद् सम्बोधनात् संविदां
मात्री सा सकलप्रमाणवचना वाक् सप्तविंशी मता ॥ ९ ॥

॥ ऋङ्मन्त्रः ॥

दिव्या आपो अभि यदेनमायन् दृतिं न शुष्कं सरसी शयानम् ॥
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति ॥
(ऋ० मं० ७ । १०३ । २)

९७० माया शक्तिरसौ पराप्रकृतिका ब्रह्मात्मनीन्द्रेऽन्विता
मात्री सा प्रतिमा प्रमाणपरका ब्रह्मात्मिका वाङ् मिता ॥
मायां तां प्रकृतिं हि मानगुणकां शक्तिं च वाक्सत्त्वकां
मायुं तं विविदुः समानगुणकं शब्दं च वाक्सत्त्वकम् ॥१०॥

॥ ऋङ्मन्त्रः ॥

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ॥
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥
(ऋ० मं० १ । १६४ । २८)

९७१ वाक् सर्वेन्द्रियमूलभूतकरणा शक्तिः पराऽऽत्माऽऽन्तरा
शब्दः सोऽखिलमूलभौतिकगुणो व्योमैकतन्मात्रकः ॥
शब्दं तं प्रतिसर्जने निजसुतं स्वीकृत्य मानार्थकं
मायुं मानकृते मिमाय भवती वागेव मात्री स्वकम् ॥११॥

॥ ऋङ्मन्त्रः ॥

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ॥
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद् भवन्ती प्रति वव्रिमौहत ॥

९७२ सोऽयं मानगुणात्मशब्दवदनः शिङ्क्तेऽत्र शब्दायते
मात्रीं वाचमम् निजाममिमुखां वृङ्क्ते स्वमानात्मिकाम् ॥
सा वाक्स्वेष्टममुं मिमाय भवती मायुं स्वमानार्थकं
स्वान्तश्चेततशक्तिभिश्च सकलं चक्रे प्रमेयं स्वकम् ॥१२॥

॥ काकुत् ॥ (२८) अष्टाविंशं वाङ्नाम ॥

९७३ "काकुत्" सा ककुदाश्रितोद्यत इति स्याद् वाच्यनामाक्षरा
काकुः सा रसनोच्यतेऽसुरसविद् वागाश्रयात् सस्वरा ।
कं कौतीति यदीषदत्र कवते योगेन शब्दोत्तरा
काकुत्स्यात्स्था सकलार्थसद्रसपदा वागष्टविंशी परा ॥१३॥

॥ ऋङ्मन्त्रः ॥

यः कुक्षिः सोमपातमः समुद्र इव पिन्वते
उर्वीरापो न काकुदः ॥

(ऋ० मं० १। १। १)

९७४ यः कुक्षिः प्रतिसोमपानमुदितः पूर्णाब्धिवत् पिन्वते
सेन्द्रोऽसौदिवि सोमपाः सुरपतिः पूर्णात्मको राजते ।
आपः सर्वरसात्मिका भुवि यथा प्राणादिसत्त्वार्थदाः
संवित्सत्वसुखादिसन्मधुरसैर्वाचः समाः काकुदः ॥१४॥

॥ ऋङ्मन्त्रः ॥

या ते काकुत् सुकृता या वरिष्ठा यया शश्वत् पिबसि मध्व ऊर्मिम् ॥
तया पाहि प्र ते अध्वर्युरस्थात् सं ते वज्रो वर्ततामिन्द्र गव्युः ॥

(ऋ० मं० ६। ४१। २)

९७५ या ते काकुदुपस्थितेन्द्र सुकृता सा वाग् वरिष्ठा तया
सोमं सन्मधुसद्रसं पिब यथा शश्वत् पिबस्यन्वहम् ॥
स त्वं सर्वहृदन्तरे पिब रसं वाचा तया काकुदा
सोऽस्मान् पाहि निजाश्रितान् सुखरसैः शान्तिप्रदैः संविदा ॥१५॥

९७६ देव त्वं वरुण प्रभुः पतिरपां ते सिन्धवः सप्त ते
दिव्यां वाचमनुक्षरन्ति सततं तां सद्रसां काकुदम् ।
प्राणास्ते हृदि संस्थिताऽऽत्मनि चिता प्रत्यञ्चि वृत्त्याऽऽचिताः
प्राज्ञस्यात्रचिदात्मनो रसमयाश्चैतन्यस्त्वाश्रिताः ॥१६॥

॥ ऋङ्मन्त्रः ॥

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ॥
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥

( ऋ० मं० ७ । १०३ । २ )

॥ जिह्वा ॥ (२९) एकोनत्रिंशं वाङ्नाम ॥

९७७ "जिह्वा"ऽऽस्वादनकृद् रसाधिकरणं रस्यार्थसन्धारणाद्
वाचाऽऽह्वानकृतेः प्रधानकरणं शब्दस्वरोच्चारणात् ॥
जिह्वां स्वामनु चित्स्वरानुकरणाज्जिह्वैव वागुच्यते
स्वान्तः सा रसजिह्वयाऽनुचरणाद् वागेव जिह्वेष्यते ॥१७॥

॥ ऋङ्मन्त्रः ॥

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ॥
अनामयित्नुभ्यां त्वा ताभ्यां त्वोपस्पृशामसि ॥

( ऋ० मं० १० । १३७ । ७ )

९७८ हस्ताभ्यां दशसंख्यया (ऽ) मितपदैः रङ्गाङ्गुलैः प्राण-धी-
शाखाभ्यां च पुरोगवी रसतमा जिह्वाऽऽत्मवागुद्गमा ॥
शक्तिभ्यां क्रियया विदा सहयुतेः साऽनामथित्नुक्रिया-
सक्ताभ्यां नमसोर्ध्ववृत्तमनसा त्वोपस्पृशामः परम् ॥१८॥

९७९ जिह्वैवात्र सरस्वती स्वरवती वागर्थसत्त्वाश्रया
नित्यं वाग्रससत्त्वसंवितरणादास्तेऽसुधीप्रश्रया ॥
वाचः सैव "पुरोगवी" समुदिता जिह्वैव वागाश्रया
संवित्सामरसस्वरा सुमधुरा श्रुत्याऽऽत्मशान्त्याश्रया ॥१९॥

९८० प्रत्यग्वृत्तितताऽऽत्मचित्तिवदना संविद्रसाधायिनी
प्राज्ञात्मन्युपसंहितोपकरणा रस्यानुसन्धापिनी ॥
प्रत्यक्षा रससंविदेऽनुकरणा साऽऽपानचिद्व्यापिनी
स्वान्तः षड्रससंविदां वितरणात् सन्तर्पणाऽऽप्यायिनी ॥२०॥

## ॥ ऋङ्मन्त्रः ॥

अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया ॥
गृभ्णन्ति जिह्वया ससम् ॥

(अ॰ मं॰ )

९८१ अन्तः स्वात्मनि तं जने तनुभृतामिच्छन्ति बुध्देः परं
रुद्रं स्वं च मनीषया प्रमिमते प्राणैर्हृदा चेतनम् ॥
गौर्याऽऽन्तर्यहृदय्यया स्वरसया शीर्षण्यया गङ्गया
वाचा सुप्तमिमं विदन्ति मुनयो गृभ्णन्ति तं जिह्वया ॥२१॥

९८२ रुद्रे स्वात्मनि सस्वरा च सरसा जिह्वैव वाग् गीयते
रुद्रः प्राणमुखः प्रगायति परां वाचं निजां जिह्वया ॥

भूयोऽनुस्वदते रसं रसनया भुत्या स्वरात्मासया
भूमानन्दरसं स्वतोऽनुभवति स्वान्तर्धिया गुप्तया ॥२२॥

९८३ देवास्ते सकला हविः स्वदनतो भौमाग्निजिह्वाः श्रुताः
दिव्यादग्निमुखात् स्वदन्ति च हविस्ते सप्तजिह्वाश्रिताः ॥
ज्वालाश्चोर्ध्वमुखा ज्वलन्ति महसा ताश्चोर्ध्वजिह्वाः कलाः
ज्योतिः प्रज्वलितेन्द्रवैद्युतचिता वाचाऽसुजिह्वोज्ज्वलाः ॥२३॥

९८४ चिज्ज्योतिः शुचिजिह्व इन्द्ररसनः सद्वाक्सुजिह्वोऽनलः
विद्युद्वाग्रससस्वरासुरसनो वागग्निजिह्वोऽनिलः ॥
जिह्वास्ताः परवस्तुतत्त्वकलया ज्ञानादिशक्त्योज्ज्वलाः
सप्तप्राणगतिक्रियात्मनिलयाः प्राणाग्निचित्त्योच्चलाः ॥२४॥

॥ ऋङ्मन्त्रः ॥

या ते जिह्वा मधुमती सुमेधा
अग्ने देवेषूच्यत उरुची ॥
तयेह विश्वाँ अवसे यजत्रान्
आसादय पायया चा मधूनि ॥

( ऋ० मं० ३।५७।५ )

९८५ या तेऽग्नेऽत्र सुमेधया मधुमती चित्तेरुरूची सती
जिह्वाऽसुस्वरसंहिता रसवती देवेषु वागुच्यते ॥
अस्माकं भुवि रक्षणाय परमान् विश्वान् यजत्रान्सुरान्
वाचाऽऽसादय सम्मधूनि च तया तान् पायया तर्पय ॥२५॥

॥ ऋङ्मन्त्रः ॥

भुवो यज्ञस्य रजसश्च नेता
यत्रा नियुद्भिः सचसे शिवाभिः ॥
दिवि मूर्धानं दधिषे स्वर्षां
जिह्वामग्ने चकृषे हव्यवाहम् ॥

( ऋ० मं० १०। ८। ६ )

९८६ यज्ञस्यास्य निजस्य सर्वजगतो नेताऽग्निरेवाभवद्
यत्रायं सचते नियुद्भिरुचितै र्वायोः सदास्यैः शुभैः ॥
मूर्धानं दिवि सन्दधे स्वमहसा वाचं स्वशीर्षण्यगां
जिह्वामत्र चकार देवयजने तां हव्यवाहं सुगाम् ॥२६॥

॥ ऋङ्मन्त्रः ॥

ऋतस्य जिह्वा पवते मधु प्रियं
वक्ता पतिर्धियो अस्या अदाभ्यः ॥
दधाति पुत्रः पित्रोरपीच्यं १
नाम तृतीयमधि रोचने दिवः

( ऋ० म० ९। ७५। २ )

९८७ अग्नेस्तस्य ऋतस्य तत्र पवते जिह्वा प्रियं सन्मधु
स्याद् वक्ता च पतिर्धियो हृदि महान् अस्याश्च वाचो विभुः ॥
पित्रोस्तस्य सुवाचकं भगवतोर्नामोत्तमं सत्यजं
पुत्रौऽसौ स्वयमादधाति मनसा सोमस्तृतीयं त्वजम् ॥२७॥

## ॥ ऋङ्मन्त्रः ॥

इन्द्र पिब स्वधयां चित्सुतस्य
अग्नेर्वा पाहि जिह्वया यजत्र ॥
अध्वर्योर्वा प्रयतं शक्र हस्ताद्
होतुर्वा यज्ञं हविषो जुषस्व ॥

( ऋ० मं० ३ । ३५ । १० )

९८८ इन्द्र त्वं स्वधयैव तं पिब रसं सोमं सुवाचाऽर्पितं
सोऽग्नेर्वा पिब जिह्वया सुमनसा वाचा हुतं स्वाहया ॥
अध्वर्योरपिवा जुहूमुखहुतं हस्तात् स्रुतं मन्त्रतो
होतुर्वाऽत्र वषट्कृतेश्च हविषो यज्ञं जुषस्वेह नः ॥२८॥

## ॥ छन्दोदर्शनम् ॥

नमस्ते देवि संस्रव चन्द्रमसेह मूर्धनि ॥
रसं पिबामि जिह्वया सरस्वत्यास्तव वाचः ॥

( छन्दोदर्शनम् अनु० २ । १ । ९ )

९८९ मातर्देवि सरस्वति स्वरसतो दिव्यात्मना स्वेन्दुना
मूर्ध्नः संस्रव शान्तिसत्त्वमहसा पूर्णेन्दुहृद्बिन्दुना ॥
मूर्धन्यं तव सम्पिबामि मनसा त्वज्जिह्वया वाग्रसं
वाचेऽमुष्य सरस्वतो रसभृते शक्त्यै प्रशान्त्यै नमः ॥२९॥

नमस्ते देवि संस्वर नमस्तेऽस्तु स्वरवत्यै ॥
जिह्वायां स्वरं मेधयां स्वरेण बृहस्पतेः ॥ (छन्दो० २।१।१०)

९९० देवि त्वं स्वरदेवता रसचिता [मूर्धन्यनादान्विता
जिह्वायां स्वर मेधया स्वरचिता वाग् ब्रह्मणः सत्पतेः ॥
शीर्षेऽन्तस्त्वमनाहता परचिता मात्री मनःसंस्तुता
शीर्षण्येन शृणोमि वाक्स्वरमसुं श्रोत्रेण संविद्भुता ॥२०॥

तत् प्राणैः पुनः स्वरितं मूर्ध्नि स्वरभिद्रस्तीयम् ।
इदं ते पदं तुरीयमनुब्रवीमि जिह्वया ॥

९९१ वाचस्तानि पदानि सम्मितिकृते मात्रात्मकान्यूचिरे
चत्वारि प्रतिसम्मितानि कविभिर्मेयानि [ ] चाहुः परे ॥
तेषां त्रीणि तु हृद्गुहान्तरुदितान्याद्यानि सम्मेनिरे
व्यक्तं तेषु तुरीयमेव चरमं तज्जिह्वयाऽनूच्चरेत् ॥२१॥

सरस्वति यत् परमं पदं दिवि ते स्वरन्त्याः ॥
आश्रावय तद् मह्यं ज्योति विश्वस्य दर्शयत् ॥

९९२ मातस्तेऽत्र सरस्वति स्वमुदितं व्योम्नि स्वरन्त्याः सदा
मान्यं तत् परमं पदं त्रिजगतां मह्यं समाश्रावय ॥
सर्वान्तर्बहिराततान्धतमसाज्ञानादि सम्भर्शयद्
ज्योतिर्दृश्य संविदा समुदयाद् विश्वस्य सन्दर्शयत ॥२२॥

॥ इति एकत्रिंशी कला सम्पूर्णा ॥

मात्रयाऽत्र वस्तुरप्युपन्द्विरित्युदीर्यते
मायुना च काकुदा च जिह्वया सहेप्यते ॥
वाच एव नामपञ्चकं तदेतदुच्यते
वाङ्मुखेन दैवरातवाक्सुधासु सूच्यते ॥३१॥

## ॥ द्वात्रिंशी कला ॥

### ॥ घोषः ॥ (३०) त्रिंशं वाङ्नाम

९९३ "घोषो" घोषति घुष्यतेऽसुवचसा त्रिंशीह वाङ्नामके
ध्वन्यात्मा दिवि मेघगर्जनपरः शङ्खादिनादात्मकः ॥
विद्युज्ज्यौतिषसत्त्ववाक्र्चितिमुखादुद्घोषितः श्रूयते
वेदः प्राणमुखाच्छ्रुतानुकरणाद् वाचा समाश्राव्यते ॥१॥

### ॥ ऋङ्मन्त्रः ॥

आत्मा देवानां भुवनस्य गर्भो
यथावशं चरति देव एषः ॥
घोषा इदस्य शृण्विरे न रूपं
तस्मै वाताय हविषा विधेम ॥

( ऋ० मं० १० । १६८ । ४ )

९९४ आत्मा चेतनसत्त्वकः समतति प्राणादिसञ्चारकः
देवानां भुवनस्य गर्भ उदितः सन् विश्वसन्धारकः ॥
श्रूयन्तेऽत्र यथावशं प्रचरतो घोषाश्च तस्योर्जिताः
तद्रूपं न तु दृश्यते चितिमते वाताय तस्मै नमः ॥२॥

### ॥ ऋङ्मन्त्रः ॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ
आदित्यानां मरुतां शर्ध उग्रम् ॥

महांमनसां भुवनच्यवानां
घोषो देवानां जयतामुदस्थात् ॥

( ऋ० मं० १०। १०३। ९ )

९९५ इन्द्रस्य प्रतिवर्षकस्य मरुतां सूर्यात्मनां चिद्वतां
दिव्यानां च महात्मनां त्रिजगतां सञ्चालकानां सताम् ॥
देवानां जयतां सुवाग्ध्वनिमयो घोषोऽभ्युदस्थान्महान्
राज्ञो वै वरुणस्य तस्य विदुषोऽप्युग्रं बलं तन्महत् ॥२॥

॥ ऋङ्मन्त्रः ॥

उद्धर्षय मघवन्नायुधा—
न्युत्सत्वनां मामकानां मनांसि ॥
उद्वृत्रहन् वाजिनां वाजिना—
न्युद्रथानां जयतां यन्तु घोषाः ॥

( ऋ० मं० १०। १०३। १० )

९९६ इन्द्रोद्धर्षय सन्मनांसि महतां तन्मामकानां सतां
सेन्द्राणां भुवि जीवतां समनसां दिव्यायुधान्युद्धताम् ॥
शक्तानां परसत्त्वनां च जयतां ज्योतीरथस्योत्तमाः
घोषास्ते प्रथिताश्च यन्तु विततः शस्याः सुवाचः समाः ॥४॥

॥ ऋङ्मन्त्रः ॥

वातस्य नु महिमानं रथस्य
रुजन्नेति स्तनयन्नस्य घोषः ॥
दिविस्पृग् यात्यरुणानि कृण्वन्
उतो एति पृथिव्या रेणुमस्यन् ॥

( ऋ० मं० १०। १६८। १ )

१९७ वातस्यास्य रथस्य विद्युदुदितो घोषो ध्वनिर्ज्योतिषः
वाच्यं सन्महिमानमेव हि सृजन् सम्बोधयन् स्वार्चिषा ॥
चिद्योगान् स्तनयन् प्रयाति सहसा स्वोर्ध्वं दिवं संस्पृशन्
कुर्वन् स्तान्यरण्यानि चैलि पृथिवीमध्यन् हि रेणुं बृहन् ॥५॥

## ॥ ऋङ्मन्त्रः ॥

प्र मा युयुज्रे प्रयुजो जनानां
वहामि स्म पूषणमन्तरेण ॥
विश्वे देवासो अध मामरक्षन्
दुःशासुरागादिति घोष आसीत् ॥

( ऋ० मं० १ । १४ । ३ )

१९८ पूषाऽसौ दिवि योजकः सुमहसां पाता जनानां हितः
पोषार्थं भुवि भाजकः सुमनसा सर्वान्तरेऽन्तर्हितः ॥
प्राज्ञः प्राणचिदिन्द्रवन्हिवदनो "दुःशासुरागादिति"
प्रासः शासनकृच्छ्रुतीष्ववचसामासीत् स घोषः श्रुतिः ॥६॥

## ॥ घोषा शब्दशक्तिः वाक्परा ॥

युवां ह घोषा पर्यश्विना यती
राज्ञ ऊचे दुहिता पृच्छे वां नरा ॥
भूतं मे अह्न उत भूतमक्तवेऽ—
श्वावते रथिने शक्तमर्वते ॥

( ऋ० मं० १ । ८८ । ८ )

९९९ घोषा सा दिवि वाग् युवां परियती योगेन वामश्विनोः
राज्ञः सा वरुणस्य तस्य दुहिता ज्योतीरसान्तः स्वना ॥
अन्हे भूतमिहात्मने सुमहसे नक्ताय रस्यात्मने
शक्तं चाश्ववते समाऽस्ति रथिने सर्वार्थसंसाधने ॥७॥

॥ घोषा ब्रह्मवादिनी ॥

१००० घोषा वाक् परशब्दशक्तिरभितः सोद्घोषयन्ती ध्वनेः
स्वोद्घोषेण जयानुवादवदनाद् ध्येयार्थसद्भावनात् ॥
ब्रह्मण्यन्तरिताऽऽत्मसंविदुदिता प्रज्ञानचिज्ज्योतिषा
ब्रह्मात्माद्यनुभावबोधपरमा वाग् ब्रह्मवादिन्यसौ ॥ ८ ॥

॥ स्वरः ॥ (३१) एकत्रिंशं वाङ्नाम ॥

१००१ वाचः स "स्वर" इत्यनन्यवचनस्तच्छक्तिरूपा स्वरा
वाच्यार्थं स्वरति स्वरन्तरुदिता वाग् व्योममात्राक्षरा
स्वर्यन्ते दिविजैः सुरैर्ध्वनिपरैः सर्वे सदर्थाः समाः
सैकत्रिंशतमः स्वनामवचने वाक्सत्त्वकः सत्तमः ॥ ९ ॥

॥ ऋङ्मन्त्रः ॥

समु मियो मृज्यते सा नो अव्ये
यशस्तरो यशसां क्षैतो अस्मे ॥
अभि स्वर धन्वा पूयमानो
यूयं पात स्वस्तिभिः सदा नः

( ऋ० मं० ९।९७।३ )

१००२ सोम त्वं समभिस्वर स्वसदने सम् पूयमानो रसैः
सर्वेषां च यशस्तरः सुयज्ञसामस्मासु राजा महान् ॥
स्वात्मानन्दमयः प्रियो रसतमः स्वान्तर्विमर्शाक्षरः
स्वात्मन्येव समस्वरेण रमसे छन्दःसुसामस्वरः ॥१०।

## ॥ ऋङ्मन्त्रः ॥

इह त्या सधमाद्या युजानः सोमपीतये ॥
हरी इन्द्र प्रतद्वसू अभि स्वर ॥ ( ऋ० म० ८।१०।२ )

१००३ यज्ञेऽस्मिन्निह दिव्यवेदिसदने सत्सोमपानाय तौ
हृद्योगेन हरी समानमहसौ स्वाश्वौ युजानोऽन्वितौ ॥
इन्द्र त्वं प्रततश्रियौ सुविभवौ तौ प्रेरयाभिस्वर
प्राणापानगतिप्रशासनपरः स प्रेरको वाक्स्वरः ॥११।

## ॥ ऋङ्मन्त्रः ॥

स सुष्टुभा स स्तुभा सप्त विप्रैः
स्वरेणाद्रिं स्वर्यो३ नवग्वैः ॥
सरण्युभिः फलिगमिन्द्र शक्र
वलं रवेण दरयो दशग्वैः ॥
( ऋ० मं० १।६२।४ )

१००४ दिव्यैः सप्तगणैः सहप्रणयनैः प्राणैः स्वरेणात्मनः
दिव्यन्तर्नवभिश्च दिक्प्रगतिकैरद्रिं दृढं तं घनम् ॥
दिक्ष्वन्तर्दशसूर्जितैर्निजबलैश्चित्त्या रवेणोद्बलं
सेन्द्रोऽमुं फलिगं व्यदारयदिमं दुष्टं वलं दुर्बलम् ॥१२।

## ॥ शब्दः ॥ (३२) [illegible] ॥

१००५ "शब्दः" शब्दयति स्वशब्दवचना वागेव शब्दायते
द्वात्रिंशः स्वनिघण्टुनामवचने शब्दैः समाख्यायते ॥
शास्त्राद् व्याकरणात् सुशुद्धवचनादर्थः समो बुध्यते
सर्वोऽर्थो भुवि शब्दशास्त्रमुखतश्चित्या विदा शब्द्यते ॥१२॥

१००६ शब्दोऽसौ घनगर्जितोऽत्यशनिना व्योम्नीह शब्दायते
श्रोत्रेणान्तरितेन शब्दगुणतो व्योमात्मना श्रूयते
शाब्दी शक्तिरियं स्ववाक्स्वरगुणा स्वार्थेन साऽऽश्रीयते
शाब्दीभावनयाऽर्थभावनगुणा सा वाङ्मुखाच्छ्राव्यते ॥१४॥

१००७ शब्दः शब्दमुखात्तदुच्चरणतः स स्वार्थतो बोध्यते
शब्दाच्छ्रोत्रमुखेन तच्छ्रवणतः शक्त्याऽर्थतो बुध्यते ॥
शास्त्रं शब्दमुखेन शास्ति सहितं साक्षात् प्रमाणायते
शास्त्रार्थाद्रिह सर्वसंविदुदयः सँच्छाब्दबोधोऽर्थ्यते ॥१५॥

१००८ आकाशश्च दिशश्च शब्दगुणकास्ते शब्दतन्मात्रकाः
प्राक् सृष्टेः सकलादितः स्वगुणतो जाताः स्वशब्दात्मकाः ॥
शब्दो वागध्वनिनादसस्वरमुखो वर्णात्मको गण्यते
शब्दादेवहि वेदशास्त्रमुखतो वाग्रूपतो वर्ण्यते ॥१६॥

१००९ प्रत्यक्षप्रकृतेर्विभूतिपरतः शब्दप्रमाणार्थतः
शब्दं तं प्रतियन्ति नित्यमुदितं वेद्यं वदन्त्यर्थतः ॥
प्रत्यक्षं च परोक्षमान्तरतमं स्वीयापरोक्षार्थकं
शब्देनैव समर्थयन्ति सकलं स्वाशासते सार्थकम् ॥१७॥

१०१० वाग्रूपा दिवि शब्दशक्तिरुदगात्साम्ना च रूपात्मना
दिक्षु व्योम्नि चिदातता स्वमुखसत्ताकमहिम्नाऽऽत्मना ॥
वायोराश्रयतश्चरत्यविरतं सर्वत्र सूत्रात्मना
शास्ति स्वः स्वरतः समस्तभुवने सोऽभ्येति भूतात्मना ॥१८॥

१०११ दूरादप्यतिदूरतोऽप्यनुलवं गच्छन् स आश्रूयते
दिग्व्योमादिपथा मरुच्चितिमुखाच्छब्दः स आश्राव्यते ॥
सूक्ष्मादप्यतिसूक्ष्मतोऽपि सततं श्रोत्रेण सङ्गृह्यते
सामीप्यात् परमोऽन्तरात्मनि हितः सन् संविदैवोह्यते ॥१९॥

१०१२ मूलाधारपदे परश्चितिपरो मध्ये हृदि स्यात् स्वरः
मूर्ध्नोऽन्तर्मुखत श्चरन् बहिरयं शब्दः स वाग् वैखरः ॥
मूर्धन्यन्तरनाहतोऽयमजपागायत्रिहंसाक्षरः
सोऽनुस्वारमयो नसो बहिरतन् स्यात् पूर्णबिन्दुस्वरः ॥२०॥

१०१३ शब्दः सोऽयमनाद्यनन्त उदगाद् यस्मात् समग्रौच्चयं
शास्त्रं सत्यमृगादिशब्दनिकरं तद् ब्रह्म पूर्णं स्वयम् ॥
वाक्छब्दात्मकशास्त्रयोनिपरता सिद्धं जगत्कारणं
तद्बोधे परमं प्रमाणशरणं स्याच्छब्दशास्त्रायणम् ॥२१॥

१०१४ शब्दोऽयं भुवि वेदशास्त्रवचनः सन् सर्वविद्योच्छ्रयः
सर्वार्थावगतौ प्रदीप इव सन् सर्वप्रकाशाश्रयः ॥
सन् सर्वज्ञगुणादिपूर्ण उदितः सर्वज्ञकल्पः स्वयं
ब्रह्मात्मेव चिदात्मवाक्प्रमुदितोऽनन्तोऽप्यसङ्ख्योऽक्षयः ॥२२॥

१०१५ शब्दो व्याकरणादिशास्त्रमुखतस्तद्रूपसत्प्रत्ययात्
स्वार्थज्ञानमुखादियोगमुखतस्तत्त्वत्रयेणान्वयात् ॥

शब्दादेव समर्थ्यते भुवि परः सर्वार्थसत्प्रत्ययः
शब्देनैव समर्थयन्त्यनुपदं सर्वं परार्थान्वयम् ॥२३॥

१०१६ शब्दो वेदमयः स चिद्रसमयो ब्रह्मात्मसंविन्मयः
वेदः शब्दमयः स्वराक्षरमयश्छन्दोमयो वाङ्मयः ॥
साक्षाद् ब्रह्ममयः स वाचकचितेर्वाच्यार्थवस्तूच्चयं
साक्षिप्रत्ययसञ्चये वितरति प्रज्ञानसत्त्वान्वयम् ॥२४॥

॥ शब्दः लिपिरूपः - रेखारूपकः - लेखात्मकः - ॥

॥ वाक्सञ्ज्ञकः ॥

॥ ऋङ्मन्त्रः ॥

यां पूषन् ब्रह्मचोदनीमारां बिभर्ष्याघृणे ॥
तया समस्य हृदयमारिख किकिराकृणु ॥
( ऋ० मं ६।५३।८ )

१०१७ यां पूषन् त्वरितां स्वशब्दचितिकां सद्ब्रह्मसञ्चोदनीं
आरां वाचकचित्स्वराक्षरपरां वाचं बिभर्षि स्वराम् ॥
चिद्भूत्यैव तया समस्य हृदयं शक्त्याऽऽलिख स्वार्चिषा
वाचा विश्वमिदं विविच्य सदयं प्राकाशय स्वाशिषा ॥२५॥

१०१८ शब्दः सोऽभ्युदितो दिवोऽन्तरहृदा वाचोपदिष्टो विदा
शक्त्या दिग्-वियदात्मको हृदि सदा श्रोत्रात् प्रविष्टो मुदा ॥
सर्वेष्वात्मसु मुद्रया सुकृतया सद्रेखया लेखनात्
स्वार्थं प्रेरयति प्रबोधयति धीयोगेन सञ्चेतनात् ॥२६॥

१०१९ रेखाङ्काक्षरचित्रवर्णसहितः सद्बिन्दुमुद्राततः
शब्दोऽयं प्रतिरेखया सुलिखितः सद्वस्तुसंकेततः ॥
शक्तो बोधयितुं निजार्थमखिलं वाच्यं च लक्ष्यं परं
शास्त्रेणैव हि शब्दितं सममलं संकेतसत्त्वाक्षरम् ॥२७॥

१०२० सद्योजातशिशोः सुसंस्कृतिपरे तज्जाकर्मान्तरे
वाग् वाग् वागिति तत् त्रिवारवचनं श्रोत्रे प्रविष्टं परम् ॥
तस्यान्तर्हृदयेऽन्तरात्मनि परे संस्कारसत्कारणं
तस्माच्छब्दपराऽत्र वाक् सुविदिता शब्दश्च तद्वाक्परः ॥२८॥

१०२१ शब्दोऽयं लिपिरूपतः सुलिखितः सद्रेखयोल्लेखतः
शस्त्राग्रेण शिलादिकर्षणकृतेः शिल्पादिसंकेततः ॥
शब्दाकारविचारसत्प्रकृतितो रूपादिसन्दर्शनात्
शास्त्रार्थोदितसंविदभ्युदयदः स्यात् तत्त्वसम्मर्शनात् ॥२९॥

१०२२ शब्दः सँल्लिखितश्चरस्थितिकृते सिद्धः समर्थः सदा
शब्दार्थाद्यवबोधने बचनतस्तस्योपदेशे विदा ॥
शक्तः स्यादिह दूरतोऽपि सकले भूमण्डले प्रेषणे
स्वाभिप्रायनिवेदनेऽखिलजगद्व्यापारसञ्चारणे ॥३०॥

१०२३ शब्दोच्चारमुखोदितं स्ववचनं सद्यः प्रमाणास्पदं
शापाशीर्वचनादिकं प्रवचनं वाग्दानसत्त्वार्थदम् ॥
शब्दादुच्चरिताच्च तद्दशगुणं लेखेन हस्ताक्षरं
साक्षात् साक्षिकृते प्रकृष्टकरणं भूयः प्रमाणं चिरम् ॥३१॥

१०२४ सन्नादध्वनिवर्णवाक्प्रकृतिकैः शब्दार्थकैर्धातुभिः
सत्ताज्ञानचितिक्रियाप्रगतिकैर्धर्मैर्गुणैः कर्मभिः ॥

सिद्धाः सार्थकवाक्सुधाचकमुखा शब्दाश्च नामात्मकाः
सर्वे तेऽपि समानशक्तिकमुणा वाक्छब्दरूपार्थकाः ॥३२॥

॥ इति द्वात्रिंशी कला सम्पूर्णा ॥

---

घोष आदिचेतनात्मनः सतः समुद्यतः
श्रूयतेऽन्तरे स्वरः स्वरन्तरे स्वराद्यतः
शब्द आश्रुतः पुनः स वाङ्मुखात् समीर्यते
शब्दितः स दैवरातवाक्सुधारसायते ॥३२॥

# ॥ त्रयस्त्रिंशी कला ॥

## ॥ "स्वनः" (३३) त्रयस्त्रिंशं वाङ्नाम ॥

१०२५ चिच्छब्दध्वनिनादवाक्स्वरमयो व्योम्नः "स्वनः" शाश्वतः
चिद्योगात्स्वनति स्ववाग्रसमयः प्राणस्वरोच्छ्वासतः ॥
सर्वस्वं स्वनयत्यजस्रकलया नाम्नस्त्रयस्त्रिंशतः
सोऽग्निस्तैजसवाङ्मुखो विवसति स्वैन्द्राग्नसत्त्वात् स्वतः ॥१॥

## ॥ सु-अनिति इति "स्वनः" अन् प्राणने ॥

१०२६ प्राणोऽपान इतिप्रसिद्धवचनः सन्त्सोऽनिति स्वात्मनः
व्यानोदानसमाननामवदनः सुष्ठूर्जितात्मस्वनः ॥
प्रत्यक्षा कृति शक्ति भाक् समुदिता वाक् स्वात्मचित्तिस्वना
प्रत्यञ्च्यन्तरिताऽत्मना सुरमते प्राचीप्रतीचीतना ॥२॥

दिवि स्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना
अभ्रादिव प्रस्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत् ॥
(ऋ० मं० १०।७५।३)

१०२७ दिग्रूपेऽत्रदिवि स्वनः प्रयतते तेजस्वता भानुना
दिग्योगान्महसः स्वराच्चरसतः सूर्यः सरस्वान् महान् ॥
तद्योगेन सरस्वती स्वनवती वाक् तस्य चिद्रोचना
प्राणादन्तरपानती प्रचरति प्राक् प्रत्यगात्मस्वना ॥३॥

शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ॥
चरन्ति विद्युतो दिवि ॥ (ऋ० मं० ९।४१।३)

उत्ते शुष्मास इरते सिन्धोरुर्मेरिव स्वनः ॥
वाणस्य चोदया पविम् ॥ (ऋ० मं० ९।५०।१)

१०२८ सोमो यः पवमान आत्मबलतश्चिज्ज्योतिषो योगतः
दिव्यस्तस्य महान् "स्वनः" समुदितो वृष्टेरिव श्रूयते ॥
वाणस्यैव हि वाक्स्वरस्य महतः सञ्चोदय स्वं पविं
वाच्यं वैद्युतसत्त्वकं घनमयं सम्बोधयाऽन्तर्हितम् ॥४॥

॥ "ऋक्" ( ३४ ) चतुस्त्रिंशं वाङ्नाम ॥

१०२९ "ऋग्" वाक् स्वार्थपराऽर्चति प्रतिपदं नाम्नश्चतुस्त्रिंशतः
साम्ना सा प्रतिगीयते सुमनसा सौम्या मनः सत्त्वतः ॥
ऋच्यन्तेऽत्र तया पदार्थपरया वाचाऽखिला देवताः
सूच्यन्ते सकलार्थसिद्धिसुहिता वाच्यार्थसत्त्वान्विताः ॥ ५ ॥

ऋचो अक्षरे परमे व्योमन्यस्मिन् देवा अधि विश्वे निषेदुः ॥
यस्तन्न वेद किमृचा करिष्यति य इत् तद्विदुस्त इमे समासते ॥
(ऋ० मं० १।१६४।३९)

१०३० ब्रह्माण्याश्च ऋचोऽक्षरे च परमे व्योमात्मके धामनि
ब्रह्मात्मन्यमृताः सहैव सकलैर्यस्मिन्निषेदुः समे ॥
तद् ब्रह्मैव न वेद यस्तु पुरुषो वाचा ऋचा किं भवेद्
ये वै तद् विदुरात्मनः सुतपसा शश्वत् त एवासते ॥६॥

इमा अस्मै मतयो वाचो अस्मदाँ
ऋचो गिरः सुष्टुतयः समग्मत ॥

वसूयवो वसवो जातवेदसे
वृद्धासु चिद्वर्धनो यासु चाकनत् ॥
( ऋ० मं० १० । ९१ । १२ )

११०२ अस्माकं हृदि संहिताः सुमतयो वाचो गिरस्ता ऋचः
यत् साकं भुवि जातवेदस इमाः सद्भावतः संस्तुताः ॥
इच्छन्त्यः परमां विभूतिमखिलां सिद्धाः स्वयम्भूतयः
वृद्धासु प्रति वाक्षु ऋक्षु भगवान् त्सोमि श्चकास्ति स्वयम् ॥७॥

ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये ॥
( यजु० तै० सं० )

१०३२ प्रत्यञ्च्यन्तरितामिहात्मनि ऋचं वाचं प्रपद्ये निजां
प्रत्यक्षां प्रथितां च वेदवचनां छन्दस्वतीं यज्ञजाम् ॥
प्राधान्येन हि सत्प्रमाणविषये वाचश्चऋग्रूपतां
प्राज्ञः प्राहुरनुश्रुतेन यजुषा प्रायस्त्रयीसत्त्वताम् ॥८॥

॥ "होत्रा" (३५) पञ्चत्रिंशं वाङ्नाम ॥

१०३३ "होत्रा" वाक् प्रजुहोति चाह्वयति सा पञ्चोत्तरत्रिंशता
होत्रा सा प्रतिहूयते क्रतुमुखे वाचा ऋचा शंसता ॥
हौत्रं तत्र करोति युक्तमनसा ध्यायन् हविर्देवताः
होताऽध्वर्युमुखाज्जुहोति च हविर्ऋक्तो वषट्कारतः ॥९॥

शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ॥
इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥
( ऋ० मं० १ । १४२ । ९ )

१०३४ देवेषु प्रथमा मरुत्सु ऋषिभि र्वागेव होत्रा सती
दिव्यात्मा शुचिरर्पिता सुमतिना होत्राऽऽत्मना भारती ॥
होत्री वागिह दिव्यदेवयजने तेभ्यो हविःप्रापणे
दिव्येडा च सरस्वती भुवि मही सीदन्तु बर्हिः क्षणे ॥१०॥

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन ॥
स धीनां योगमिन्वति ॥ (ऋ० म० १।१८।७)

आदृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम् ॥
होत्रा देवेषु गच्छति ॥ (ऋ० मं १।१८।८)

१०३५ यस्मादेव ऋते न सिध्यति विदां यज्ञो धियां व्योगतः
यस्मिन् त्स स्वयमेव सत्त्वमुदितः प्रोदेति चिद्भोगतः ॥
तस्मात् साधयतीह साधकतमः प्रत्यक्षयज्ञंबर्हिः
होत्रा वागपि तत्र गच्छति पुनर्देवेषु दातुं हविः ॥११॥

युञ्जते मन उत युञ्जते धियो
विप्रा विप्रस्य बृहतो विपश्चितः ॥
वि होत्रा दधे वयुनाविदेक इन्
मही देवस्य सवितुः परिष्टुतिः ॥
(ऋ० मं० ५।८१।१)

१०३६ प्रत्यञ्च्यात्मनि युञ्जते हृदि मनो योगेन विश्वा धियः
प्राज्ञाः प्राज्ञतमात्मनोऽपिबृहतः सद्योगनिष्ठाधियः ॥
प्राज्ञात्माऽखिलसंविदाप्तपुरुषः सन् एक एव स्वयं
प्रज्ञानेन परात्मनीह निदधे होत्राः स्ववाचः समाः ॥१२॥

॥ "गीः" (३६) षट्त्रिंशं वाङ्नाम ॥

१०३७ "गीः" स्वार्थं गिरतीह बोधयति सा वाङ्नाम्नि षट्त्रिंशगा
गीर्वाणैः प्रतिगीयते स्वरसतः पूर्णाद्यनुस्वारगः ॥
गीयन्ते परदेवताः श्रुतिगिरा पूर्णात्मनोद्गीर्णया
गीर्णा सा गुरुभावनापरतरा सर्वात्मना पूर्णया ॥१३॥

कथा दाशेमाग्नये काऽस्मै देवजुष्टोच्यते भामिने गीः ॥
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत् कृणोति देवान् ॥
(ऋ० मं० १।७७।१)

१०३८ का "गी"र्यज्ञमुखेऽग्नये समनसा वाग् देवजुष्टोच्यते
वाचंताममृतां परां स्वमनसा दातुं कथं शक्यते ॥
यो मर्त्येषु ऋतव्रतेन तपसा देवत्वमाप्तः स्वयं
होता सन् निजवाङ्मुखेन हविषा देवान् यजेतान्वहम् ॥१४॥

तां जुषस्व गिरं मम वाजयन्तीमवा धियम् ॥
वधूयुरिव योषणाम् ॥ (ऋ० मं० ३।६२।८)

१०३९ विश्वामित्र ऋषिश्चिरेण तपसा ब्रह्मत्वमासादयन्
मित्रं स्वं सवितारमक्षमनसा वाचा ऋचा संस्तुवन् ॥
तां सेवस्व गिरं ममेति वचसा स्वात्मानमेवार्पयन्
तं वै वेदगिराऽऽजुहाव मनसा योगेन सन्तर्पयन् ॥१५॥

यज्जातवेदो भुवनस्य मूर्धन्
अतिष्ठो अग्ने सह रोचनेन ॥

तं त्वा हेम मतिभिर्गीभिरुक्थैः
स यज्ञियो अभवो रोदसिप्राः ॥
( ऋ० मं० १० । ८८ । ५ )

१०४० यज्ञेनैव हि जातवेदसममुं प्राज्ञं प्रजानन् विदा
यज्ञं वर्धयता प्रकृष्टहविषा स्वाग्निं यजध्वं गिरा ॥
तं त्वां दैवतमाह्वयाम मतिभिः प्राणैश्च गीर्भिः सदा
स त्वं यज्ञसमृद्धयेऽयमभवः सन् यज्ञियः सर्वदः ॥१६॥

॥ "गाथा" (३७) सप्तत्रिंशं वाङ्नाम ॥

१०४१ "गाथा" साऽऽऽऽनि गायति स्वररसात् सप्तोत्तरत्रिंशगा
गानाद् व्योमनि सा स्वरगते गाथात्मिका श्रूयते ॥
षड्जादिस्वरयोगतः श्रुतिहिता वागेव गीतायते
वागयज्ञे प्रतिगीयते श्रुतिमुखात् सा यज्ञगाथायते ॥१७॥

१०४२ "गाथा" स्वस्वरतः ससोमरसतः सामस्वरेणान्विता
सोद्गीथेति परां प्रथामधिगता वाचा मृचामञ्चिता ॥
सोद्गाता निजसोमयागनिरतः प्राणात्मनोद्गायकः
स्वोद्गीथात्मकसामसौम्यरसतो वाग्ब्रह्मचित्सायकः ॥१८॥

अग्निमीळिष्वावसे गाथाभिः शीरशोचिषम् ॥
अग्निं राये पुरुमीळ्ह श्रुतं नरोऽग्निं सुदीतये छर्दिः ॥
( ० म० ८ । ७१ । १४ )

१०४३ अग्निष्टोममखे स्वशास्त्रमुखतः साम्नाऽन्विताः सप्तधा
गाथा ऋक्प्रमुखाः स्वशस्त्रमुखतः शस्याः प्रगाथाभिधाः ॥

गाथाभिः श्रुतिवाग्भिरग्भिरमृतो धीभिः स्ववाचेज्यतां
गाथेष्टा मनसा च सोमरसतो वाग् देवता तृप्यताम् ॥१९॥

**गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् ॥**
**तच्छंयोः सुम्नमीमहे ॥** (ऋ० म० १।४३।४)

१०४४ रुद्रो "गाथपतिः" स्तुतः श्रुतिमुखाद् वाचा ऋचा गाथया
भर्गो गायति रौति चित्स्वरमुखाद् गीत्याऽऽत्मशक्त्यर्थया ॥
भद्रं व्योमनि रोरवीति सहसा गाथामुखात् सुस्वरं
विद्युद्वाङ्मुखवृत्तया सरसया वाग्गाथया स्वान्तरम् ॥२०॥

### ॥ "गणः" (३८) अष्टत्रिंशं वाङ्नाम ॥

१०४५ गण्यो वाङ्मुखतो गणो गणनया साऽष्टोत्तरत्रिंशगा
गण्याख्या परपूर्णबिन्दुपरयाऽगण्या च सङ्ख्यान्तगा ॥
गण्यन्ते गणदेवता गुणपराः संयोगसङ्घातगाः
गुण्यन्तेऽखिलसद्गुणैरगणिता नैर्गुण्ययोगान्तगाः ॥२१॥

**इमं च नो गवेषणं सातये सीषिधो गणम् ॥**
**आरात्पूषन्नसि श्रुतः ॥** (ऋ मं० ६।५६।५)

१०४६ अस्माकं हि गवेषणं गुणगणं दिव्यान्तरं मार्गणं
सम्प्राप्तं स्वयमाससाद सगुणं वाग्रूपसत्त्वं गणम् ॥
पूषा सोऽयमिहान्तरे गणमयो दिव्यः स्वरात्मा श्रुतः
प्रत्यक्षो दिवि राजते सुतपसा दिग् व्योममात्राश्रितः ॥२२॥

**आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् ॥**
**अत्यो न गोभिरज्यते ॥** (ऋ मं० ९।३२।३)

१०४७ ईङ्कारस्वरनादसद्रसमयं वाक्सत्त्वपूर्णं गणं
हंसः स्वानुगुणं यथा निजरणं प्राणेन वाचोच्चरन् ॥
विश्वस्यैव मतिं प्रशासनमुखात् सत्त्वात्मना काशयन्
सोमः सोऽथ इवात्मदिव्यकिरणैः शान्त्याऽऽयते सन्नयन् ॥२३॥

१०४८ सेन्द्रात्मा मरुतां गणे निजगणे प्राणेक्षणे चिद्गुणे
सैन्द्रीं वाचमिहात्मवाचकगुणां वाग्रस्यरूपं गणम् ॥
मर्त्येष्वन्तरितं समैर्गुणगणैर्वाक्सत्त्वसत्याक्षरं
मर्त्यानाममृतत्वसिद्धिकरणे सम्पादत्यान्तरम् ॥२४॥

॥ "धेना" (३९) एकोनचत्वारिंशं वाङ्नाम ॥

१०४९ "धेना" धेनुरिवैव वाक् समरसा दोग्ध्री स्वसंविच्चितां
ध्येयं स्वात्मरसं धिनोति महसा सन्धापयन्ती सुतान् ॥
धन्या धामनि नन्दिनी निनदिता वाङ्नामगैकोनिता
चत्वारिंशपदा परा निगदिता धेन्वाऽसुधेनुर्नुना ॥२५॥

वायो तव प्रपृञ्चती धेना जिगाति दाशुषे ॥
उरूची सोमपीतये ॥ (ऋक् मं० १ । २ । ३)

१०५० "धेना" वाङ् मरुताऽन्तरिक्षसदने सम्पर्कतोऽत्यूर्जिता
याति स्वेन गुणस्वनेन सहसा चिच्छक्तितो गर्जिता ॥
दिव्यं सोमरसं सुमानसमयं पातुं हृदा संविदा
दातुं दानवते सते गुणवते चिद्वृद्धिदा सर्वदा ॥२६॥

वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे ॥
आर्दयद् वृत्रमकृणोदुलोकं ससाहे शक्रः पृतना अभिष्टिः ॥
(ऋक् मं० १० । १०४ । १०)

१०५१ वीरेण्यः क्रतुवित्तरः स भगवान् इन्द्रः सुशस्तो महान्
वीराणामधिपं स्वराऽसुवदना धेना तमीट्टे निजम् ॥
शक्तोऽयं सहमान एव सकलाः सेनाः स्वशक्त्या स्वयं
वृत्रं चावरकं तमर्दयदसौ लोकं सुलोकेऽकरोत् ॥२७॥

स इद्गने नमस्युभिर्वचस्यते चारुजनेषु प्रब्रुवाण इन्द्रियम् ॥
वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥
( ऋक् मं० १।५५।४ )

१०५२ सेन्द्रः स्त्रेषु जनेषु चेन्द्रियगणं चारु ब्रुवाणोऽर्थ्यते
मन्द्रानन्दपरैर्नमस्कृतिपरैः सर्वात्मना शस्यते ॥
वाचं धेनुमिमां रसेन मघवा क्षेमेण धेनां निजां
नित्यानन्दरसाभिदोहनपरां सम्पूरयत्यादिजाम् ॥२८॥

॥ "ग्नाः" (४०) चत्वारिंशं वाङ्नाम ॥

१०५३ वाग् वै "ग्नाः" सकलार्थवाचकगुणैर्ग्नाः समग्रानना:
चत्वारिंशपदं स्वशक्तिसगुणं वाङ्नामसु प्रस्तुतम् ॥
साऽऽग्नेयी पुरुषात्मवक्त्रजननात्सेन्द्रात्मसान्द्रानना
साऽम्नायी परमाऽग्निचित्तिवदना सम्राजते स्वात्मना ॥२९॥

उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य॒ग्नाय्यश्विनी राट् ॥
आ रोदसी वरुणानी शृणोतु व्यन्तु देवी य ऋतुर्जनीनाम् ॥

१०५४ "ग्नाः" सर्वा अपि वाग्विभूतय इमास्ता देवपत्न्यः श्रुताः
सेन्द्राणीह पराग्निशक्तिरपरा सैवाश्विनी राट् परा ॥

रस्यात्मा वरुणान्यमूर्युवतयो देव्यो जनीनां समाः
ताः सर्वाः समभावतोऽत्र हृदि मे शृण्वन्तु वाचः समाः ॥३०॥

उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे ॥
उत ब्रह्मा निषीदति ॥ (ऋक् मं० ४।९।४)

१०५५ अग्निः सोऽत्र निजेऽध्वरे व्रतपतिर्होता स्वयं वाक्पतिः
भूमौ वेदिपदे गृहे गृहपतिः सर्वान्तरश्चित्पतिः ॥
ब्रह्मा वागधिपश्च वेदवदनो यज्ञे मनःसत्पतिः
ब्राह्मी ग्नाश्च परा त्रयीमयतनूर्वाचा निषीदत्ययम् ॥३१॥

(१) शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥ (ऋ० मं० ७।३५।६)
(२) त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥ (ऋ० मं० १०।६६।३)

इन्द्रो वसुभिः परिपातु नोगयमादित्यैर्नो अदितिः शर्म यच्छतु ॥
रुद्रो रुद्रेभिर्देवोमृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥

१०५६ "ग्नाभि" नः प्रणुतेश्च वाग्भिरिह शं त्वष्टा शृणोतु स्वयं
त्वष्टाऽसौ सुहिताय तर्पयतु नः कर्त्ता सुगीर्भिर्हवम् ॥
इन्द्रोऽग्निर्वरुणो मरुच्च सविता रुद्रो मरुत्सत्पिता
वाग्भिस्ताभिरभिष्टुता दिविषदो यज्ञं च रक्षन्तु नः ॥३२॥

॥ इति त्रयस्त्रिंशी कला सम्पूर्णा ॥

---

सुस्वनेन वै ऋचा च होत्रया गिरा तथा
ग्नाभिरत्र धेनया गणेन चापि गाथया ॥
दैवतेन्द्रमुख्यसर्वदेवताः सुतर्पिताः
दैवरातवाङ्मुखेन वाक्सुधा समर्पिता ॥३३॥

# ॥ चतुस्त्रिंशी कला ॥

## ॥ "विपा" (४१) एकचत्वारिंशं वाङ्नाम ॥

१०५७ वाग् वै सैव विपा स्तुता श्रुतिमुखात् सौम्या पवित्रानना
वैशिष्ट्येन विपाति रक्षति मुखात् सोमं पिबत्यात्मना ॥
वाङ्नामस्वपि वेदवाचि पठितं सैकाधिकं सत्पदं
चत्वारिंशपदं विपा निगदितं गुप्तार्थतत्त्वप्रदम् ॥१॥

प्र वो मित्राय गायत वरुणाय विपा गिरा ॥
महिक्षत्रा ऋतं बृहत् (ऋ० मं० ५।६८।१)

१०५८ तन्मित्रावरुणात्मनोर्दिविषदोर्ज्योतीरसैकात्मनोः
ब्रह्मक्षत्रचिदात्मनोः समपदोर्ज्यायस्त्वभूमात्मनोः ॥
हृद्योगाय हि गीयतामिह विपा वाग् देवतात्मागिरा
सद्यो गायनतत्पराय भवतात् साऽऽत्मप्रसादोत्तरा ॥२॥

एष देवो विपा कृतोऽति ह्वरांसि धावति ॥
पवमानो अदाभ्यः ॥ (ऋ० मं० ९।३।१)

एते पूता विपश्चितः सोमासो दध्याशिरः ॥
विपा व्यानशुर्धियः ॥

१०५९ सोमो दिव्यरसात्मकः सुमनसो देवो विपासँस्कृतः
सौम्येनाप्यृजुभावनेन च वृतः सन्धावति स्वैरतः ॥
सोमास्तेऽत्र विपश्चितः सुमनसः पूताः पवित्राः श्रियः
सम्दावेन विपा च वाक्प्रतिनुताः संव्यानशुः सन्धियः ॥३॥

अया चित्तो विपाऽनया हरिः पवस्त धारया ॥
युजं वाजेषु चोदय ॥ (ऋ० मं० ३ । ६५ । १२)

स इद्दासं तुवीरवं पतिर्दन् षळक्षं त्रिशीर्षाणं दुवस्यन् ॥
अस्य त्रितोऽन्वोजसा वृधानो विपा वराह मयो अग्रयाऽहन् ॥
(ऋ० मं० १० । ९९ । ६)

१०६० सोम त्वं सुरसात्मना सुविहरन् प्रीत्या पवस्व स्वया
सार्कं तत्र विपा च वाग् रसमयी सिद्धाऽनया धारया ॥
सेन्द्रस्त्वाष्ट्रममर्दयत् त्रिशिरसं सिद्धं षडक्षं परं
तस्येन्द्रस्य विपा मराहमिह वाक्चित्तेरयोऽभ्याहनत् ॥४॥

॥ "नना" (४२) द्विचत्वारिंशं वाङ्नाम ॥

१०६१ नानार्थातु "नना" च वाक् प्रतिनुता भूयो निषेधद्वयात्—
साम्ना निश्चितसत्यवस्तुनियता साऽप्येकसत्ता द्वयात् ॥
वाङ्नाम्नि व्यधिकं पदं प्रतिगता नामानुरूपात्मिका
चत्वारिंशमिदं पदं ह्यधिगतं नादानुकृत्यात्मकम् ॥५॥

नानानं वा उनो धियो विव्रतानि जनानाम् ॥
तक्षा रिष्टं रुतं भिषग् ब्रह्मा सुन्वन्तमिच्छतिइन्द्रायेन्दो परिस्रव ॥
(ऋक् मं० ९ । ११२ । १)

१०६२ नानानं हि समन्वितं त्रिनयनं त्रेधाऽसुसत्तानन्नं
प्राणापानगतेः समाननयनं व्यानं तथोदाननम् ॥
तैर्वाचा "ननया" युताः समधियो नित्यं ननानां तनौ
तद्योगेन कृतेव्रतानि सकलान्याविर्भवन्त्यात्मनः ॥६॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना ॥
नानाधियो वसूयवोऽनु गा इव तस्थिम इन्द्रायेन्दो परिस्रव ॥
(ऋक् मं० ९ । ११२ । ३)

१०६३ तस्मात् कारुरहं स्वकर्मकरणात् सिद्धोभिषक्सत्त्वना
तस्मिन् त्सत्युपले च वाक् सुनिनदा स्यात् प्रक्षिणी सानना ॥
तन्नादानुकृतेननेति नदिता नाम्ना च नानाधियः
ताः प्राहुश्च वसूयवो वसुमतीस्ता गा इवातस्थिरे ॥७॥

१०६४ सोमेनापि सहान्वितेन मनसा सा वाक् नना संहिता
सत्या सैव समार्थतः प्रभवति प्रज्ञानना मंहिता ॥
सोमः सोऽपि च वाग्रसेन महसा स्वानन्दरस्यान्वितः
सेन्द्रायैव परात्मने सुमनसा नित्यं स्रवत्यन्ततः ॥८॥

॥ "कशा" (४३) त्रिचत्वारिंशं वाङ्नाम ॥

१०६५ कं शास्तीति "कशा" सुशब्दकरणाद् वेदाद् गतेः शासनाद्
वाक्छक्तेः कशति स्वचेतनगुणात् प्रज्ञानसत्त्वस्वनाद् ॥
अश्वादेरपि ताडिनीव सहसा शब्दायते त्र्युत्तरा
चत्वारिंशिपदा प्रशासनपरा वाक् संशिता चित्परा ॥९॥

१०६६ आकाशात्मदिशा कशा विकसिता कं शासती शस्तदा
लोकेऽश्वादिसुशासिकेव निशिता दिव्यायुधा स्वस्तिदा ॥
चत्वारीह पदानि सन्ति नियतैर्येस्यास्तु सा वाक् स्तुता
कं शास्तीह चकास्ति सा सुमहती वाङ्नामसु प्रस्तुता ॥१०॥

या वां कशा मधुमत्यश्विना सूनृतावती ॥
तया यज्ञं मिमिक्षतम् ॥ (ऋ० मं० १ । २२ । ३)

१०६७ या वां व्योम्नि कशाऽश्विनोर्मधुमती या सूनृता तद्वती
या कं शास्ति च सात्त्विकेन मनसा ब्रह्मामृतं शंवती ॥
साकं शासति वेदमन्त्रवचने वाग् यज्ञसंसेचनी
साम्ना सुस्वरमुक्यशा मधु पयो ब्रह्मात्मकं पृञ्चती ॥११॥

रथीव कशयाऽश्वाँ॒ अभिक्षिपन्नाविर्दूतान् कृणुते वर्ष्याँ॒ अह ॥
दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं॒ नभः ॥
(ऋ० मं० ५।८३।३)

१०६८ अश्वान्सन्नियतान् रथीव कशया वाचा च दूतान् निजान्
अत्राविष्कुरुते सवर्षणपरान् त्सत्कर्मणा वर्तितान् ॥
सिंहस्यात्र सुगर्जनेन मनुजा दूरात् समे जागृयुः
पर्जन्यो दिवि नादतः प्रकुरुते वाचा नभो वर्षकम् ॥१२॥

॥ "धिषणा" (४४) चतुश्चत्वारिंशं वाङ्नाम ॥

१०६९ चित्सत्त्वा "धिषणा"ऽऽत्मनाऽसुपरया ध्यायत्ययं तद्धिया
चिद्योगेन च धीषणात् स्वरगुणाद् वाचा विदाऽऽत्मास्तया ॥
धीरोदारगुणाऽसुधीन्द्रियगुणा नाम्ना निघण्टौ चतु-
श्चत्वारिंशपदाहिता सदभिधा साऽऽधीयते वाक्परा ॥१३॥

१०७० सन्धार्या धिषणाऽत्मचेतनगुणा धीनामवित्री सती
साऽऽध्येयाऽऽत्मधियं सनोति सगुणा सम्दावतः शंसती ॥
ध्येयं ब्रह्म धिनोति साऽखिलमिदं योगात्समातन्वती
ध्येया स्वात्मनि संविदेन्द्रियगणैर्वागेव साऽऽत्मन्वती ॥१४

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ॥
आपश्च मित्रं धिषणा च साधन् देवा अग्निं धारयन् द्रविणोदाम् ॥
(ऋक् मं० १।९६।१)

१०७१ सोऽग्निः प्रत्नतमश्चिरेण तपसा प्रादुर्भवन् विश्वतः
सद्यः काव्यमयानि मन्त्रवचनान्यात्मन्धत्त स्वतः ॥
तेजोऽपश्च सुसाधयन् धिषणया वाचा ससर्जात्मनः
तं चाग्निं द्रविणोदसं निदधिरे देवाः समे सर्वतः ॥१५॥

इन्द्रमेव धिषणा सातये धाद् बृहन्तमृष्वमजरं युवानम् ॥
अवोचाम शवसा शूशुवांसं सद्यश्चिद्यो वावृधे असामि ॥
(ऋक् मं० ६।१९।२)

१०७२ वाच्यं तं परमिन्द्रमेव भजितुं सत्यं बृहन्तं विदा
वाचाऽन्तर्दधिरे हृदा धिषणया प्राप्तुं निजेष्टं सदा ॥
भक्त्या सम्मुदितः प्रसन्नहृदयः सद्योऽभिवृद्धो बभौ
भक्तास्तं परमं प्रसन्नहृदयाः प्रेम्णा भजामः प्रभुम् ॥१६॥

॥ "नौः" (४५) पञ्चचत्वारिंशं वाङ्नाम ॥

१०७३ "नौ" नैत्री निखिलं नयेन नयति स्वं प्रापयन्ती पदम्
नीत्याऽऽत्मन्युपनीयते सुमतिभिः सन्तारिणी साऽऽपदाम् ॥
चित्याऽन्तः प्रतिनुद्यतेऽत्र तरणिर्वाङ्नाम्नि पञ्चोत्तरा
चत्वारिंशपदाऽखिलाश्रयपदा वाक् तारयन्ती परान् ॥१७॥

इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ॥
ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥
(ऋक् मं० ८।४२।३)

१०७४ मित्र त्वं वरुण त्वया शितचिता दक्षं शिशाधि क्रतुं
मन्त्रैर्नित्यमिमांधियं सुनियमैः त्वं शिक्षमाणस्य मे ॥

प्रज्ञानं च बलं सुवीर्यमखिलं मह्यं प्रदेहि प्रभो
सर्वाण्यप्यति सन्तराणि दुरितान्याप्यानि दुःखानि भो ॥१८॥

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ॥
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥
( ऋक् मं० १० । ६३ । १० )

१०७५ आग्नेय्या ज्वलदास्ययोर्ध्वगतया सर्वस्वसन्धारया
वैद्युत्या स्वदाप्यया ऽसुततया ऽप्यच्छिन्नया धारया ॥
नावैवातितरेम सर्वदुरितं वाचा विदाऽन्तर्धिया
नावं तां मनसाऽऽरुहेम परया प्राप्तुं परं वाचया ॥१९॥

१०७६ सुत्रामा चितिशक्तिरिन्द्रसचिवा प्राणात्मसन्त्राणदा
निःसीमा पृथिवी पृथुप्रगतिभूर्द्यौर्द्धिव्यतेजः प्रदा ॥
निर्व्याजा निजभावसत्त्वपरिभूः सन्तारयन्ती मुदा
नौर्वाक् सेयमखण्डमण्डलपथा ब्रह्माण्डभूमा सदा ॥२०॥

१०७७ नेत्री सत्यपथा ऋजुप्रणयना सेन्द्राग्निचित्त्यानना
निष्पापाऽप्यपराधदोषरहिता वाङ् नौरनागाः स्वयम् ॥
स्वर्याना ऋजुगामिनी सुनयना नौरस्रवन्ती दृढा
दैवीं नावमिहारुहेम सुखदां सौभाग्यदां स्वस्तये ॥२१॥

१०७८ अध्यात्मंक्रतुदक्षसत्त्वपरकं संवित्क्रियाशक्तिकं
तन्मित्रावरुणाधिदैवतपरं तेजोरसात्मार्थकम् ॥
साऽन्तर्दक्षबहिर्दमूर्जितधियैः सच्छाम्भवी सुव्रया
ब्रह्मात्मपरात्मसत्त्वपरता वाक् सम्यक्साचिक्रिया ॥२२॥

१०७९ वाग् वै नौरिह तारिणी भुवि नृणां हिंसादिदुष्कर्मणाम्
अज्ञानात्तमसोऽनृताच्च दुरितात् पापादिदुष्टात्मनाम् ॥
सुज्ञानोर्जितवाक्सुधावितरणात् संवित्क्रियाशक्तिका
सर्वां स्तारयति स्वयं प्रतिचिता तारेशतारात्मिका ॥२३॥

१०८० वाङ् मित्रावरुणात्मदैवतमयी वेदात्मविद्यामयी
विश्वात्मा क्रतुदक्षचिद्गुणमयी ज्योतीरसस्वर्मयी ॥
ब्रह्मक्षत्रसुशान्तिशक्तिरुभयी ज्ञानक्रियाचिन्मयी
ब्राह्मी सात्त्विकभावनागुणमयी वाग् देवता सन्मयी ॥२४॥

१०८१ सद्विद्यादि सुशिक्षणैककरणात् सर्वस्वधीधारणात्
सत्यासत्यविमर्शनैकचरणात् संवित्क्रयाप्रेरणात् ॥
नावा वाक्परया तरेम तपसा सन्तापपापापदः
वाचं नावमिहारुहेम मनसा सर्वापदुत्तारिणीम् ॥२५॥

१०८२ दिव्या नौरिह वाक्परा चितिमयी स्वव्योमतन्मात्रया
व्योम्न्यन्तः प्रवहत्यखण्डनिनदा छान्दस्यचिन्मात्रया ॥
स्वातन्त्र्येण निजाश्रितान् परचिता सन्त्रायते ज्योतिषा
दैवीं नावमिहारुहेम सहसा तां सन्तरन्तीं त्विषा ॥२६॥

१०८३ हृद्योगेन परात्मना सह मनोवेगेन चिज्ज्योतिषा
संयाति स्वपरात्मलक्ष्यमनसा सर्वात्मनः सन्दृशः ॥
सर्वान् त्वाननुयायिनः समदृशा संस्थाप्य नावि स्वयं
दिव्या नौः सुपथा नयत्यनुनयात्सा वाक् स्वलक्ष्यान्वयात् ॥२७॥

१०८४ चिज्ज्योतिर्मयसत्त्विकेऽत्र तरणिः सोमस्तमस्तारकः
तच्छक्तिस्तु सरस्वती स्वरवती सर्वस्वसन्तारका ॥
चिद्योगेन सुतेजसाऽवतरणान् प्राप्ताऽवनिं तारिणी
साऽऽग्नेयी भुवि नौरियं सुकृतिनां वाक् प्राणसन्त्राणनी ॥२८॥

१०८५ दैवी नौरिह वारुणी सुमनसामबूदेवतात्मासती
सौम्येनात्मरसेन सत्वमनसां सा प्राणसन्त्राणदा ॥
ऐन्द्रीन्द्रेण च वैद्युतेन मरुता युक्ता चिताऽऽत्मन्वती
रौद्री रुद्रियतेजसाऽग्निमहमा वाग् विश्वसन्तारिणी ॥२९॥

१०८६ ब्राह्मी ब्रह्मचिताऽन्विता त्रिगुणतो विद्यात्रयी निष्ठिता
ब्रह्मण्या बृहती निजाधिपतिना ब्रह्मात्मनाऽधिष्ठिता ॥
सच्चिद्ब्रह्मरसैकलक्ष्यगतित स्तद्ब्रह्मसम्प्रापिका
साक्षाद् वैतरणीह तारयति सा वागेव नौस्तारका ॥३०॥

१०८७ तारः स प्रणवाक्षरस्वरपरः सद्ब्रह्मवाच्यार्थकः
रुद्रः प्राणमनोवचःसहकृतं ताराय तस्मै नमः ॥
रुद्राणी प्रणवाक्षरस्वरातनूर्वागेव तारात्मिका
सर्वा स्तारयति प्रसाद कलया सा नौरिवास्मान् निजाम् ॥३१॥

१०८८ सर्वान्तर्यसुचेतनाकृतिपरा सर्वात्मिका वाक् परा
त्रैगुण्यात् त्रिवृता त्रिशक्तिकरणा सर्वात्मसंवित्परा ॥
सर्वेष्वन्तरिता समा सुनयना नेत्री प्रमात्री सतां
वागेवात्र समस्ततारणपरा माता परा नौरियम् ॥३२॥

॥ इति चतुस्त्रिंशी कला सम्पूर्णा ॥

---

वाङ्मुखोदिता विपा नना कशा धिषण्यया
नौश्च नामतः श्रुताः स्वमन्त्रतः समाख्यया ॥
वेदवाचि देवतेन्द्रदेवताः समास्थिताः
दैवरातवाकूसुधामुखेन ताः समास्तुताः ॥३४॥

# ॥ पञ्चत्रिंशी कला ॥

## ॥ "अक्षरम्" (४६) षट्चत्वारिंशं वाङ्नाम ॥

१०८९ वाग् वै तत् पर "अक्षरं" सदगलं तन्नक्षरत्यक्षयं
स्वार्थान्नच्यवते स्वशक्तिनियतं सञ्चेततेऽर्थान्वयम् ॥
स्वार्थं तत् स्वयमश्नुते स्थिरतरं वाङ्नाम्नि षट्कोत्तरं
चत्वारिंशपदं सुवाचकपरं सद् ब्रह्म सत्याक्षरम् ॥ १ ॥

**ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ॥**
**यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥**

(ऋक् १ । १६४ । ३९)

१०९० छान्दस्याश्च ऋचोऽक्षरे च परमे व्योमन्यधिष्ठानके
सर्वासां तदृचां पदेऽपि चरमे भूमात्मकेऽनूनके ॥
सर्वे ते सततं "निषेदु" रमृताः सद्ब्रह्मसन्मानके
सिद्धा वाचक-वाच्यसत्त्वपरके सत्याक्षरैकात्मके ॥ २ ॥

१०९१ एकस्मात् परमाक्षरात्तदुभयं तत्त्वेन सम्पद्यते
तादात्म्यान्मिलितं मिथः सुहृदयं सत्प्रत्याद् गम्यते ॥
सत्यं ब्रह्म तदक्षरं प्रतिपदं वाच्यं तथा वाचकं
सत्त्वाद् भौतिकमाधिदैविकमियादाध्यात्मिकं तात्त्विकम् ॥३॥

१०९२ सत्याद् ब्रह्मपरात् प्रमाणपरकात् प्रत्यक्षवागक्षरान्-
मेयं ब्रह्म परं परोक्षमुदितं ज्ञात्वा कृतार्थो भवेत् ॥
नो चेत् केवलवाचकाक्षरमिदं प्रोक्तं न चिन्चित्करं
तद्वद् वाचकसत्प्रमाणरहितं तत् स्यादकिञ्चित्करम् ॥ ४ ॥

"वागक्षरं प्रथमजामृतस्य" तै यजुः

१०९३ सत्यस्यापि ऋतस्य सा प्रथमजा वागक्षरं स्वात्मनः
सत्या सा परमात्मनश्चरमजा ब्रह्माक्षरैकात्मनः ॥
सत्यान्न क्षरतीति वागियमजा सिद्धं परोक्षाक्षरं
सत् साक्षादपरोक्षतश्च परतः संवित्सुबिन्दूच्चरम् ॥ ५ ॥

१०९४ प्रत्यक्षं प्रणवाक्षरं रसतमं सद् ब्रह्मवाक्सत्त्वकं
प्रत्येयं हि परोक्षवस्तु परमं लक्ष्यं च वाच्यार्थकम् ॥
तस्योच्चारणतोऽपरोक्षवचनं ज्ञातं स्मृतं भावितं
तद्योगात् समुपास्यतां समदृशा तत्त्वत्रयेणान्वितम् ॥ ६ ॥

॥ अक्षरं त्रेधा तत्त्वप्रचुरम् ॥

१०९५ वाच्यं वस्तुपरं तदक्षरपदं सद्ब्रह्म लक्ष्यं पदं
वाच्ये वाचकमक्षरं स्वरपदं साक्षात्प्रमाणास्पदम् ॥
वाच्यात्माऽत्वपरोक्षगोऽन्तरुदितो वाक्प्राणधीचित्परः
वाचा वेदयिता चिता स्वरमुखः सन्नक्षरात्माऽऽन्तरः ॥ ७ ॥

॥ प्रमाण - प्रमेय - प्रमातृसत्त्वका वाक् अक्षरात्मिका ॥

१०९६ सत्यं ब्रह्म सदक्षरं त्रिपुटितं तन्मातृ-मेय-प्रमा-
सत्त्वं वस्तु समस्ततत्त्वघटितं सत्सामरस्योत्तमम् ॥
स्याज्जीवात्म-परात्मवाक्प्रतिमितं तादात्म्ययोगोच्छ्रितं
सामर्थ्यादवगम्यतां प्रतिपदे वाच्यक्षरे संश्रितम् ॥ ८ ॥

गौरीर्मिमाय सलिलानि तक्षती० सहस्राक्षरा परमे व्योमन् ।
तस्याः समुद्रा अधि विक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ॥
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥ (ऋक् मं० १ । १६४ । ४१-४२)

१०९७ तस्याः शश्वदधिक्षरन्ति सरसा द्यावः समुद्राः समे
तेनैवामृतसद्रसेन सततं जीवन्ति लोका इमे ॥
वाचः सस्वर-सद्रसात्मकचितेस्तस्याः क्षरत्यक्षरं
विश्वं वाग्रसतोऽत्र संविदुदयाच्चित्पोपजीवत्यलम् ॥ ९ ॥

१०९८ पूर्णं ब्रह्म परोक्षमेव परमं सिद्धं स्वयं वस्तु सत्
साक्षाद् वैदिकवाक्प्रमाणमुखतो वेद्यं स्वशक्त्योल्लसत् ॥
तन्मानाक्षरमन्तरेण बिफलो व्यर्थः प्रमाता स्वयं
तद्वद् वस्तु परं प्रमेयमपि तद् व्यर्थं प्रमातुः स्वतः ॥१०॥

१०९९ साक्षान्मानपरेऽक्षरे श्रुतिपदे सद्वस्तुबोधात्पदे
तत्त्वात् सत्यसमस्तवस्तु फलदं ज्ञानं तदन्तर्हितम् ॥
तस्माद् वेदवचोऽक्षरेऽखिलमिदं सिद्धं समानं पदं
सर्वं हस्तिपदे निमग्नमिव तत् स्याद् वस्तु सत्यास्पदम् ॥११॥

"ततः क्षरत्यक्षरं तद् विश्वमुपजीवति"

११०० सत्यादक्षरतः प्रमाणपरकाद् वाक्सत्त्वरूपाद् गुणात्
सत्यं ब्रह्म परं क्षरत्यनुपदं सर्वैर्गुणैर्निर्गुणम् ॥
पूर्णं ब्रह्म तदक्षरेण सगुणं लक्ष्यं च वाच्यार्थकं
प्रत्नं पूर्णविरामसत्त्वगुणकं विद्यादनुस्वारकम् ॥१२॥

॥ "मही" (४७) सप्तचत्वारिंशं वाङ्नाम ॥

११०१ माहात्म्येन "मही" परं महयति स्वैर्मानवैर्मह्यते
मानादत्र महीयते सुमनसा तेजोमयी गृह्यते ॥
प्रत्यक्षा महतीह वाक् पृथुतरा वाङ्नाम्नि सप्तोत्तरा
चत्वारिंशपदा महःस्वरपरा मेया महिम्नोत्तरा ॥१३॥

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ॥
बर्हिः सीदन्त्वस्रिधः

( ऋक् मं० १ । १३ । ९ )

११०२ तत्रेळा च सरस्वतीति च मही सोमे स्तुता आप्रियाः
तिस्रो देव्य इति श्रुता युवतयो वाग्देवतामूर्तयः ॥
अत्राग्नेयमहःसुदिव्यकिरणै र्व्याप्ता मही वाङ्मयी
तस्यां सोऽग्निरपीह वागधिपतिर्मह्यां समास्ते स्वयम् ॥ १४ ॥

इमां ते धियं प्रभंरे महोमहीमस्यस्तोत्रे धिषणा यत्त आनजे ॥
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसाऽमदन्ननु ॥

( ऋक् मं० १ । १०२ । १ )

११०३ स्वीयां वाचमिमां "महीं" सुमहतीं स्वेन्द्राय दिव्यात्मने
स्वायामेव तनौ स्वया धिषणया स्तोत्रेऽर्पयात्यात्मने ॥
इन्द्रं तं मनसा नमाम महसा स्वप्रेरणे स्वोत्सवे
देवास्तेऽन्तरितां निजेन वचसा स्तुत्याधियाऽहर्षयन् ॥१५॥

एवा ह्यस्य सूनृता विरप्शी गोमती मही ॥
पक्वा शाखा न दाशुषे ॥

( ऋक् मं १ । ८ । ८ )

११०४ इन्द्रस्यास्य "मही" तु वाक् सुमहती सत्यात्मिका सूनृता
सैन्द्री सत्त्वगुणेन शुद्धमनसा सा गोमती स्याद्दता ॥
पक्वा पूर्णसुरस्यपक्वफलदा शाखेव सिद्धामृता
प्रज्ञानादिरसप्रदा विजयते सद्यः समेष्टार्थदा ॥१६॥

## ॥ "अदितिः" (४८) अष्टाचत्वारिंशं वाङ्नाम ॥

११०५ वागेव प्रथिता परेय "मदिति" माता विश्वव्यापिका
व्योमात्माऽभ्युदगादखण्डविततिः सर्वार्थसत्त्वापिका ॥
वाच्यार्थं न ददाति गुप्तनिनदा वाङ्नाम्नि साष्टोत्तरा
चत्वारिंशपदा प्रमाणनिगदा सा व्योमवाणी परा ॥१७॥

११०६ आद्या वाचकशक्तिका जगति वाक् सैवादिमाताऽदितिः
व्योमात्मैव चराचरात्मजगतामाधारभूताऽऽस्थितिः ॥
तस्यामन्तरिताऽऽत्मचित्तिक्तिता शब्दस्वराद्याततिः
वागेवादितिरार्षवेदविहिता तादात्म्यसत्त्वा धृतिः ॥१८॥

अदितिर्द्यौ रदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ॥
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥
(ऋक् मं० १।८९।१० )

११०७ ऊर्ध्वा द्यौरपि चान्तरिक्षमवदिर्माता च पुत्रः पिता
विश्वे पञ्चजनाः परे दिविषदो जातं च जन्यं तथा ॥
तद् वाचोऽप्यदितेः समानततया सन्मात्रया संस्थितेः
तस्माद् वाग् अदितिः स्तुता श्रुतिमुखात् तन्नामरूपाकृतेः ॥१९॥

॥ पृच्छामिवाचः परमं व्योम ॥ ( ऋ० मं० १।१६४।३४ )

॥ ब्रह्मायं वाचः परमं व्योमः ॥ ,, ,, ३५ )

॥ ब्रह्म वै वाचः परमं व्योमः ॥ ( तै. यजुः )

॥ ॐ खं ब्रह्म ॥ ( वा० सं० अ० २४ )

११०८ सद् ब्रह्मैवात्र च वाच एव परमं व्योमेह तच्चादितेः
सत्त्वं व्योमशरीरमेव हि परं ब्रह्मेति मन्त्रश्रुतेः ॥

"ओं खं ब्रह्म" यजुः सुमन्त्रवचनाद् वाग् व्योमसत्त्वाक्षरं
ब्रह्मेति प्रतिपद्यतां समदृशा तत् सत्यमन्त्राक्षरम् ॥२०॥

॥ "शची" (४६) एकोनपञ्चाशं वाङ्नाम ॥

इन्द्रो ब्रह्मेन्द्र ऋषि रिन्द्रः पुरु पुंरुहूतः ॥
महान् महीभिः शचीभिः ॥ (ऋ० मं० ८ । ३६ । ७)

१९०९ शक्त्या शंशति सा "शची" सुमनसा वाक् सा शची श्रीयते
श्रद्धा शान्ति शमाप्तयाऽऽत्मनि यया योगेन शं चीयते ॥
चिद्योगादिह चिन्वती जगति शं वाङ्नाम्नि सैकोनितं
पञ्चाशं पद माचिनोति तपसा श्रेयः सनिःश्रेयसम् ॥२१॥

१११० इन्द्रो ब्रह्म तथेन्द्र एव हि ऋषिर्वाग्भिः शचीभिर्महान्
सेन्द्रः सन् पुरुहूत आदि पुरुषः सम्द्रावभूमा भवान् ॥
इन्द्राणी च शची शचीपतिरसौ तद्ब्रह्मवाचस्पतिः
शच्या स्वात्मचिताऽऽत्महृत्सचिवया वाचैव चक्रेऽखिलम् ॥२२॥

११११ शच्या ब्रह्मचिता शचीपतिरभू दिन्द्रः स वाचस्पतिः
शक्त्या सोमसुधार्द्र सत्त्वकलया सर्वस्वभूतेः पतिः ॥
शंवत्याऽखिलसद्विभूतिपरया वाचा धिया संविदा
शान्त्याऽऽनन्दरसात्मपूर्णकलया सम्राजते सर्वदा ॥२३॥

शचीभिर्नः शचीवसू दिवानक्तं दशस्यतम् ॥
मा वां रातिरुप दसत्कदाचनास्मद्रातिः कदाचन ॥
(ऋ० मं० १ । १३९ । ५)

११११२ इन्द्रः सोऽष्टविभूतिभिः स्ववसुभिः सन् पारमैश्वर्यभाग्
भूमात्मा भगवान् परः प्रतिविभौ पूर्णतमसत्त्वार्थवाक् ॥
शक्तिस्तस्य शची सती भगवती सेन्द्राग्निसत्त्वोन्मुखा
चियोगेन शचीवसू प्रभवतां वागग्नितेजोमुखौ ॥२४॥

॥ "वाक्" (५०) पञ्चाशत्तमं वाङ्नाम ॥

१११३ "वाग्" वक्तीह निजार्थमात्मवचसा साऽन्तः परेत्युच्यते
साऽनूचानपरा प्रचेतनपदा संवित् प्रतीचीष्यते ॥
प्रत्यक्षाऽखिलसत्प्रमाणवचना प्रत्येति वाङ्नामगा
पञ्चाशत्तमसत्पदा प्रवचनात् प्रत्याययत्यात्मगा ॥२५॥

१११४ वाक् छन्दः स्वरनादसद्रसमये मुख्ये निजे वाङ्मये
वाच्या साऽखिलनामशब्दमुखतो वाचाऽखिलप्रत्यये ॥
वेद्या व्याकरणादिशास्त्रमुखतो वाच्यार्थशक्त्याऽन्वये
वेदाभ्यासविधेः प्रमाणमुखतः सर्वाधिविद्योदये ॥२६॥

१११५ नामाख्यातनिपातरूपवदना ये चोपसर्गाभिधाः
नानार्थेषु गुणक्रियादिवचनाः सिद्धाश्चतुष्पाद्विधाः ॥
स्त्रीपुंरूपनपुंसकाव्ययपदा वाक् प्रत्ययैकापिका
वाचः पादचतुष्टयेन गणितास्ते वाङ्मये व्यापकाः ॥२७॥

॥ वर्णमुखेनैव वाग्वर्णनम् ॥

१११६ वर्णैः पूर्णकलात्मकैरिह चतुःषष्टिप्रकृष्टैः समैः
वर्ण्या वर्णमुखैः स्वरैः प्रतिपदैर्वाच्यार्थसत्त्वोत्तमैः ॥
सा साक्षादपरोक्षतश्च परतो वाचैव वागुच्यते
साक्षाद् ब्रह्ममयी सदा विजयते वेदेन वाक् स्तूयते ॥२८॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ॥
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ ( ऋ० मं० ८ । १० । ११ )

११११७ देवीं वाचममूं परामजनयन् ब्रह्मात्मसत्त्वां सुराः
दिव्या व्योमनि सस्वरां समरसां ब्रह्मर्षयो भूसुराः ॥
तामेवानुवदन्ति विश्वपशवो देवा मनुष्याः समे
सा वेदात्मकमन्त्रसत्त्ववचना छन्दस्वती वाक् समा ॥२९॥

१११८ साऽस्माकं प्रति कर्मणि प्रतिपदं मन्द्रा महर्षप्रदा
सर्वार्थेषु सुहृत् प्रकृष्टफलदा स्वानन्दसंवित्प्रदा ॥
ज्ञानं जीवनमप्यलं निजबलं नित्यं दुहानाऽर्थदा
स्वान्स्मान् समुपैतु सत्त्वमनसा वाग् धेनुरात्मार्थदा ॥३०॥

यद् वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ॥
चतस्र ऊर्जं दुदुहे पयांसि क्वस्विदस्याः परमं जगाम ॥
(ऋ० मं० ८।१०।१०)

१११९ वाग् देवी यदचेतनानि संकलान्याविर्वदन्ती स्वयं
देवानां मदकृत् प्रहर्षरसकृन् नृणां स्वदेवान्वयम् ॥
राष्ट्री राष्ट्रभृदत्र सर्वकरणैः सा राष्ट्रसंसाधिनी
राज्ञी स्वीयसमग्रराष्ट्रहितकृत् सम्राजते स्वामिनी ॥३१॥

११२० ब्रह्मात्मन्युदिता परापरचिता सा संविदाना सती
ब्रह्मात्माद्यनुवादिनी स्वरचिता ब्रह्मात्मना भास्वती ॥
ब्रह्माणी निजवाङ्मुखात् स्वरसतो वाग् ब्रह्मवादिन्यसौ
ब्रह्मैवोपदिशत्यजस्रकल्या वाक्छक्तिरेवाम्भृणी ॥३२॥

॥ इति पञ्चत्रिंशी कला सम्पूर्णा ॥

---

अक्षरं मही तथाऽदितिः शची च वाक्परा
साक्षरैः सुनामभिः समर्थिताऽत्र साक्षरा ॥
वेदमन्त्रसंहिताः सुमन्त्रिताः समाः स्वराः
देवरातवाक्सुधारसस्वरोदिताक्षराः ॥३५॥

## ॥ षट्त्रिंशी कला ॥

### ॥ "अनुष्टुप्" (५१) एकपञ्चाशत्तमं वाङ्नाम ॥

११२१ वाक् सैवेय "मनुष्टु" बित्यनुनुता वाचाऽभ्यनुस्तूयते
साऽमुस्तौति निजं परार्थमखिलं स्वात्मानमप्यान्तरम् ॥
आत्माऽन्वेति च तामनुष्टुभमनु स्तौति स्तुवन्तीं परां
पञ्चाशत्तमथा तयैकपरया वाचैव संवित्तराम् ॥ ॥

**बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ॥**
**अनुष्टुभमनुचर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषा ॥**
(ऋक् मं० १० । १२४ । ९)

११२२ दिव्यानां सदपां रसेन सयुजं सख्ये चरन्तं परं
दिव्यं तं परमं चिदात्मपुरुषं हंसं समाहुः परे ॥
दिव्यां वाचमनुष्टुभं स्वयमनु स्वान्तश्चरन्तं सदा
दिव्यास्ते कवयो धिया दिविषदामिन्द्रं निचिक्युर्विदा ॥ २ ॥

**अनुष्टुभा सोम उक्थैर्महस्वान् ॥**

११२३ साऽनुष्टुप् सुरसा सती स्वरवती छन्दस्वती ऋङ्मयी
सा सोमेन मनस्वता रसवती सद्भावसंविन्मयी ॥
सोमः सोऽयमनुष्टुभा स्वररसैरुक्थैर्महस्वान् त्स्वयं
सद्योगान् मनसस्पतिर्विजयते सन् वाक्पतिः स्वान्वयम् ॥ ३ ॥

११२४ स्वात्मानं तमनुस्वरेण समनुस्तौतीह वाक् सर्वथा
सत्या सेयमनुष्टुबित्यनुमता वेदर्षिभिः संस्तुता ॥

सा सर्वाक्षरमूलिका स्वयमनुस्वारात्मिकाऽऽश्रूयते
साऽनुष्टुप् परपूर्णबिन्दुवदना विश्वाश्रयाऽऽश्रीयते ॥ ४ ॥

॥ "धेनुः" (५२) द्विपञ्चाशत्तमं वाङ्नाम ॥

११२५ "धेनु" र्वागभि धीयते स्तनमुखैर्दोग्ध्री सती संविदा
ध्येयं साधयति स्वयं सुकृतिनां ब्रह्मात्मतत्त्वार्थिनाम् ॥
स्तन्यं धापयतीह सद्रसमयं स्वानन्ददं सक्षमं
पञ्चाशं द्वधिकं धिनोति परमं प्रत्यायस्युत्तमम् ॥ ५ ॥

देवीं वाचमजनयन्त देवाः ० धेनु र्वागस्मानुपसुष्टुतैतु ॥
( ऋ० मं० ८ । १० । ११ )

११२६ देवास्तेऽजनयन्त वाचममृतां सर्वार्थसद्वाचकां
देवीमग्निमुखां वदन्ति पशवस्तां विश्वरूपाः समे ॥
साऽस्माकं हृदि हर्षदाऽन्नममृतं ज्ञानं दुहाना बलं
धेनुर्वागुपसंस्तुता निजसुतान् साऽस्मानुपैतु स्वयम् ॥६॥

धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते ॥
गामश्वं पिप्युषी दुहे ॥ ( ऋ० मं० ८ । १४ । ३ )

११२७ इन्द्र त्वय्धृदि सूनृता ऋतवती वाग् धेनुरन्तर्हिता
सैन्द्री यज्ञकृतेऽर्थिने श्रुतिमते स्यात् कामदोग्ध्री हिता
सिद्धा पुष्पफलादिभिः परिवृता सोमेन सर्वात्मना
सद्यः सर्वफलप्रदा सुकृतिनां स्वानन्दरस्याप्नना ॥ ७ ॥

धेनुः प्रत्नस्य काम्यं दुहानाऽन्तः पुत्रश्चरति दक्षिणायाः ॥
आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः ॥
( ऋ० मं० ३ । ५८ । १ )

११२८ धेनुः सद्रसदानकाममनसा रस्यं दधाना निजं
प्रत्नस्य प्रणिधानसाधनकृते काम्यं दुहाना रसम् ॥
पुत्रोऽन्तश्चरति प्रसन्नमनसा तद्दक्षिणायाः पदे
प्रत्यग्नि प्रतिसन्दधाति सुखदं प्राज्ञात्मसंविद्रसम् ॥ ८ ॥

तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ॥
गामश्वं पिप्युषी दुहे ॥ ( ऋक् मं॰ १ । १३४ । ४ )

११२९ तुभ्यं धेनुरियं हि वाग् रसवती वायो त्वया शंसती
सद्भावेन सबर्दुधा सदमृतं रस्यं दुहाना सती ॥
विश्वान्येव वसूनि भूतिविततेः सन्दोहमानाऽस्वती
विश्वं प्राणचिताऽन्वितं वितनुते संविद्रसं तन्वती ॥ ९ ॥

पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे ॥
हिनोति यद्वां विदथे सपर्यन् त्स रातहव्यो मानुषो न होता ॥
( ऋक् मं॰ १ । १५३ । ३ )

११३० पानार्थं हि ऋताय धेनुरदितिः सा वागखण्डात्मिका
सत्यायैव जनाय यज्ञहविषे यज्ञाय संयोजिका ॥
तौ मित्रावरुणौ च देवयजने वाचा सपर्यन् विदा
वाग्धेनोः समुपासनां प्रकुरुते होतेव मर्त्यो हृदा ॥१०॥

अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ॥
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥
( ऋक् मं॰ १ । १६१ । ३ )

११३१ अग्निं दूतमिमं प्रति स्वसुचितं यद्वाऽब्रवीतात्मनः
देवास्ते ऋभवस्त्रयः समनसो यूयं हविर्भागिनः ॥

धेनुर्वागपि कर्मणा च मनसा यद्वै चकारात्मना
तान्येन्वाऽनुकृतेः कृतेन नमसा युष्मानुपेमो वयम् ॥११॥

तत्तन्नासत्याभ्यां परिज्मानं सुखं रथम्
तत्तन् धेनुं सबर्दुघाम् ॥ ( ऋक् मं० १।२०।३ )

११३२ देवास्ते ऋषयस्त्रयोऽत्र ऋभवः सौधन्वनाः संश्रुताः
देवत्वं सुचिरेण युक्तपसा दिव्यामृतत्वं श्रिताः ॥
वाग्धेन्वैव तयाऽमृतत्वमुदिता स्वेन्द्रस्य सख्यं ययुः
धेनुं तां च सबर्दुघां सदमृतां चक्रुः स्वयं सम्बभुः ॥१२॥

धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ॥
त्वामिन्मे गोपतिं विश्व आहाऽऽन इन्द्रः सुमतिं गन्त्वच्छ ॥
( ऋक् मं० ७।१८।४ )

११३३ इन्द्रं त्वां चिरजीवनार्थं मनुयन् प्राणाय सत्संविदे
धेनुं वाचमिवार्थदामनुनयन् प्राज्ञात्मसत्त्वाप्तये ॥
धीयोगेन चिरेण सत्यतपसाऽऽसक्तो वसिष्ठोऽन्वहं
धेन्वा मन्त्रदृगेव सन् त्सुससृजे ब्रह्माणि योगाद्दहम् ॥१३॥

११३४ त्वामेवात्र ममाद्य गोपतिमिमं तद्धीन्द्रियाणां पतिं
प्रत्यञ्चीन्द्रमनन्तशक्तिपरमं प्राहुर्जगत्सत्पतिम् ॥
सत्योऽध्यक्षपदे प्रतिष्ठितमः सन् पारमैश्वर्यभाक्
सेन्द्रो गच्छतु मे सदैवसुमतिं प्रच्छादयन् अच्छवाक् ॥१४॥

११३५ वाग् धेनुः समुपास्यतां त्रिकरणैः प्रज्ञानसम्पत्तये
वेदास्यास्चतुस्स्तनी समरसा प्रक्ता पुमर्थाप्तये ॥

विज्ञानात् : यस्मात्सत्त्वजनने प्रापञ्चिके जीवने
विश्वात्मा भुवि विश्वधारणकृते धेनुः शरण्या नृणाम् ॥१५॥

॥ "वल्गुः" (५३) त्रिपञ्चाशत्तमं वाङ्नाम ॥

स इद्राजा प्रति जन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ॥
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ॥
(ऋ० मं० ४।५०।७)

११३६ "वल्गु" वागिह संस्तुतेः करणभूः सत्यात्मसद्धर्मणा
वेदास्येन बृहस्पतिं सुमनसा वल्गूयति ब्रह्मणा ॥
वाङ्नाम्नि प्रथितं पदं गुणकृतेः शब्दं त्रिपञ्चाशता
वक्ते वल्गुपदं श्रुतेरभिहितं वागर्थकं शश्वता ॥१६॥

वेरेथे अग्निमातपो वदते वल्ग्वत्रये ॥
अन्तिषद्भूतु वामवः ॥ (ऋक् मं० ८।७२।७)

११३७ वल्गुं तां वदते सतेऽत्रिऋषये वाचं हि वल्गूयते
वावग्निं वृणुतोऽश्विनौ सुतपसा तेजोरसाभ्यन्वितौ ॥
वल्गू इत्यनु संस्तुतौ श्रुतिमुखात् सत्येन वल्गूयतः
नासत्यौ परसत्यवस्तुनिलयौ सत्यात्मवाग्वल्गुतः ॥१७॥

ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसाऽऽविवासे ॥
या शंसते स्तुवते शम्भविष्ठा बभूवतुर्गृणते चित्ररातो ॥
(ऋक् मं० ६।६२।५)

११३८ तौ वल्गू भवतोऽश्विनौ पुरुतमौ तेजोरसैकात्मकौ
प्रत्नौ तौ हृदि नूतनेन वचसा संस्तौमि सत्यात्मकौ ॥

देवौ तौ स्तुवते सदा प्रभवतः सन्मङ्गलप्रापकौ
दिव्याभीष्टफलप्रदौ भगवतः सत्यैक भावात्मकौ ॥१८॥

अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन ॥
सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः ॥
(ऋक् मं० १०।६२।४)

११३९ सोऽयं सत्यमुखेन मानव ऋषिर्नाभा स नेष्टिभाक्
सत्यं वल्गु वदत्यभीष्ठवचनं तत् सत्यमन्त्रात्मवाक् ॥
सद्भावैः शृणुत प्रियैश्च ऋषयस्ते देवपुत्राः प्रियं
सुब्रह्मण्यमिदं सदास्तु भवतां भक्त्याऽनुगृण्हीत नः ॥१९॥

॥ "गल्दा" (५४) चतुष्पञ्चाशत्तमं वाङ्नाम ॥

११४० "गल्दा" वाक् प्रतिगल्दयत्यनुपदं सञ्चाल्यम्स्युच्चयं
गम्भीरेण च गर्जति प्रतिलवं सा गर्जयन्ती समम् ॥
वाङ्नाम्नि श्रुतिबोधितं सुपठितं वाच्यं चतुष्काधिकं
पञ्चाशत्तममत्र सत्पदमिदं वाचस्तु गल्दाभिधम् ॥२०॥

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ॥
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥
(ऋक् मं० ८।१।२०)

११४१ सोमस्यैवहि "गल्दया" निगदया वाचा धिया सत्यया
मा त्वामिन्द्र कथं भवामि भगवन् याचन् सदाऽहं गिरा ॥
ईशानं न तु याचिषत् त्रिभुवने को नाम जीवो भवेत्
स्वेष्टार्थे सवनेषु चुक्रुधमहं हिंस्रं मृगेन्द्रं यथा ॥२१॥

## ॥ "सरः" पञ्चपञ्चाशत्तमं वाङ्नाम ॥

११४२ स्वः स्थानात् सरतीह या रसवती सा वाक् "सरः" सुस्वरा
सर्वैः सा स्रियते स्वसंविदुदये प्राणाश्रयात् सद्रसा ॥
प्रज्ञानेन सरस्वती विजयते वाङ्नाम्नि पञ्चोत्तरा
पञ्चाशी परमार्थतो रसयति अध्यात्मसत्त्वाक्षरा ॥२२॥

११४३ तेजस्वान् दिवि भासते स्वरसतः सूर्यः सरस्वानसौ
तद्योगेन सरस्वती रसवती वाग् देवतात्माप्यसौ ॥
तस्मादेव सरोऽपि वागभिहिता प्रज्ञानभाग् भास्वती
गत्यर्थेन च चेतनार्थपरतो ज्ञानार्थयोगात् सती ॥२३॥

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ॥
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ॥
(ऋक् मं० ७।१०३।७)

११४४ विप्रास्तत्र सरः प्रपूर्णमिव तां वाचं वदन्तोऽभितः
तत्पर्जन्यकृते स्वदैवतनुतेः सोमेऽतिरात्रे यथा ॥
इन्द्रे ते परितस्थुरात्ममहसा संवत्सरस्यान्तरे
मण्डूका इव सम्बभूव तदहः सत् प्रावृषीणं बभौ ॥२४॥

आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः ॥
आपो न वज्रिन्नन्वोक्यं सरः पृणन्ति शूर राधसे ॥
(ऋ० मं० ८।४९।३)

११४५ इन्द्र त्वामनु सेन्दवः समरसाः सोमाः सुता स्त्वन्मुदे
गीर्भिः संवनीय दैवतविभो सर्वानुभाव प्रभो ॥

दिव्या आप इवैव वाक्प्रसरः सम्पूरयन्ति द्विजाः
सत्वं स्वीकुरु दिव्यसत्त्वसरसा सोऽस्मान् त्समानन्दय ॥२५॥

॥ "सुपर्णी" (५६) षट्पञ्चाशत्तमं वाङ्नाम ॥

११४६ सौपर्णी परसञ्ज्ञया सुरसरित् सा वाक् "सुपर्णी" त्रिधा
पर्णाभ्यांऽयते सुपर्ण इव सा माता सुपर्णाभिधा ॥
त्विज्ज्योतिः सुहिरण्यरूपतनुभृत् सत्त्वात्मसौपर्णिका
पञ्चाशीह षडुत्तराऽतति मनःप्राणात्मचित्कर्णिका ॥२६॥

११४७ सद्योगात् पततीह चेतनषदा दिव्यः सुपर्णो मतः
तद्योगेन सुचेतनाऽऽन्तरतमा सा वाक् सुपर्णी मता ॥
प्राज्ञास्ते पुरुषाः समे दिविषदो दिव्याः सुपर्णाः श्रुताः
प्रज्ञानात्मकचित्तिरश्मिवपुषो वाचः सुपर्ण्यः श्रिताः ॥२७॥

ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ॥
तास्ते क्षरन्तु मधुमद् घृतंपयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥
( ऋक् मं० ९ । ८६ । ३७ )

११४८ सोमः सत्त्वरसेन सर्वभुवनान्यात्मन्युपावीयते
स्वाशास्तत्र युजान इन्दुरभितो वाचः सुपर्ण्यः समाः ॥
तास्ते सोम घृतं क्षरन्तु मधुमद्दिव्यामृतं सत् पयः
ह्यद्योगेन तव व्रते सुनियता स्तिष्ठन्तु सर्वाः प्रजाः ॥२८॥

यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ॥
तावद्दधात्युप यज्ञमायन् ब्राह्मणो होतुरवरो निषीदन् ॥
( ऋक् मं० १० । ८८ । १९ )

११४९ तावन्मात्रमिहौषसः सुवित्तं तेजः प्रतीकं यथा
यावद् वै मरुतो गुणेन वसते वाचः सुपर्ण्यस्तथा ॥
तावत्तत्र दधाति यज्ञमुपयन् स ब्राह्मणः संविदा
होतुर्यज्ञकृतः परात् तदवरो यज्ञे निषीदन् त्सदा ॥२९॥

॥ "बेकुः" (५७) सप्तपञ्चाशत्तमं वाङ्नाम ॥

११५० वाङ्नामान्तिममत्र "बेकु" रिति वै स्यात् सप्तपञ्चाशगं
वेदे ऋक्षु यजुःषु चौपनिषदे नो दृश्यते ब्राह्मणे ॥
तस्यार्थोऽपि न लभ्यते विमृशतां तत्त्वार्थिभिर्मृग्यतां
तस्मिन्नेव निघण्टुके तदभिधामात्रार्थकं गृह्यताम् ॥३०॥

सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो ॥
( अप्सरसो बेकुरयः ) बेकुरयः ( तै० यजु० सं० ३।४।७।१ )

( ॥ "बेकुरिः" ॥ गन्धर्वभार्या अप्सरा )

११५१ देव्यो "बेकुरयः" श्रुता युवतयो गन्धर्वभार्यात्मिकाः
दिव्याश्चाप्सरसः "सुषुम्न" इति वै मन्त्रे यजुर्वेदके ॥
यज्ञे प्राणमनोऽनुगायनपरा वाग्देवताभूतयः
यज्ञार्हाः परयज्ञसाधनकृतौ स्वेन्द्राग्निचिन्मूर्तयः ॥३१॥

११५२ वाङ्नामानि निघण्टुकोषवचनै र्भूयो निरुक्तेऽर्थतः
व्याख्यातानि समस्तुतेस्तुनयनैः प्रायस्त्रितत्त्वार्थतः ॥
वेदार्थादिमुखेन संविदुदये सद्भावयोगार्पिता
वेद्यार्थेन च दैवरातमुखतः सा वाक्सुधा तर्पिता ॥३२॥

इति षट्त्रिंशी कला सम्पूर्णा ॥ ३६ ॥

वैदिके निघण्टुकोषनामका र्षवाङ्मये
वेदमन्त्रसंग्रहीतवाक्सुनामसञ्चये
दैवतादिवस्तुतत्त्वसत्त्वबोधकाभिधा
"दैवरातवाङ्मुखात् समुद्धताऽत्र वाक्सुधा ॥२६॥

इति वाक्सुधा सम्पूर्णा

प्रथमा पूर्वार्ध भागात्मिका समाप्ता

इत्यादि निवेदयिता
भवदीयः
विद्वत्परितोषाभिलाषी
दैवरातः